व्यतिक्रान्तः कोऽपि कालः । ससत्त्वा जाता भानुमती । उद्वेलितो जातो हर्ष-पारावारः । 'गुर्विणी श्रेष्ठिनी' इति सर्वैः तक्कुअजनैः (स्वजनजनैः) ज्ञातं सानन्दम् । किन्तु चिरसंचिता विभूतिः अनुदिनं पलायितुं प्रवृत्ता । एकतः आकर्ण्यते यत् विविध-महार्घ्य-विक्रेय-भरिता तरणी मध्ये समुद्रं ब्रुडिता । परतः सन्देशः प्राप्तो यत् कुत्रापि गोधूमादीनां धान्यानां महाभाण्डागारं अकस्मात् अग्निना दग्धम् । अन्यतः दविष्ठ-देशतः प्रवृत्तिः लब्धा यत् अमुकः प्रमुखः बाणोत्तरो गुर्वीं सम्पदं गृहीत्वा पलायितः । इतः व्यापारेष्वपि सर्वेषां वस्तूनां भावाः मन्दत्वं गताः । षट्सु मासेषु श्रेष्ठी समन्ततः द्वारिद्र्येण पराभूतः । कर्मकराः भृत्याः वाणिजिकाः, चिरपरिचिता अपि श्रेष्ठिनं मुक्त्वा परसत्काःभूताः । तथैव मित्राणि, स्वजनाः, दायादाः, सहचराः अपि विमुखीभूताः । स्थावरा जङ्गमा अपि च

सगर्भा ७ उद्वेलितः ८ तक्कुअजनः-स्वजनः (देशीयः) ९ आकर्ण्यते १० बाणोत्तरः —देशीय-शब्दः 'गुमास्ता' इतिभाषा ११ वाणिज्यकराः १२ परसत्काः-परकीया इत्यर्थः १३ पु० नं० यथा—मित्तो, सही, वयंसो (पाइयलच्छी १९१)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थावरा जंगमा वि य तत्थगया संपया उत्तमण्णेहिं[1] अहिकया। भूमि-गयं दविणमवि अदिट्ठं केणावि अवहडं। एत्तिएण जिणदत्तो थेवसमयम्मि वि णिस्सो[2] जाओ। सेट्ठिणा चिंतिअं-हरे! किमेअं जायं! केरिच्छा वंस-परंपरा-संचिआ सिरिआ अब्भविलायं विलोणा। विचित्तं विहिणो विलसिअं। सुमिणे वि अलक्खिआ वासरा पच्चखं समोइण्णा। अईव पच्चभिण्णाया[3] सिणेहिणो वि विगलिअ-सोहद्दा संवुत्ता।

धी धी! सत्थपरा जगस्सपीई! को कस्स त्ति ण साहेउं सक्कं। तहावि केरिसं ममत्तं? विचित्ता मुच्छा। अवागरणिज्जा आसत्ती। अहो वड्डखेड्डमेयं[4]! जे मज्झ सयासाओ अच्चंत-लहूभूआ तुच्छा अकिंचणा गुरुत्तणं गया, जावज्जीवं णो भे उवयारं पम्हुस्सामु' त्ति वयमाणा संता एत्ताहे सव्वे वि विमुहा विदूरगा जाया। नूणं ण कस्सइ दोसो, भविअव्वयाए चावल्लमिणमो। अहवा ण आइट्ठं किं पुव्वमेव जक्ख-पुंगवेण? ता अलमेत्थ चिंताए। तितिक्खामो पत्तआलं[5] विवयं। कराकड्ढिअं[6] कट्ठं कहमण्णहा भविस्सइ!

समागओ सत्तमो मासो गुव्विणीए भज्जाए। पइदिणं लद्धाऽसुहं-उग्गंतेण वुण्णावि[7] सा गब्भगयं तेअं पेच्छमाणो अंतो सुहमणुहवइ। एगया समयण्णुआए भाणुमईए पइदेवं पइ णिवेइअं—अज्जउत्त! पयट्टिज्जइ[8] मे गब्भस्स सत्तमेण मासेण। किं णाइं अहिगमिज्जई[10] भवया पुत्तणिमित्तं किंपि अणुट्ठाणं? केरिसो अम्हकेरा[11] णयरम्मि पईट्ठा? पढमिल्ले

---

१ उत्तमर्णैः-दायकैः २ निःस्व:-निर्धन ३ प्रत्यभिज्ञाताः ४ महत्कौतुकमिदम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रगता सम्पद् उत्तमर्णैः अधिकृता । भूमिगतं द्रविणमपि अदृष्टं केनापि अपहृतम् । एतावता जिनदत्तः स्तोक-समयेऽपि निस्वो जातः । श्रेष्ठिना चिन्तितम्—"हरे ! किमेतद् जातम् ? कीदृक्षा वंशपरम्परा-ञ्चिता श्रीः अभ्रविलायं विलीना । विचित्रं विधेर्विलसितम् । स्वप्नेऽपि अलक्षिताः वासराः प्रत्यक्षं समवतीर्णाः । अतीव प्रत्यभिज्ञाताः स्नेहिनोऽपि विगलित-सौहार्दाः संवृत्ताः ।"

धिग् । धिग् । स्वार्थपरा जगतः प्रीतिः । कः कस्य इति न कथयितुं शक्यम् । तथापि कीदृशं ममत्वम् ? विचित्रा मूर्च्छा ! अव्याकर्त्तव्या आसक्तिः ! अहो ! वड्डखेड्डं (महत्कौतुकं) एतत् । ये मम सकाशात् अत्यन्तलब्धभृताः, तुच्छाः, अकिंचनाः गुरुत्वं गताः । "यावज्जीवं न भवतः उपकारं विस्मरिष्यामः" इति वदन्तः सन्तः अधुना सर्वेऽपि विमुखा विदूरगाः जाताः । नूनं न कस्यापि दोषः. भवितव्यतायाः चापल्यमिदम् । अथवा न आदिष्टं किं पूर्वमेव यक्षपुङ्गवेन ? तस्मात् अलमत्र चिन्तया । तितिक्षामहे प्राप्तकालं विपदम् । काराकृष्टं कष्टं कथं अन्यथा भविष्यति ?

समागतः सप्तमो मासो गुर्विण्याः भार्यायाः । प्रतिदिनं लब्धाऽशुभोदन्तेन उत्रस्तापि सा गर्भगतं तेजः प्रेक्षमाणा अन्तः सुखमनुभवति । एकदा समयज्ञया भानुमत्या पतिदेवं प्रतिनिवेदितम् "आर्यपुत्र । प्रवर्त्यते मे गर्भस्य सप्तमेन मासेन, किं न अधिगम्यते भवता पुत्र-निमित्तं किमपि अनुष्ठानम् ? कीदृशी अस्मदीया नगरे प्रतिष्ठा ?

वड्डखेड्डमिति, देशीयः शब्द : ५ प्राप्तकालं ६ कराकृष्टम् ७ लब्धाऽशुभोदन्तेन ८ बुद्ध्या-उत्त्रस्ता ९ प्रवर्त्यते १० अधिगम्यते ११ अस्मदीयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवसरम्मि साहारणा अवि जणा जहारिहं किमवि काउं पयासेंति। भवं तु लद्धपइट्ठो राइणावि परमसम्माणणिज्जो वट्टइ, कहं णो परिलक्खिज्जइ सामइयं पइट्ठाणूरूवं किच्चं ?

अज्झत्थचिंतामिलाणेण सेट्ठिणा भणियं–पिआ ! सामाइयं सत्तमासिअं 'आधरणि'[1] त्ति णामगं किच्चं ण मए अलक्खिअं। पइट्ठाणुरूवं सव्वं साहुं करेमि'त्ति अहिलसइ मे उच्छुओ मणो। परं विहवेण विणा सव्वाओ दिसाओ सुण्णाओ। तव्वइरित्तो केरिसो महूसवो ! हा ! सच्चा हु एसा जणस्सुइ जं "दरिद्दसमो पराभवो णत्थि" हन्त ! किं करेमि ? कत्थ वच्चेमि ? विहिए वि पयत्ते कस्स वि सगासाओ ण पत्तं हवइ उद्धाररूवंपि धणं। सयणा तु संकहमवि[2] ण कुणंति। चिरपरिचिआ खु मित्ता अच्छिमेलणमवि कुणेंता वीलन्ति। किमिवि जायहिइ त्ति संकंता दूरओ पलायंति।

दारिद्द-दुक्खिअं पइदेवं पेक्खिऊण समय-दक्खा[3] भाणुमईए भणिअं–णाह ! ईइसो एस संसारो। सत्थपरायणा एत्थ कसिणावि पउत्ती। अणुऊलम्मि दिव्वम्मि सव्वे पारेक्का णिआएंति[4]। पडिऊलम्मि सगा[5] अवि हवेज्जा पारकेरा। हद्धी ! विविरीयम्मि विहिम्मि अंगलग्गाणि वत्थाणि वि पडिवक्खत्तणं पडिवज्जेंति। तहवि ण णेअव्वा दीणभावणा, ण छिदणिज्जा आसा-रज्जू, ण हायव्वो य पयत्तो। हवेज्ज पयत्त-जल-अब्भुक्खिआ[6] कयाइ फलीहूआ आसावल्ली। तक्केमि अहयं जहा मम्मणो णाम इब्भो

---

१ आधरणी-साधपुराई-गर्भवती के सातवें महीने का महोत्सव २ संकथा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राथमिके अवसरे साधारणा अपि जनाः यथार्हं किमपि कर्त्तुं प्रयस्यन्ति । भवान् तु लब्धप्रतिष्ठः राज्ञाऽपि परमसम्माननीयः वर्तते, कथं नो परिलक्ष्यते सामयिकं प्रतिष्ठानुरूपं कृत्यम् ?

अध्यात्म-चिन्ताम्लानेन श्रेष्ठिना भणितम्—प्रिये ! सामयिकं सप्तमासिकं 'आघरणी' इति नामकं कृत्यं न मया अलक्षितम् । 'प्रतिष्ठानुरूपं सर्वं साधु करोमि' इति अभिलषति मे उत्सुकं मनः । परं विभवेन विना सर्वाःदिशःशून्याः । तद्व्यतिरिक्तः कीदृशो महोत्सवः ? हा ! सत्या खलु एषा जनश्रुतिः यत् "दारिद्र्यसमः पराभवो नास्ति" हन्त ! किं करोमि ? कुत्र व्रजामि ? विहितेऽपि प्रयत्ने कस्यापि सकाशात् न प्राप्तं भवति उद्धाररूपमपि धनम् । स्वजनाः तु संकथामपि न कुर्वन्ति ? चिरपरिचितानि खलु मित्राणि अक्षिमेलनमपि कुर्वन्तः व्रीडन्ति । 'किमपि याचिष्यते' इति शङ्कमानाः दूरतः पलायन्ते ।

दारिद्र्य-दुःखितं पतिदेवं प्रेक्ष्य समय-दक्षया भानुमत्या भणितम्—"नाथ ! ईदृशः एष संसारः । स्वार्थ-परायणा अत्र कृत्स्नापि प्रवृत्तिः । अनुकूले दैवे सर्वे परकीयाः निजायन्ते । प्रतिकूले स्वकाः अपि भवेयुः परकीयाः । हद्धी (हा धिक्) विपरीते विधौ अङ्गलग्नानि वस्त्राणि अपि प्रतिपक्षत्वं प्रतिपद्यन्ते । तथापि न नेतव्या हीनभावना, न छेदनीया आशारज्जुः, न हातव्यश्च प्रयत्नः । भवेत् प्रयत्न-जलाभ्युक्षिता कदापि फलीभूता आशावल्ली । तर्कयामि अहं यथा मन्मनो

मपि-'आपसी बातचीत' ३ निजायन्ते ४ स्वकाः ५ प्रतिपक्षत्वम् ६ प्रयत्नजलाभ्युक्षित ा—निषिक्ता इत्यर्थः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुम्ह परम-पीइमंतो बाल-सहयरो। आवडिए एआरिसे विवया-समये भवेज्ज सहायगो कयाइ। एगहुत्तं[1] पुणो तस्स परिक्खा कायव्वा मह कहणेण।

मम्मणस्स किलिट्ठ-किवणिमाए पच्चभिण्णाओ वि सेट्ठी वीसत्थभज्जाए पुणो पुणो पेरिओ तग्गेहं[2]-हुत्तं गंतुमणो जाओ। मग्गे गच्छंतो जहा-जहा समीवयइ[3] तस्स दढमुट्ठिणो घरं तहा-तहा उव्विग्गं जायइ अंतोकरणं। छि छि! जीवसि तुमं जिणदत्त! अहमाहमं जायग-भावं उररी-कुणमाणो! किं ण जायणाओ-मरणं पवित्तं? तुराए चल-माणा सेट्ठिणो चलणा तत्थेव थंभिआ जाया। धीरमालं[4]-बिऊण पुणो विचिंतेइ—अलमलं णेण आउलत्तणेण। णूणं पुरिसआर-जेयं[5] सव्वदुक्खं'ति विभावेमाणो पुणो अग्गओ चलिओ। इत्थं विसाइअंतक्करणो[6] कहकहमवि पत्तो मम्मण-सेट्ठिणो हम्मिअं[7]।

विसण्ण-वयणं आगच्छंतं जिणदत्तं णिभालिअ मम्मणो विम्हिओ जाओ। तक्खणं उट्ठिऊण ससंभमं अहिमुहं गओ। सागयं' ति वयमाणो आसण-दाणेण संतोसिओ। 'किं मागमणकारणं' इअ णीसंकं पुच्छिओ। महुर-वयणेहिं पुण समासासिओ।

विअलिअ-हिययेणावि जिणदत्तेण पाउक्कया मणो-वेअणा। मित्तवर! किं कहेमि अकहणिज्जं वइयरं। आव-डिओम्हि भीसणे विवयाजाले। विहिआ विविहा पयत्ता विहलीहूआ। अंतम्मि बालसहयरं तुमं आसाए आलंबणं

---

१ एकवारम् २ मन्मनगृहाऽभिमुखम् ३ समीपयति ४ दृढमुष्टेः—कृपणस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाम इभ्यो युष्माकं परमप्रीतिमान् बालसहचरः। आपतिते एतादृशे विपत्-समये भवेत् सहायकः कदाचित्। एकवारं पुनः तस्य परीक्षा कर्त्तव्या मम कथनेन।"

मन्मनस्य क्लिष्ट-कृपणतया प्रत्यभिज्ञातोऽपि श्रेष्ठी विश्वस्त-भार्यया पुनः पुनः प्रेरितः तद्गृहाभिमुखं गन्तुमनाः जातः। मार्गे गच्छन् यथा यथा समीपयति तस्य दृढमुष्ठेः गृहं तथा तथा उद्विग्नं जायते अन्तःकरणम्। (छि ! छि !) (धिग् ! धिग् !) जीवसि त्वं जिन-दत्त ! अधमाधमं याचकभावं उररीकुर्वन् ? किं न याचनातः मरणं पवित्रम् ? त्वरया चलन्तौ श्रेष्ठिनश्चलनौ: तत्रैव स्तम्भितौ जातौ। धैर्यमालम्ब्य पुनः विचिन्तयति—अलमलं अनेन आकुलत्वेन। नूनं पुरुषकारजेयं सर्वं दुःखम्, इति विभावयन् पुनः अग्रतः चलितः। इत्थं विषादितान्तकरणः कथं कथमपि प्राप्तः मन्मनश्रेष्ठिनः हर्म्यम्।

विषण्णवदनं आगच्छन्तं जिनदत्तं निभाल्य मन्मनो विस्मितो जातः। तत्क्षणं उत्थाय ससम्भ्रमं अभिमुखं गतः। 'स्वागतम्' इति वदन् आसनदानेन सन्तोषितः। 'किं आगमनकारणम्' इति निस्संकं पृष्टः। मधुरवचनैः पुनः समाश्वासितः।

विचलित-हृदयेनापि जिनदत्तेन प्रादुष्कृता मनोवेदना। मित्रवर ! किं कथयामि अकथनीयं व्यतिकरम्। आपतितोऽस्मि भीषणे विप-ज्जाले। विहिता विविधाः प्रयत्नाः विफलीभूताः। अन्ते बालसहचरं

---

५ धीरं-धैर्यम् 'इद्धैर्ये' (हे० १-१५५) ६ पुरुषकारजेयम्-पौरुषजेयमित्यर्थः ७ विषादितान्तकरणः ८ हर्म्यमं-देशीयः-हर्म्यमित्यर्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जाणिअ एत्थ आगओ। करीयउ[1] सामयिअं साहेज्जं किंचि। जहा मे आवण्ण[2]-सत्ताए भज्जाए सत्तमासिओ गब्भ-मूहसओ सुसंपन्नो हवेज्जा। तएजारिसाणं[3] कए ण किमवि दुक्करं। सहि ! को पविसइ कस्स वि देहली-देसं गाढकारणं विणा जाएउं। एवं वयंतो सेट्ठी बाह[4]-जलाउल-लोअणो जाओ।

सुणिआण[5] जिणदत्तस्स पत्थणं किविणमणो मम्मणो विआर-णिमग्गो जाओ। किं पडिवयणं दायव्वं 'ति वीमंसणपरो संवुत्तो। 'आहारम्मि ववहारम्मि य चत्तलज्जेणं होअव्वं'ति चिंतिऊण मत्थअं धुणमाणो मम्मणो वयासी-मित्त ! णिवडिओ म्हि अपेच्छिज्जमाण[6]-नीसरणमग्गे चिंताजाले। एगओ मे अज्जपभिइ पालिअमदाणव्वयं, अण्णओ परमसहयरस्स सामइयं पत्थणं ! किं करेमि, कहिं वच्चेमि'त्ति ण णिण्णेइ[7] मे मुज्झमाणं माणसं। जाणामि अहमवि विवय-वसंवयाणं ठिइं, तहावि असमत्थोम्हि सिणिद्ध[8] ! अस्सि विसयम्मि किंपि काउं।

तवा-विणयकंधरो[9] जिणदत्तो पुणरवि भणइ–भायरं[10] ! णाहं दाणरूवं धणं इच्छेमि, किंतु उद्धाररूवेण। जइ दाउमिच्छसि तरिहि दरिससु उआरभावणं।

पगइ-महालुद्धो मम्मणो आयइ-पावणिज्जं धणं संकेतो पुणरवि साहेउं लग्गो–"बंधुवर ! किमवरं भणीयइ[11], वत्थु-विणिमयेण विणा किमवि दाउं अक्खमो म्हि अहं। वत्थु-

---

१ क्रियताम् २ आपन्नसत्त्वायाः—गर्भवत्याः ३ त्वादृशानाम् ४ बाष्प-जलाकुललोचनः। बाष्पे होऽश्रुणि (हे० २७०) ५ श्रुत्वा 'क्त्वस्तुमत्तूणतुआणाः' (हे० २-१४६) एते क्त्वा प्रत्ययस्यादेशाः तुआणस्य रूपमिदम् १० अपेक्ष्यमाण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वां आशायाः आलम्बनं ज्ञात्वा अत्र आगतः। क्रियतां सामयिकं साहाय्यं किञ्चित्। यथा मे आपन्नसत्वायाः भार्यायाः सप्तमासिकः गर्भमहोत्सवः सुसम्पन्नः भवेत्। त्वादृशानां कृते न किमपि दुष्करम्। सखे! कः प्रविशति कस्यापि देहलीदेशं गाढकारणं विना याचितुम्। एवं वदन् श्रेष्ठी वाष्प-जलाकुल-लोचनो जातः।

श्रुत्वा जिनदत्तस्य प्रार्थनं कृपणमनाः मन्मनो विचार-निमग्नः जातः। 'किं प्रतिवचनं दातव्यं' इति विमर्शनपरः संवृत्तः। 'आहारे व्यवहारे च व्यक्तलज्जेन भवितव्यं' इति चिन्तयित्वा मस्तकं धुन्वन् मन्मनः अवादीत्—"मित्र! निपतितोऽस्मि अप्रेक्ष्यमाण—निःसरण-मार्गे चिन्ताजाले। एकतः मे अद्यप्रभृति पालितं अदानव्रतम्, अन्यतः परम-सहचरस्य सामयिकं प्रार्थनम्। 'किं करोमि? कुत्र व्रजामि?' इति न निर्णयति मे मुह्यत् मानसम्। जानामि अहमपि विपद्-वशंवदानां स्थितिं, तथापि असमर्थोऽस्मि स्निग्ध! अस्मिन् विषये किमपि कर्त्तुम्।"

त्रपा-विनत-कन्धरः जिनदत्तः पुनरपि भणति—"भ्रातः! नाहं दानरूपं धनं इच्छामि, किन्तु उद्धार-रूपेण यदि दातुं इच्छसि तर्हि दर्शय उदार-भावनाम्।"

प्रकृति-महालुब्धो मन्मनः आयति-प्रापणीयं धनं शङ्कमानः पुनरपि कथयितुं लग्नः—"बन्धुवर! किमपरं भण्यते, वस्तुविनिमयेन विना किमपि दातुं अक्षमोऽस्मि अहम्। वस्तु-परावर्तेन यद किमपि

-निःसरणमार्गे ७ निर्णयति ८ स्निग्ध! मित्रमित्यर्थः ९ त्रपाविनतकन्धरः १० भ्रातः! 'नाम्न्यरं वा (हे० ३-४०) इति सम्बोधने वाऽरम्, यथा—हे पिअरं! हे पिअ! ११ भण्यते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परावत्तेण जं किमवि जहारिहं गहेउं सक्केइ भवंतो। हंत ! एआरिसी विज्जइ मे जीवण-संगिणी पइण्णा।

मिलाणोहूअ-वयण-कमलेण जिणदत्तेण भणिअं–"अरे ! रक्खणारिहं[1] जइ भवेज्ज वत्थुजायं तयाणिं तव्विणिमयेण संति सयं दायारा इमीए णयरीए। इणमेव महाकट्ठं जं णत्थि किमवि तारिसं वत्थुं। भाय ! तओ किंचि पुणरवि दत्तावहाणो होहि।"

"अणुवायो म्हि अहमेत्थ, किं बहुणा। हवइ मह पइण्णा-भंगो। ता वच्चउ अण्णत्थ जहासुहं, संति अणेगे उआरमाणसा धणिणो णयरम्मि" फुडं वज्जरिअं[2] वज्जकढोरेण मम्मणेण।

कत्थ परत्थ गंतव्वं'ति चितापरो सेट्ठी अंतम्मि गब्भ-गय-पुत्त-विणिमयेण दविणं गिण्हेमि'त्ति कयविणिच्छयो जाओ। किंचि वीमंसिऊण जिणदत्तेण दीह-णीसासेण सद्धिं पयडीकयं–"सही[3] ! जइ ण इच्छसि विणिमयेण विणा किमवि दाउं, तया मम भारियाए गब्भं रक्खिऊण दायव्वं जहारिहं धणं।"

आयण्णिअ जिणदत्तस्स भणिइं तक्कालं ससम्मयं[4] संमओ मम्मणो। साहुं णिण्णीअं सहयरेण। अवच्च-विणिमयेण जं किंपि इच्छेसि तं गहसु, अविलंबिअं दाउमणो म्हि।

तक्खणं जाओ एगो पइण्णा-लेहो[5]। जहा "जम्मणांतरं पुत्तो मम्मणगिहम्मि पुत्तरूवेण वुड्ढि लहिस्सइ। विणिवुत्त-बालभावो कय-सुट्ठु-विज्जाज्झयणो जया हवेज्जा तयाणिं मम्मण-सेट्ठिणा सो धणमज्जेउं पवासम्मि पट्ठाविअव्वो[6]।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथार्हं गृहीतुं शक्नोति भवान्। हन्त ! एतादृशी[1] विद्यते मे जीवन-सङ्गिनी प्रतिज्ञा।"

म्लानीभूत-वदन-कमलेन जिनदत्तेन भणितम्—"अरे ! रक्षणार्हं[2] यदि भवेत् वस्तुजातं तदानीं तद्विनिमयेन सन्ति शतं दातारः अस्यां नगर्याम्। इदमेव महत्कष्टं यत् नास्ति किमपि तादृशं वस्तु। भ्रातः ! ततः किञ्चित् पुनरपि दत्तावधानो भव।"

"अनुपायोऽस्मि अहमत्र, किं बहुना ! भवति मम प्रतिज्ञा-भङ्गः। तस्माद् व्रजतु अन्यत्र यथासुखम्, सन्ति अनेके उदारमानसाः धनिनो नगरे"—स्फुटं कथितं वज्रकठोरेण मन्मनेन।

'कुत्र परत्र गन्तव्यं'—इति चिन्तापरः श्रेष्ठी अन्ते गर्भगतपुत्र-विनिमयेन द्रविणं गृण्हामीति कृतनिश्चयो जातः। किञ्चिद् विमृश्य जिनदत्तेन दीर्घनिःश्वासेन सार्धं प्रकटीकृतम्—"सखे ! यदि न इच्छसि विनिमयेन विना किमपि दातुं तदा मम भार्याया गर्भं रक्षित्वा दातव्यं यथार्हं धनम्।"

आकर्ण्य जिनदत्तस्य भणितिं तत्कालं ससम्मदं सम्मतो मन्मनः। साधु निर्णीतं सहचरेण। अपत्य-विनिमयेन यत् किमपि इच्छसि तद् गृहाण, अविलम्बितं दातुमना अस्मि।

तत्क्षणं जातः एकः प्रतिज्ञालेखः[3], यथा—"जन्मानन्तरं पुत्रो मन्मन-गृहे पुत्ररूपेण वृद्धिं लप्स्यते। विनिवृत्त-बालभावः कृतसुष्ठु-विद्याध्ययनो यदा भवेत् तदानीं मन्मनश्रेष्ठिना स धनं अर्जयितुं प्रवासे

---

१ रक्षणार्हं २ वज्जरिअं—कथितम्, यथा—वज्जरिअ-सिद्ध-सूइय-उप्फालिय-पिसुणियाइं साहिअयं (पाइयलच्छी १४५)। ३ सखे ! ४ सहर्षं ५ प्रतिज्ञा-लेखः ६ प्रेषणीयः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जया सो तत्थ धणमज्जेऊण णिअं पुरं पडिवलिओ संतो सवुड्ढिअं गहिअं धणं पच्चप्पिऊण[1] णिअं पेइअं[2] गिहं गंतुमरिहो भविस्सइ" एआरिसो उभयसंमओ लेहो पंचणयरप्पमुहाणं हत्थक्खरेहिं सच्चविओ[3] गहिओ जिणदत्तेण मम्मणेण य। तव्विणिमयेण[4] पत्तं जिणदत्तेण दीनारसहस्सं।

इओ य चिरं पडिवालेइ[5] पइ-प्पवेसं अत्थचिंतासंतत्ता भाणुमई। कहं णाइं समागया अज्जउत्ता दविणं गहेऊण ? किं फुण्णा[6] दारिद्देण अम्हकए[7] सव्वावि वसुंधरा ? किं सव्वेहिं विसंभरिआ कयण्णुआ ? समेहिं सहयरेहिं अवि पामुक्का[8] अच्छि-लज्जावि ?

तक्खणं मिलाण-वयणारविंदा सणिअं सणिअं भवणं पविसमाणा पइदेवा दिट्ठीपहमोइण्णा मग्गं पेच्छंतीए ताए। झत्ति संमुहमागच्छंतीए णाए किं भूअंति अदिहिमंताए[9] पुच्छिअं।

विहिअ-अकरणिज्ज-कज्जेण बाहिज्जमाणो[10] सेट्ठी तुण्हिक्को[11] जाओ। मह विहिअं किच्चं माइहिअया भज्जा अणुजाणहिइ[12] ण व 'त्ति संकाउलो जाओ। एत्थंतरम्मि पइणा जहाकयं कज्जं पियाए पुरओ जहातहं पाउक्कयं, पच्चप्पिअं पुण दीणार-सहस्सं। अवसरण्णू विणयसहावा भाणुमई 'अज्जउत्ता पमाणं'ति वयमाणा मोणावलंबिणी जाया।

इअ सिरिचंदणमुणि-विरइआए-पुत्त-पत्थण-जक्खदंसण-
इड्ढिक्खयाइ-भावसंजुत्ताए रयणवालकहाए
पढमो ऊसासो समत्तो ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रस्थापितव्यः। यदा स तत्र धनं अर्जयित्वा निजं पुरं प्रत्यावलितः सन् सवृद्धिकं गृहीतं धनं प्रत्यर्प्य[1] निजं पैतृकं[2] गृहं गन्तुमर्हो भविष्यति।" एतादृशः उभय-सम्मतः लेखः पञ्च-नगर-प्रमुखाणां हस्ताक्षरैः सत्यापितो[3] गृहीतो जिनदत्तेन मन्मनेन च। तद्-विनिमयेन प्राप्तं-जिनदत्तेन दीनार-सहस्रम्।

इतश्च चिरं प्रतिपालयति[4] पति-प्रवेशं अर्थ-चिन्ता-संतप्ता भानुमती। कथं न समागताः आर्यपुत्राः द्रविणं गृहीत्वा? किं स्पृष्टा[5] दारिद्र्येण अस्मत्कृते[6] सर्वापि वसुन्धरा? किं सर्वैः विस्मृता कृतज्ञता? समैः सहचरैः अपि प्रमुक्ता[7] अक्षिलज्जापि?

तत्क्षणं म्लान-वदनारविन्दा शनैः शनैः भवनं प्रविशन्तः पतिदेवाः दृष्टिपथमवतीर्णाः मार्गं प्रेक्षमाणायाः तस्याः। झगिति सम्मुखं आगच्छन्त्या तया 'किं भूतं' इति अधृतिमत्याः[8] पृष्ठम्।

विहिताकरणीय-कार्येण बाध्यमानः[9] श्रेष्ठी तूष्णीको जातः। 'मम विहितं कृत्यं मातृहृदया भार्या अनुज्ञास्यति[10] न वा' इति शङ्काकुलो जातः। अत्रान्तरे पत्या यथाकृतं कार्यं प्रियायाः पुरतः यथातथं प्रादुष्कृतं, प्रत्यर्पितं पुनः दीनार-सहस्रम्। अवसरज्ञा विनयस्वभावा भानुमती 'आर्यपुत्राः प्रमाणम्' इति वदन्ती मौनावलम्बिनी जाता।

इति श्रीचन्दनमुनि-विरचितायां पुत्रप्रार्थन—यक्षदर्शन
ऋद्धिक्षयादिभावसंयुक्तायां रत्नपालकथायां
प्रथमः उच्छ्वासः समाप्तः।

---

१ प्रत्यर्प्य २ पैतृकम् ३ सत्यापितः—प्रलोकितः ४ तद्विनिमयेन ५ प्रतिपालयति ६ स्पृष्टा ७ अस्मत्कृते ८ पामुक्का-परित्यक्ता, यथा—पामुक्कं, विच्छड्डियं, अवहत्थियं, उज्झियं, चत्तं (पाइयलच्छी १३८) ९ अधृतिमत्याः धृतेर्दिहिः (हे० २-१३१) १० बाध्यमानः ११ तूष्णीकः-मौनी १२ अनुज्ञास्यति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२

बिइओ ऊसासो

पायसो गयाणुगइआ लोआ। अणणुकूले दइवम्मि सव्वंगिअम्मि[1] विवयसमयम्मि वि सुहसमय-णिव्वहणिज्जं परंपरा-पइट्ठाइअं खणिअगारव-दंसगं आडंबरिल्लं कज्जं ण परिचाएउमिच्छंति अहिमाणधणा जणा। सुवे[2] कि हविस्सइ 'त्ति ण परामुसंति अज्जंत[3]–कालमपेच्छमाणाणि माणंधलोअणाणि।

जिणदत्तेणावि विहिअं पिइपिआमह-गारव-गज्जिअं सत्तमासिअं गब्भमहं[4]। भोइआ नाणाविह-असण-पाण-खाइम-साइमेहिं बंधुजणा। सम्माणिआ जहोचिअ-सम्माण-दाणेण पुव्वजा पुज्जा। संतोसिआ पुण कुलाणुरूवं विअरणेण मंगलपाढका कुलगुरुणोवि।

---

१ सर्वाङ्गीणे 'सर्वाङ्गादीनस्येकः' (हे० २-१५१) २ श्वः 'एकस्वरे श्वः-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२

द्वितीयः उच्छ्वासः

प्रायशः गतानुगतिकाः लोकाः। अननुकूले दैवे सर्वाङ्गीणे विपत्-समयेऽपि सुखसमयनिर्वहणीयं परम्परा-प्रतिष्ठापितं क्षणिक-गौरव-दर्शकं आडम्बरवत् कार्यं नं परित्यक्तुं इच्छन्ति अभिमानधनाः जनाः। 'श्वः किं भविष्यति' इति न परामृशन्ति आयतिकालं अप्रेक्षमाणानि मानान्धलोचनानि।

जिनदत्तेनापि विहितः पितृ-पितामह-गौरव-गर्जितः सप्तमासिको गर्भमहोत्सवः। भोजिताः नानाविधअशन-पान-खादिम-स्वादिमैर्बन्धुजनाः। सम्मानिताः यथोचितसम्मान-दानेनः पूर्वजाः पूज्याः। सन्तोषिताः पुनः कुलानुरूपं वितरणेन मङ्गलपाठकाः कुलगुरवोऽपि।

स्वे (हे० २-११४) ३ उत्तरकालं, यथा—'आयइ अज्जंतकालं च' (पाइयलच्छी ९३५) ४ पु. न. गर्भमहोत्सवः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अइक्कंतो गब्भकालो । सुहंसुहेण पसविणी जाया भाणुमई । सव्वलक्खणसंजुत्तं उप्पण्णं पुत्तरयणं । अव्वो ! सुण्णं घरं गिहमणिणा सोहिअं । अभूअपुव्वो उत्थारो[1] वट्टिओ सयणाण-मणम्मि । धण्णेण सेट्ठिणा लद्धो वंसभाणू । दाणाइ-णीर-सित्तो फलिओ पुप्फिओ धम्म-कप्परुक्खो । णिभालिऊण अब्भग-मुहचंदं परमतुट्ठा भाणुमई । चिरपरिकप्पिओ दोहलो[2] पूरिओ विहिणा । अणेगेहिं आणंदिएहिं वयंसेहिं गहिअं सेट्ठित्तो पुण्णवत्तं[3] ।

जाहे णाया मम्मणेण जिणदत्तस्स पुत्तुप्पत्ती, सयराह-मेव पेसिआ तत्थ णिअया किंकरा पुत्तं णेउं । आगयं तेहिं जिणदत्तस्स हम्मिअम्मि, साहिअं च–"मम्मणसंतिआ अम्हे णवजायं सिलिबं[4] णिणेउं संपत्ता एत्थ तयादेसेण[5] ।"

तम्मग्गणं निसमिआण[6] सेट्ठी छिण्ण-हिअयो जाओ एगपए । हा हा ! अहुणेव मग्गणं ! एआरिसो अवीसंभो[7] ? तहवि णिअ-भावं संगोवेमाणेण तेण दीणमुहेण उईरिअ–"भद्दा । अज्जेव जाओ पुत्तजम्मो । अहुणापेरंतं ण कओ को वि खणो । ण ठविअं पुत्त-णामधिज्जं । ण भूआ पीइ-भोअण।इ विही । पत्थेह ससामिं-"भो ! जहा सो चिरावेइ[8] किंचि । तइयं वत्थुं निच्चलं तस्स समप्पिस्सं णाइं कोइ संदेहो । किंतु किवाए सत्तवीसं अहोरत्ते पडिवालेउ[9] सो उआरहिअयो महाणुहावो ।"

---

१ उत्साहः (हे० २-४८) २ गर्भिण्याः मनोरथः ३ हीरइ जं आणंदे, तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतिक्रान्तो गर्भकालः। सुखंसुखेन प्रसविनी जाता भानुमती। सर्वलक्षणसंयुक्तं उत्पन्नं पुत्ररत्नम्। अब्बो (आनन्दे) शून्यं गृहं गृहमणिना शोभितम्। अभूतपूर्वः उत्साहो वर्तितः स्वजनानां मनसि। धन्येन श्रेष्ठिना लब्धो वंशभानुः। दानादि-नीर-सिक्तः फलितः पुष्पितो धर्मकल्पवृक्षः। निभालयित्वा अर्भकमुखचन्द्रं परमतुष्टा भानुमती। चिरपरिकल्पितो दोहदः पूरितो विधिना। अनेकैः आनन्दितैः वयस्यैः गृहीतं श्रेष्ठितः पूर्णपात्रम्।

यदा ज्ञाता मन्मनेन जिनदत्तस्य पुत्रोत्पत्तिः, शीघ्रमेव प्रेषिताः तत्र निजकाः किंकराः पुत्रं नेतुम्। आगतं तैः जिनदत्तस्य हर्म्ये कथितं च—"मन्मनसत्काः वयं नवजातं सिलिबं (बालं) नेतुं सम्प्राप्ता अत्र तदादेशेन।"

तन्मार्गणं निशम्य श्रेष्ठी छिन्नहृदयो जातः एकपदे। हा! हा! अधुनैव मार्गणम्? एतादृश अविश्रम्भः? तथापि निजं भावं संगोपयता तेन दीनमुखेन उदीरितम्—"भद्राः! अद्यैव जातं पुत्र जन्म! अधुनापर्य्यन्तं न कृतः कोऽपि क्षणः। न स्थापितं पुत्रनामधेयम्। न भूतः प्रीतिभोजनादिविधिः। प्रार्थयत स्वस्वामिनं भोः! यथा स चिरायते किञ्चित्। तदीयं वस्तु निश्चलं तस्मै समर्पयिष्यामि न कोऽपि सन्देहः। किन्तु सप्तविंशति अहोरात्रान् प्रतिपालयतु स उदारहृदयो महानुभावः।"

वत्थं पुणवत्तं'ति (पाइय० ६-४२) ४ शिशुं ५ तदादेशेन ६ निशम्य ७ अविश्रम्भःअविश्वासः ८ चिरायते ९ प्रतिपालयतु।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पच्चावलिआ[1] भिच्चा। कहिओ वइअरो जहावत्तं। अवीसत्थो मम्मणमणो चिंताउलो जाओ। मा णं गहिअ थणंधयं भारिया-बिइओ[2] जिणदत्तो कत्थइ पलाएज्जा, तम्हा अहं पुव्वमेव संरक्खणं करेमि 'त्ति चिंतिअ तक्खणं हक्कारिआ[3] तेण णिअय-संतिआ सत्थपाणिणो पुरिसा। आणत्तं[4] पुण तेसिं "सावहाणेहिं तुब्भेहिं जिणदत्त-भवणस्स पुरओ चिट्ठिअव्वं, पेच्छिअव्वं अहोणिसं जहा ण किमवि अणिट्ठं सावगासं हवेज्जा। अईए णिच्छिए काले अब्भगं[5] गहिअ मे समीवमागंतव्वं" ति।

सत्थपाणिणो पुरिसा खिप्पामेव तत्थ आगया, आवासस्स अग्गओ सावहाणं ठिआ। को णीहरइ, पविसइ' त्ति सलक्खं सोवयोगं जोएउं[6] लग्गा।

विहिओ सेट्ठिणा अपुव्वो दारय-जम्म-महूसवो। अणेगाणं सुहसंदेसा पत्ता। अणेगे सुवे[7] जणा तत्थ संमिलिआ। कयं पइट्ठाणुरूवं पीइभोअणाइकिच्चं। दिण्णं जहोचिअं दाणं। ठविअं पिउच्छाए[8] दारयस्स रयणवालो 'त्ति सुहं णामधिज्जं। परम-पेम्म-पोसिआ कोडुंबिआ गया णिअयं णिअयं ठाणं छावं[9] सुहासीसाहिं वद्धावेंता।

खणा व्व अलक्खिआ सत्तावीसा राइंदिआ बोलीणा। परमपिय[10]-पुत्तदरिसण-पच्चूह-कारगो पच्चूहो[11] उदयं पत्तो। पच्चुट्ठिआ[12] मम्मणसंतिआ पुरिसा दारगं हत्थेउं[13]। हंत ! अज्ज अइउआरं पि जिणदत्त-हिअयं अईव

---

१ प्रत्यावलिताः २ भार्याद्वितीयः ३ आकारिताः ४ आज्ञप्तम् ५अर्भकम्-बालं ६ द्रष्टुं लग्नाः ७ स्वेः-स्वकीयाः ८ पितृस्वस्रा ९ शावं-शिशु १० परम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्यावलिताः भृत्याः। कथितो व्यतिकरो यथावृत्तम्। अविश्वस्तं मन्मनमनः चिन्ताकुलं जातम्। मा 'णं' गृहीत्वा स्तनन्धयं भार्याद्वितीयो जिनदत्तः कुत्रापि पलायेत, तस्मात् अहं पूर्वमेव संरक्षणं करोमि, इति चिन्तयित्वा तत्क्षणं आकारिताः तेन निजकसत्काः शस्त्रपाणयः पुरुषाः। आज्ञप्तं पुनस्तेभ्यः—"सावधानैः युष्माभिर्जिनदत्तभवनस्य पुरतः स्थातव्यं, प्रेक्षितव्यं अहर्निशं यथा न किमपि अनिष्टं सावकाशं भवेत्। अतीते निश्चिते काले अर्भकं गृहीत्वा मे समीपं आगन्तव्यं इति।"

शस्त्रपाणयः पुरुषाः क्षिप्रमेव तत्र आगताः, आवासस्य अग्रतः सावधानं स्थिताः। कः निःसरति, प्रविशति इति सलक्ष्यं सोपयोगं पश्यन्ति। विहितः श्रेष्ठिना अपूर्वो दारकजन्ममहोत्सवः। अनेकेषां शुभसन्देशाः प्राप्ताः। अनेके स्वेजनाः तत्र सम्मिलिताः। कृतं प्रतिष्ठानुरूपं प्रीतिभोजनादि कृत्यम्। दत्तं यथोचितं दानम्। स्थापितं पितृस्वस्रा दारकस्य 'रत्नपाल' इति शुभं नामधेयम्। परमप्रेमप्रोषिताः कौटुम्बिकाःगताः निजकं निजकं स्थानं शावं शुभाशीर्भिर्वर्धापयन्तः।

क्षणवत् अलक्षितं सप्तविंशतिः रात्रिन्दिवं व्यतिक्रान्तम्। परमप्रियपुत्रदर्शन-प्रत्यूहकारकः प्रत्यूषः उदयं प्राप्तः। प्रत्युत्थिताः मन्मनसत्काः पुरुषाः दारकं हस्तयितुम्। हन्त! अद्य अति उदारमपि जिनदत्त-

---

प्रियपुत्रदर्शनप्रत्यूहकारकः ११ प्रत्यूषः-प्रभातसमयः १२ प्रत्युत्थिताः १३ हस्तयितुम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किविणत्तणमणुहवइ पुत्तं पच्चप्पिणेउं। किमवि अघडिअं संपाडिज्जइ मए 'त्ति अलक्खिज्जमाणवेअणं आउल-वाउलं[1] सेट्ठिणो चित्तं। विज्जू-णिवायओ वि दुरहिसहं दारय-पच्चप्पणसद्दं णवप्पसविणी भाणुमई कहं सहिस्सइ 'त्ति हवीअ[2] किंकायव्वमूढो सेट्ठी। मा अहिआहिअं[3] ठिइं अणुहवउ तीसे मुणालकोमलं हिअयं 'ति वीमंसमाणेण पइणा सत्तिअ[4]–मिउवयणेण भज्जा संबोहिआ–'सत्तिमइ! अविहाविओ[5] किर कालस्स निग्गमो। पल्ल सागराणमवि पत्तो होइ अंतिमो खणो, का वत्ता पुण संखा-संकेइअस्स?[6] समागओ सो अणिट्ठो अट्ठवीसइमो दिअहो जम्मि अम्हेच्चयो[7] णंदणो पारक्को[8] संवट्टिहिइ। धम्मिट्ठे! इणमो चिअ धम्मपत्तीए पच्चक्खं इंधं जं[9] पडिऊलम्मि समयम्मि वि ण धिज्जं छिज्जेइ।

"कुओ समागओ अट्ठावीसइमो वासरो अज्जतणो अज्जउत्त! कहं संखावयाणं[10] तुम्हं संखा-विब्भमो जाओ?" पच्चुत्तरिअं वुण्णहिअयाए भाणुमईए सच्छरिअं सखेयं च।

ण लक्खिज्जइ माइहिअयाए तुमए सत्तरो गत्तरो कालो। भद्दा! ण सुमरेसि किं च ददरिसणजोग्गाए धवलाए बिइआए पुत्तजम्मो जाओ, अज्ज कण्हा रित्ता चउद्दसी तिही[11] वट्टइ। पाससु, उवट्ठिआ एए मम्मरणसंतिआ मणुआ पुत्तं करगयं काउं।

अव्वो! उवट्ठिआ एए मयहिअया[12] पुत्तं हत्थेउं।

---

१ आकुल-व्याकुलम् २ भूधातोर्यद् हवादेशस्तस्य भूतार्थस्य रूपमिदम् 'सी-ही हीअ भूतार्थस्य' 'व्यञ्जनादीअः (हे० २-१६२, १६३) हवीअ-अभवत्, अभूत, बभूव, इत्यर्थः ३ अधिकाहितं-मरणादि ४ सात्विक-मृदुवचनेन ५ अविभावितः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हृदयं 'किमपि अघटितं सम्पाद्यते मया' इति अलक्ष्यमानवेदनं आकुल-व्याकुलं श्रेष्ठिनः चित्तम् । विद्युन्निपाततोऽपि दुरधिसहं दारक-प्रत्यर्पणशब्दं नवप्रसविनी भानुमती कथं सहिष्यते' इति अभूत् किंकर्त्तव्यमूढः श्रेष्ठी ! मा अधिकाहितां 'स्थितिं अनुभवतु तस्याः मृणालकोमलं हृदयम्' इति विमृशता पत्या सात्विकमृदुवचनेन भार्या सम्बोधिता—"शक्तिमति ! अविभावितः किल कालस्य निर्गमः । पल्यसागराणां अपि प्राप्तो भवति अन्तिमः क्षणः, का वार्ता पुनः संख्यासंकेतितस्य ? समागतः स अनिष्टः अष्टाविंशतितमो दिवसः, यस्मिन् आस्माकः नन्दनः परकीयः संवर्त्स्यति । धर्मिष्ठे ! एतदेव धर्म-प्राप्त्याः प्रत्यक्षं चिन्हं यत् प्रतिकूले समयेऽपि न धैर्यं छिद्यते ।"

"कुतः समागतः अष्टाविंशतितमो वासरः अद्यतनः आर्यपुत्र ! कथं संख्यावतां युष्माकं संख्याविभ्रमः जातः ?" प्रत्युत्तरितं त्रस्तहृदयया भानुमत्या साश्चर्यं सखेदं च ।

न लक्ष्यते मातृहृदयया त्वया सत्वरः गत्वरः कालः । भद्रे ! न स्मरसि किं चन्द्रदर्शनयोग्यायां धवलायां द्वितीयायां पुत्रजन्म जातं अद्य कृष्णा रिक्ता चतुर्दशी तिथिः वर्तते । पश्य उपस्थिताः एते मन्मनसत्काः मनुजाः पुत्रं करगतं कर्तुम् । "अव्वो ! उपस्थिताः एते मृतहृदयाः पुत्रं हस्तयितुम् ! कथं अहं स्तनन्धयं परायत्तं करोमि ?

---

६ संख्या-सङ्केतितस्य ७ आस्माकः ८ परकीयः ९ चिन्हं १० संख्यावताम्-दक्षाणाम् ११ तिथिः १२ मृतहृदयाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कहमहं थणंधयं परायत्तं कुणेमि ? धी धी ! कहमेआरिसमविआरिअं वाया–संधाणं कयं भवया ? एवं विलवमाणी भाणुमई तक्खणं मोहमुवगया[1] । विवण्ण-वयणकमलेण भत्तुणा नाणाउइअ-उवयारेहिं चेअणं पाविआ सा रोउं पउत्ता । हद्धी ! कहमहयं न मया मुच्छा-परिगया ? पुत्तविहूणं जीयं[2] किं ण मरणाइरित्तं । धिय ! कयंतो वि ण कहमकयंतो[3] ?

सत्था होहि भामिणी ! सव्वं भव्वं होहिइ । इहइं पइण्णा-पालणं करणिज्जं अम्हेहिं । आणसु दारयं, जहा तं समप्पिऊण सवहीकयं सच्चं कुणेमो । कंपमाणकरा वहमाण-बाहजला मिलायमाणहिअया दूअमाणमणा अंते भाणुमई पुत्तं पच्चप्पिणंती साहेउं पउत्ता—"भव्वा ! अत्थि एसो पुत्तो अम्हाणं हिअयस्स खंडं, नयणाण जोई, किविणस्स धणं, जीवणस्स य सव्वस्सं । संति अणेगाओ आसाओ अस्सुवरि । मणयमवि मणो[4] ण इच्छेइ इमं खणमवि दूरेउं, परं कि भणीयइ, अणाचिक्खणीया[5] कहा खु भविअव्वयाए, अणुलंघणिज्जा रेहा किर देवस्स, ता एसो णिहिव्व सम्मं सुरक्खिअव्वो, कप्पतरुव्व सययं सेविअव्वो, धम्मव्व पइपलं धारेअव्वो य । किं बहुणा साहिएण,[6] जहा ण हवइ अस्स एगो वि बंको बालो तहा अणुचिट्ठिअव्वं 'ति । एवं बहुजंपमाणीए भाणुमईए रयणवालो बालो हिअयेण धणिअमालिंगिओ,[7] ससिणेहं मुहेण परिचुंबिओ,अंसुधाराहिं सिंचिओ, अणेगाहिं सुहासीसाहिं परिपोसिओ य हत्थाहत्थिं[8] समप्पिओ ।

---

१ मूर्च्छां २ जीवितं ३ न कृतोऽन्तो येन स अकृतान्तः ४ मनागपि 'मनाको

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धिग् धिग् ! कथं एतादृशं अविचारितं वाचासंधानं कृतं भवता"—एवं विलपन्ती भानुमती तत्क्षणं मोहमुपगता। विवर्णवदनकमलेन भर्त्रा नाना-उचितोपचारैः चेतनं प्रापिता सा रोदितुं प्रवृत्ता। हद्धी ! कथं अहं न मृता मूर्च्छापरिगता ? पुत्र-विहीनं जीवितं किं न मरणातिरिक्तम् ? धिक् कृतान्तोऽपि न कथं अकृतान्तः ?

स्वस्था भव भामिनि ! सर्वं भव्यं भविष्यति। इह प्रतिज्ञापालनं करणीयं अस्माभिः। आनय दारकं, यथा तं समर्प्य शपथीकृतं सत्यं कुर्मः। कम्पमानकरा वहद्वाष्पजला म्लायद्हृदया दूयमानमनाः अन्ते भानुमती पुत्रं प्रत्यर्पयन्ती कथयितुं प्रवृत्ता—"भव्या ! अस्ति एष पुत्रः अस्माकं हृदयस्य खण्डम्, नयनयोः ज्योतिः, कृपणस्य धनम्, जीवनस्य च सर्वस्वम्। सन्ति अनेकाः आशाः अस्योपरि। मनागपि मनो न इच्छति इमं क्षणमपि दूरयितुम्, परं किं भण्यते, अकथनीया कथा खलु भवितव्यतायाः, अनुल्लंघनीयारेखा किल दैवस्य। तस्मात् एष निधिवत् सम्यक् सुरक्षितव्यः, कल्पतरुवत् सततं सेवितव्यः, धर्मवत् प्रतिपलं धारयितव्यश्च। किं बहुना कथितेन, यथा न भवति अस्य एकोऽपि बङ्को बालः तथा अनुष्ठातव्यं इति।" एवं बहु जल्पन्त्या भानुमत्या रत्नपालो बालो हृदयेन गाढमालिङ्गितः सस्नेहं, मुखेन परिचुम्बितः, अश्रुधाराभिः सिक्तः, अनेकाभिः शुभाशीर्भिः परिपोषितश्च हस्ताहस्तिकं समर्पितः।

नवा डयं च' (हे० २-१६६) तेन मणयं, मणिअं, मणा ५ अकथनीया ६ कथितेन। ७ धणिअं-गाढम् ८ हस्ताहस्तिका।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुरपणामिअं तं सोमासं बालं हसंतं संतं घेत्तूण झत्ति गया ते मम्मणसमीवं । पयडीकुणमाणेहिं जहाकहिअं मायराहिप्पायं तेहिं दक्खयाए समप्पिओ सो सामिस्स ।

अणेग-सामुद्द-सुलक्खण-लक्खिअं पत्ताणुऊल-ग्गहबलं भविस्सुज्जलमब्भगं णिभालिऊण मम्मणो सेट्ठी उप्फुल्लो जाओ । वंझाए णिआए भारिआए अंकम्मि देवल्लविअं पुत्त-पारिओसिअं[1] ठवमाणेण तेण पाउक्कयं–"पिया ! केण उत्तो[2] सित्तो य कप्पतरू कहिं फलिओ ? केण विहाविअं जं अमुणा वंसभक्खरेण अम्हकेरं गिहं पज्जोइअं होहिइ ? केणावगमिज्जइ[3] अहवा सुहोदक्कं भागधेअं कया केरिसं अतक्किअं सुहं फलं देइ 'त्ति । निच्छिअं मुणअव्वं जमेसो बालो अम्हेच्चयो च्चिअ; ण खलु जिणदत्तस्स दारिद्दाहिद्दुअस्स[4] । कया सोलसवासाइं पुण्णाइं भविस्संति ? कया पुत्तो जुवाणो भुच्चा पचिट्टिहिइ[5] ? कया पुण सवुड्ढिअं धणं विढविऊण[6] पच्चप्पिणिहिइ[7] ? सव्वमिणं कप्पणामणोहरं अब्भचित्त-संकासं विज्जइ । को जीविहिइ को मरिहिइ 'त्ति को णाउमरिहिइ ? सुहवे ! ओरसमवच्चमिणं 'ति मण्णमाणी तुमं इमं पालसु । मा णं किसमवि ऊणत्तणं अस्स लालण-पालणे अणुहवसु ।

चित्तं ! खुट्टं चुच्छ[8] किविणमवि य मम्मणस्स चित्तं बालगस्स पुण्ण-गुरुआए उआरं, पेमिल्लं, अणुऊलं च जायं ।

---

१ पुत्रपारितोषिकम् २ उप्तः ३ अवगम्यते ४ दारिद्र्याभिद्रुतस्य ५ प्रस्थास्यति ६ अर्जयित्वा 'अर्जेर्विढवः' (हे० ४-१०८) ७ प्रत्यर्प

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुरार्पितं तं सुकुमालं बालं हसन्तं सन्तं गृहीत्वा झगिति गताः ते मन्मनसमीपम् । प्रकटीकुर्वद्भिः यथाकथितं मात्रभिप्रायं तैः दक्षतया समर्पितः स स्वामिने ।

अनेक-सामुद्र-सुलक्षणलक्षितं प्राप्तानुकूल-ग्रहबलं भविष्योज्ज्वलं अर्भकं निभालयित्वा मन्मनः श्रेष्ठी उत्फुल्लो जातः । वन्ध्यायाः निजायाः भार्यायाः अङ्के देवार्पितं पुत्रपारितोषिकं स्थापयता तेन प्रादुष्कृतम्- "प्रिये ! केन उप्तः सिक्तश्च कल्पतरुः कुत्र फलितः ? केन विभावितं यत् अमुना वंशभास्करेण अस्मदीयं गृहं प्रद्योतितं भविष्यति ? केनावगम्यते अथवा शुभोदर्कं भागधेयं कदा कीदृशं अतर्कितं शुभं फलं ददातीति । निश्चितं ज्ञातव्यं यदेष बालः आस्माकः एव, न खलु जिनदत्तस्य दारिद्र्याभिद्रुतस्य । कदा षोडषवर्षाणि पूर्णानि भविष्यन्ति ? कदा पुत्रो युवा भूत्वा प्रस्थास्यति ? कदा पुनः सवृद्धिकं धनं अर्जयित्वा प्रत्यर्पयिष्यति ? सर्वमिदं कल्पना-मनोहरं अभ्र-चित्र-संकाशं विद्यते । कः जीविष्यति, कः मरिष्यति इति को ज्ञातुं अर्हति । सुभगे ! 'औरसं अपत्यं इदम्' इति मन्वाना त्वं इमं पालय 'मा' 'णं' क्रुशमपि ऊनत्वं अस्य लालन-पालने अनुभव ।"

चित्रम् ! क्षुद्रं तुच्छं कृपणमपि च मन्मनस्य चित्तं बालकस्य पुण्यगुरुतया उदारं प्रेमवत् अनुकूलं च जातम् । अङ्के कृत्वाउत्तानशयं

यिष्यति ८ अर्हति ९ तुच्छं-'तुच्छे-तश्चच्छौवा' (हे० १-२०४) तेन छुच्छं, चुच्छं, तुच्छमपि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अंकम्मि काऊण उत्ताणसयं[1] सेट्ठी णाणाविहं कीड्डं कुणेइ। जहा तहा जंपंतो तं रमावेइ। विम्हुट्ठावर-गिहकज्जो तं खंधमारोविऊण जत्थ तत्थ भमाडेइ। धाईणं ववत्था वि जहोचिआ कया। गिरि-कंदर-लीणो चपंगपायवो विव मम्मण-गिहम्मि सुहं सुहेणं परिवड्ढए सो। हंत! विचित्ताणि विहणो विलसिआणि।

इओ य परहत्थगयं पोअं काऊण गहिअ-रसा उच्छुलट्ठी विव, णिवडिअ-पत्त-पुप्फ-फला रुक्खावली विव, चेयणासुण्णा तणू विव भाणुमई होहिअ। अव्वो! पच्चूसम्मि वि सव्वओ गाढंधयारो पत्थरिओ। वाहिवज्जिए वि ताए सरीरम्मि काइ असहणिज्जा अउलवेअणा उप्पडिआ[2]। गहिलचित्ता इव चिंतेइ सा–"किं जागरूआ वि अहं पच्चक्खं सुमिणं पेच्छेमि? किं पायडजोगपावल्लावि[3] अहं मया? अम्मो! किं मए एआरिसं महामोल्लं वत्थुं हारिअं, जिणा[4]-विणा सव्वं विज्जमाणमवि तहाविहं अविज्जमाणमिव पडिहाइ। हंदि! केण पम्हुसिअं[5] मे हिअय-सयलं, जेण विणा सयलमवि पम्हुसिअं[6] जायं। हरे! माउउच्छंग-वंचिओ सो वराओ सिलिबो किं कुणमाणो हवेज्जा? हंत! हयविहिणा थणंधयो बालो कीस माऊआ[7]-विरहिओ कओ? केरिसी परिवालणा तस्स हविस्सइ परगिहठिअस्स मंदभग्गस्स?" एवं णाणा-विकप्पजाल-परिअरिआ माया कयाइ मुच्छइ, गिलायइ, मिलायइ, अणवरय-पवहमाण-बाहजलेण भूअलं पल्ललीकरेइ[8] य। विक्खित्त-चित्ता पुण इओ तओ परिभमइ, खणमेत्तमवि ण कत्थइ सुहलवमणुहवइ। सेट्ठिणो वि तारिसी ठिई संवुत्ता, परं को सुणेइ विहि-दाव-दड्ढाणं पुक्कारं?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रेष्ठी नानाविधां क्रीडां करोति। यथा तथा जल्पन् तं रमयति। विस्मृताऽपरगृहकार्यः स्कन्धं आरोपयित्वा यत्र तत्र भ्रामयति तम्। धात्रीणां व्यवस्थाऽपि यथोचिता कृता। गिरिकन्दरलीनः चम्पकपादप इव मन्मनगृहे सुखं सुखेन परिवर्धते सः। हन्त! विचित्राणि विधेर्विलसितानि।

इतश्च परहस्तगतं पोतं कृत्वा गृहीतरसा इक्षुयष्टिरिव, निपतितपत्रपुष्पफला वृक्षावलीव, चेतनाशून्या तनूरिव भानुमती अभूत्। अव्वो! प्रत्यूषेऽपि सर्वतः गाढान्धकारः प्रसृतः। व्याधिवर्जितेऽपि तस्याः शरीरे कापि असहनीया अतुलवेदना उत्पतिता। ग्रथिलचित्ता इव चिन्तयति सा—"किं जागरूकाऽपि अहं प्रत्यक्षं स्वप्नं प्रेक्षे? किं प्रकटयोगप्राबल्याऽपि अहं मृता? "अम्मो"! किं मया एतादृशं महामूल्यं वस्तु हारितं, येन विना सर्वं विद्यमानमपि तथाविधं अविद्यमानमिव प्रतिभाति। हन्दि! केन प्रमुषितं मे हृदयशकलं, येन विना सकलमपि विस्मृतं जातम्। हरे! मात्रुत्सङ्ग-वञ्चितः स वराकः सिलिबः किं कुर्वाणो भवेत्? हन्त! हतविधिना स्तनन्धयो बालः कस्मात् मात्रा विरहितः कृतः? कीदृशी परिपालना तस्य भविष्यति परगृहस्थितस्य मन्दभाग्यस्य? एवं नानाविकल्पजालपरिकरिता माता कदापि मूर्च्छति, ग्लायति, म्लायति, अनवरतःप्रवहमाणबाष्पजलेन भूतलं पल्वलीकरोति च। विक्षिप्तचित्ता पुनः इतस्ततः परिभ्रमति! क्षणमात्रमपि न कुत्रापि सुखलवमनुभवति। श्रेष्ठिनोऽपि तादृशी स्थितिः संवृत्ता। परं कः शृणोति विधिदावदग्धानां पुत्कारम्?

१ उत्तानशयं-डिम्भम् २ उत्पन्ना ३ प्रकटयोगप्राबल्यापि ४ येन ५ प्रमुषितं-चोरितम् ६ विस्मृतम् ७ माऊआ-मात्रा ८ पल्वलीकरोति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विचित्तमवत्थं पत्तो जिणदत्तो संपइ किं कायव्वं' ति परामरिसइ[1] भज्जाए सद्धिं । दविण-विणिमयेण रक्खिओ पुत्तो परगिहम्मि' त्ति जणाववाय-भीरुओ कहं मुहं दरिसणिज्जं' ति लज्जिओ । अंतम्मि अविण्णाय-वइअरे[2] णायरजणे पच्छण्णयाए गिह-णयर-देस-परिचाओ कायव्वो, इअ उभयसम्मओ निच्छओ जाओ । उतत्थमणाए भाणुमईए सव्वं गिहभण्डं ववट्ठिअं कयं[3] । आवस्सयवत्थूणं एगा लहुवी पोट्टलिआ सज्जीकया । अणेगदिण-भक्खणारिहं सूं[4] खडिआइयं किमवि पाहेयं[5] पुण विणिम्मिअं । सव्वमिणं कज्जं मा परेहिं लक्खिज्जउ' त्ति बद्धकवाडं ताए अणुट्ठिअं । पुत्तविओग-विहुरो अईव पलंबो वि वासरो गिह-कज्ज-गुरुअयाए कहं कहमवि पुण्णत्तणं पत्तो । पगासपगरिस[6]-वंझा संझा संमुहीणा संपण्णा । पेरंत-कालिमाए लालिमाए थोव-कालिओ अहररागो[7] दंसिओ । पाउक्कय[8]-लद्धावसर-सिद्धं तं धंत[9] वित्थरिउं लग्गं । किं करणिज्जं अम्हेहिं'ति बिंदुआगारा तारा अणंतम्मि मंदमऊहेहिं[10] आलोएउं पउत्ता । माया इव संतिप्पया राइ'त्ति जाया झडिति मउलिअ[11]-झपंणिआ डिंभा । अण्णुण्ण-संदिट्ठाइं विउत्ताइं चक्कवायाणं जुम्माइं । सक्खं लद्धलक्खा संभूआ तक्कराणं मलिणा भावणा ! सव्वेवि सग्गिहत्था[12] सगिहत्था[13] जाया जायाहिं अणुणोयमाणमाणसा । एआरिसीए तमिस्साए अणुऊलो अवसरो पलायणस्स'त्ति मुणिऊण जिणदत्तेण एगा कयण्णू दक्खा

---

१ परामृशति २ अविज्ञातव्यतिकरे ३ व्यवस्थितम् ४ 'सूं खडी' देशीयशब्दः गुर्जरदेशप्रसिद्धः ५ पाथेयम् ६ प्रकाशप्रकर्षवन्ध्या ७ अधरागः ८ प्रादुष्कृत-लब्धावसरसिद्धान्तम् ९ ध्वान्तं-तिमिरम् १० मन्दमयूखैः ११ मुकुलित-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विचित्रामवस्थां प्राप्तो जिनदत्तः संप्रति किंकर्त्तव्यमिति परामृशति भार्यया सार्धम् । 'द्रविण-विनिमयेन रक्षितःपुत्रःपरगृहे' इति जनापवादभीरुकः कथं मुखं दर्शनीयमिति लज्जितः । अन्ते अविज्ञातव्यतिकरे नागरजने प्रच्छन्नतया गृह-नगर-देशपरित्यागः कर्त्तव्यः, इति उभय-सम्मतो निश्चयो जातः । उत्त्रस्तमनसा भानुमत्या सर्वगृहभाण्डं व्यवस्थितं कृतम् । आवश्यकवस्तूनामेका लघ्वी पोट्टलिका सज्जीकृता । अनेकदिनभक्षणार्हं 'सूंखड़ी' आदिकं किमपि पाथेयं पुनः विनिर्मितम् । सर्वमिदं कार्यं मा परैः लक्ष्यतामिति बद्धकपाटं तया अनुष्ठितम् । पुत्र-वियोगविधुरः अतीव प्रलम्बोऽपि वासरो गृहकार्यगुरुकतया कथंकथमपि पूर्णत्वं प्राप्तः । प्रकाश-प्रकर्षवन्ध्या सन्ध्या सम्मुखीना सम्पन्ना । पर्य्यन्तकालिम्ना लालिम्ना स्तोककालिकः अधररागो दर्शितः । प्रादुष्कृत-लब्धावसरसिद्धातं ध्वान्तं विस्तरितुं लग्नम् । किं करणीयमस्माभिरिति बिन्दुकाकाराः ताराः अनन्ते मन्दमयूखैः आलोकितुं प्रवृत्ताः । माता इव शान्तिप्रदा रात्रिरिति जाताः झटिति मुकुलितपक्ष्माणो डिम्भाः । अन्योन्यसन्दिग्धानि वियुक्तानि चक्रवाकाणां युग्मानि । साक्षात् लब्धलक्ष्या संभूता तस्कराणां मलिना भावना । सर्वेऽपि सद्गृहस्थाः स्वगृहस्थाः जाता जायाभिः अनुनीयमानमानसाः । 'एतादृश्यां तमिस्रायां अनुकूलोऽवसरः पलायनस्य' इति ज्ञात्वा जिनदत्तेन एका कृतज्ञा दक्षा पितामही-समाना

झम्पणिका :—निमीलितपक्ष्माण इत्यर्थः यथा—'झंपणीओ पम्हाइं (पाइयलच्छी ८४६) झांपण, इतिभाषा १२ सद्गृहस्थाः १३ स्व-गृहस्थाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पियामहीसमाणा वीसत्था समोसिआ[1] थेरी सणियं वाहित्ता[2]। साहिओ सव्वोवि जहातहं वुत्तंतो। परिचिआ कया सव्वेहिं अज्जंतकाल-कज्जेहिं। समप्पिओ सव्वओ णिअ-हम्मियस्स सुरक्खाभारो। दिण्णं पुण दारजंतुग्घाडणयं तालिआणं गुच्छगं। अंते णिवडिऊण ताए चलणेसुं गहिआ सोहद्दपुण्णा आसीसा। गहिऊण मत्थए पाहेय-पोट्टलियं भज्जा[3] विइज्जओ 'मा कोइ णे[4] पलोएउ'त्ति संकिओ सणिअं-सणिअं सरमाणो रयणवालं बालं मणंमि सरमाणो[5] गाढंधयारम्मि विलीणो।

किं किं कप्पेइ वराओ अप्पण्णू मणुओ, किंतु दिट्ठं किंपि अदिट्ठं घडेइ। विहि-पवण-पणुल्लिआणि अब्भाणि विव णट्ठाणि हवंति जंतूण आसा-विआणाणि। हा! दुरहिगमा भाविणी परिणई इह चम्मचक्खुधारिणा मच्चेण। पेच्छंतु पचक्खं जिणदत्तस्स विहि-पराहूइं। काए काए णहं[6]-विसालाए आसाए पुत्त-पत्थणा कया, तत्थ केरिसो अणअहिलसणिज्जो समयो आवडिओ। जस्स पुरओ अणेगे भिच्चा पंजलिउडा ठिआ 'को आएसो'त्ति वयणं पुप्फीकुणमाणा आसी, सो अहुणा अलक्खिओ मत्थयत्थ-पोट्टलिओ संगोविअणियत्थित्तो सहि-सहोअर-सहाय-वज्जिओ पुत्तवियोग-संखुद्दो गेहणीए सद्धिं वाहणं[7]-वेलविओ एगागी वच्चइ। कहं कहंपि तीरिआओ[10] तेहिं णयरवीहीओ पच्छण्णयाए। णायरप्पओली जया एहिं पिट्ठओ कया, तया णं काई अणाचिक्खणिज्जा

---

१ प्रातिवेश्मिकी २ व्याहृता ३ भार्याद्वितीयकः ४ अस्माद् ५ पश्यतु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विश्वस्ता समोषिता (प्रातिवेश्मिकी) स्थविरा शनैः व्याहृता। कथितः सर्वोऽपि यथातथं वृत्तान्तः। परिचिता कृता सर्वैः आयतिकार्यैः। समर्पितः सर्वतः निजहर्म्यस्य सुरक्षाभारः। दत्तं पुनः द्वारयन्त्रोद्घाटनकं तालिकानां गुच्छकम्। अन्ते निपत्य तस्याः चलनयोः गृहीता सौहार्दपूर्णा आशीः। गृहीत्वा मस्तके पाथेय-पोट्टलिकां भार्याद्वितीयकः 'मा कोऽपि नौ प्रलोकयतु' इति शङ्कितः शनैः शनैः सरन् रत्नपालं बालं मनसि स्मरन् गाढान्धकारे विलीनः।

किं किं कल्पते वराकः अल्पज्ञो मनुजः, किन्तु दिष्टं किमपि अदृष्टं घटयति। विधिपवनप्रेरितानि अभ्राणि इव नष्टानि भवन्ति जन्तूनां आशावितानानि। हा! दुरधिगमा भाविनी परिणतिः इह चर्मचक्षुर्धारिणा मर्त्येन। प्रेक्षन्तां प्रत्यक्षं जिनदत्तस्य विधि-पराभूतिम्। कया कया नभोविशालया आशया पुत्र-प्रार्थनाकृता, तत्र कीदृशः अनभिलषणीयः समयः आपतितः। यस्य पुरतः अनेके भृत्याः प्राञ्जलिपुटाः स्थिताः 'कः आदेशः' इति वचनं पुष्पीकुर्वाणाः आसन्, स अधुना अलक्षितः मस्तकस्थपोट्टलिकः संगोपित-निजास्तित्वः सखि-सहोदर-सहाय-वर्जितः पुत्र-वियोगसंक्षुब्धः गृहिण्या सार्धं वाहन-वञ्चितः एकाकी व्रजति। कथं कथमपि तीरिताः ताभ्यां नगरवीथयः प्रच्छन्नतया। नगरप्रतोली यदा आभ्यां पृष्ठतः कृता, तदा 'णं' कापि

६ स्मरन् ७ विधि-पवन-प्रेरितानि ८ नभोविशालया ९ वञ्चितः १० तीरिता।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मणे लज्जा पारंचिआ[1]। ति-चउर-गाउप्पमाणं पहं पत्ताण-मेसि मत्तंडउदयो जाओ। "थक्कियासि[2] कोमलंगी! किमु पलंबमद्धाणं वच्चमाणी? थक्कामो[3] किं वीसमण-णिमित्तं कत्थइ?" मुहुं मुहुं परिपुच्छइ जिणदत्तो रयणवाल-मायरं।

"णूणं अज्जउत्ताणं मुहपंकजं जूरिअं[4] दीसइ, ता तुम्हे महंतं पहखेअं अणुहवेज्ज'त्ति मए अणुहूअं" पच्चुत्तरिअं विणयवाहिणीए वायाए भाणुमईआ।

पिये! णाहं किंचि वि णिगम-गमणखेअं वहामि किंतु··· ···विरमिओ अग्गओ वोत्तुं सेट्ठी।

किं किं खेअ-कारणं, कहं 'किंतु' वज्जरिऊण विरमिओ अग्गओ वाया-विण्णासो? किं सइं गओ जीवणाहारो पिओ पुत्तो?" पुट्ठं बाहं लुंछमाणीए पत्तीए। चुक्किआसि[5] रयणमाय! पुच्छेंती तुमं। कया सो विम्हरिओ ता संपइ सइं गओ? बाहजलाउललोयणेण पइणा एगो दीह-णीसासो मुक्को। इत्थं दंपइणो परुप्परं पुत्त-विरहेण णिव्वरंता[6], पइसं गहं पियं पुत्तं संभरेंता-पहच्छेअं कुणिरे।

मग्गम्मि समागया एगा सरसी। मणोहरं विजणं ठाणं पप्प जंपइणो तत्थ वीसंता जाया। अणुचिट्ठिअं तेहिं सयलं पाहाइअं किच्चं। पारिअं सम्मं णमुक्कारसहिअं[7]। गहिओ किंचि पायरासो[8]। मज्झ-सव्वरीए पयट्टआ[9] एए संता परितंता इहइं णिव्विऊण[10] किंचि आसत्था हूआ। मा

---

१ पारं नीता २ श्रान्तासि ३ तिष्ठामः ४ खिन्नम्, यथा—जूरिअं, उत्तम्मिअं, नडिअं, (पाइयलच्छी ५७५) ५ स्खलितासि ६ दुःखं निवेदयन्तः दुःखे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकथनीया मन्ये लज्जा पारं नीता । त्रिचतुर्गव्यूतिप्रमाणं पन्थानं प्राप्तयोः एतयोः मार्तण्डोदयो जातः । "श्रान्तासि कोमलाङ्गि ! किमु प्रलम्बं अध्वानं व्रजन्ती ? तिष्ठामः किं विश्रमण-निमित्तं कुत्रापि ? मुहुर्मुहुः परिपृच्छति जिनदत्तो रत्नपालमातरम् ।

"नूनं आर्यपुत्राणां मुखपङ्कजं खिन्नं दृश्यते, तस्मात् यूयं महान्तं पथखेदं अनुभवथ, इति मया अनुभूतम्" प्रत्युत्तरितं विनयवाहिन्या वाचा भानुमत्या ।

"प्रिये ! नाहं किञ्चिदपि निगम-गमन-खेदं वहामि, किन्तु....." विरमितः अग्रतः वक्तुं श्रेष्ठी ।

"किं किं खेदकारणं, कथं 'किन्तु' व्याहृत्य विरमितः अग्रतो वाग्-विन्यासः ? किं स्मृतिगतः जीवनाधारः प्रियः पुत्रः ?" पृष्टं वाष्पं मृजन्त्या पत्न्या ।

"स्खलितासि रत्नमातः ! पृच्छन्ती त्वम् । कदा स विस्मृतः तस्मात् संप्रति स्मृतिं गतः ? वाष्पजलाकुललोचनेन पत्या एको दीर्घ-निःश्वासो मुक्तः । इत्थं दम्पती परस्परं पुत्रविरहेण दुःखं प्रकटयन्तौ प्रतिसंकथं प्रियं पुत्रं स्मरन्तौ पथच्छेदं कुर्वाते ।

मार्गे समागता एका सरसी । मनोहरं विजनं स्थानं प्राप्य जम्पती तत्र विश्रान्तौ जातौ । अनुष्ठितं ताभ्यां सकलं प्राभातिकं कृत्यम् । पारितं सम्यक् नमस्कार-सहितम् । गृहीतः किञ्चित् प्रातराशः । मध्यशर्वर्यां चलितौ एतौ श्रान्तौ परितान्तौ इह विश्राम्य किञ्चित् आश्वस्तौ भूतौ । 'मा पृष्ठतः केऽपि श्रेष्ठिनं

णिव्वरः (हेम० ४-३) ७ नोकारसी ८ प्रातराशः 'जलपान-सिरावण' इतिभाषा ९ पयट्टआ-चलिआ १० विश्राम्य, विश्रमेणिव्वा० ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मग्गओ[1] केइ सेट्ठिं मग्गमाणा[2] मग्गआ[3] आगच्छिअ गमण-विक्खेवं कुणिज्ज'त्ति पुणरवि अग्गओ चलिओ सेट्ठी। दइयं पडिअग्गेमाणी[4] भज्जा चलणाणब्भत्थचलणा[5] खलेइ उच्चावयम्मि पहम्मि। कयाइ तिक्ख-पाहाण-खंडेण अप्फलिआ[6] अग्गगामिं पइं सखेअं सद्देइ। चलिअं रुहिरधारं तज्जुग्गुवाएण साहरइ[7] ससाहसं सेट्ठी। मज्झ-दिणयरस्स तावेण संतत्ता एग्गस्स सण्णिवेसस्स मज्झयारम्मि[8] गया एए। कस्सइ धवलमंदिरस्स बहित्ता सच्छायं सुघडं वेइयं[9] विलोइअ मज्झण्णिअं वेलं अइवाहेउं मत्थयगयं पोट्टलिअं रक्खिऊण एगओ ठिआ। अग्गे कत्थ वच्चणिज्जं, किं करणिज्जं'ति वीमंसणपरा संलविउं लग्गा।

तक्कालं चिअ वायायणेण[10] एगाए वामलोअणाए णिअ-मंदिर-वेइआए केई अणुवलक्खिआ अद्धणीणा आलवमाणा ठिय'त्ति णिहालिआ। एक्कसरिअं[11] सा तहिं[12] समागया। णयणेहिं असिणेहं दरिसमाणी वज्जकक्कसाए गिराए वज्जरिउं पउत्ता—"कहं भो! ठिआ एत्थ अपच्चभिण्णाया[13] अवि अम्हकेर-मंदिर-वेइआए? अणुवलक्खिआणं ण वयं ठाणं दाउं समत्था; तम्हा वच्चंतु, सिग्घं वच्चंतु भो! केसिंचि तुम्ह उवलक्खिआणं गेहम्मि।"

"पहिआ[14] अम्हे मज्झण्ह-कालम्मि वीसमणट्ठं ठाणं पेक्खिअ किंचि- कालं ठिआ। भइणि! मणुओ मणुअस्स आसयं पत्थइ। वच्चिस्सामो अम्हे अवरण्हकाले अग्गओ

---

१ पृष्टतः २ गवेषयन्तः ३ मार्गकाः 'मांगने वाले' इतिभाषा ४ अनुव्रजन्ती ५ चलनाऽभ्यस्तचलना ६ आस्फालिताः ७ संवृणोति 'संवृणेः साहरसाहट्टौ'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मार्गयन्तः मार्गकाः आगत्य गमनविक्षेपं कुर्युः' इति पुनरपि अग्रतः चलितः श्रेष्ठी। दयितं अनुव्रजन्ती भार्या चलनानभ्यस्तचलना स्खलति उच्चावचे पथि। कदापि तीक्ष्ण-पाषाण-खण्डेन आस्फालिता अग्रगामिनं पतिं सखेदं शब्दयति। चलितां रुधिरधारां तदयोग्योपायेन संवृणोति ससाहसं श्रेष्ठी। मध्यदिनकरस्य तापेन संतप्तौ एकस्य सन्निवेशस्य मध्ये गतौ एतौ। कस्यापि धवलमन्दिरस्य बहिस्तात् सच्छायां सुघटां वेदिकां विलोक्य माध्याह्निकीं वेलां अतिवाहयितुं मस्तकगतां पोट्टलिकां रक्षयित्वा एकतः स्थितौ। 'अग्रे कुत्र व्रजनीयं, किं करणीयं' इति विमर्शनपरौ संलपितुं लग्नौ।

तत्कालमेव वातायनेन एकया वामलोचनया निजमन्दिर-वेदिकायां केऽपि अनुपलक्षिता अध्वनीना आलपन्तः स्थिताः इति निभालिताः। एक्कसरिअं (झगिति) सा तत्र समागता। नयनाभ्यां अस्नेहं दर्शयन्ती-वज्रकर्कशया गिरा कथयितुं प्रवृत्ता—'कथं भोः स्थिताः अत्र अप्रत्यभिज्ञाताः अपि अस्मदीय-मन्दिर-वेदिकायाम् ? अनुपलक्षितेभ्यो न वयं स्थानं दातुं समर्थाः। तस्माद् व्रजन्तु, शीघ्रं व्रजन्तु भोः ! केषाञ्चिद् युष्माकं उपलक्षितानां गृहे।'

"पथिका वयं मध्याह्नकाले विश्रमणार्थं स्थानं प्रेक्ष्य किञ्चित्कालं स्थिताः। भगिनि ! मनुजः मनुजस्य आश्रयं प्रार्थयति। व्रजिष्यामो

(हे० ४-८३) ८ मध्ये (देशीयः शब्दः) ९ वेदिकां 'चबूतरा' इतिभाषा १० वातायनेन ११ झगिति १२ तर्हि-तत्र १३ अप्रत्यभिज्ञाताः १४ पथिकाः 'पथो णस्येकट्' (हे०२-१५२) इतिपहिओ-पान्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सयमेव । संपइ किवाए मणं उरालं किच्चा ण उट्ठाविअव्वा अम्हे" णिवेइअं सब्भावणाए सेट्ठिणा ।

"अलाहि मणुअत्तणोवएसेण ? भमंति अणेगे पस्सओहरा[1] महुरं जंपेमाणा वेस-परिवट्टणेण लोअं पम्हुसंता[2] । ता पस्संतु अवरं ठाणं ? ण एत्थ खणमवि चिट्ठिअव्वं तुब्भेहिं" सगरिहं फुडं पडिसिद्धं ताए ।

एवं गिहसामिणीए अवमाणिआ एए झत्ति पोट्टगं गहिअ अग्गओ सरिआ[3] । हंत ! को पडिपुच्छेइ दरिद्द-मुद्दिअ-भाग-हेयाणं सुहं दुहं ? आवयाए णिआ अवि पारक्केरा, ता अपरिचिआणं तु का कहा ? णूणं ईइसो एस संसारो । एत्थ अब्भच्छाहिव्व सव्वावि चंचला लीला । गाढसिणेहे वि इह अपीईए उग्गमो । दिव्वुज्जोए वि[4] अस्सि अंतरहिआ तमिस्सरेहा । महुरालावम्मि वि एत्थ कडुत्तिप्पसंगो । धी धी ! तहवि कहं संसारीणं णाणलोयणा मुद्दिआ ? परा-हवंति पइपयं सज्जुक्का[5] तारिच्छा अणुहवा, तहवि ण कहं परिप्फुरेइ अंतरंगं वेरग्गं ? हरे ! गाढमावरणमण्णाणस्स । पच्चक्खमवि ण कहं घेप्पइ[6] मोहधिट्ठाए मईए ।

भाणुमइं संमुहीकुणमाणेण सेट्ठिणा साहिअं–"भज्जे ! अणणुकूला अहा[7] अम्हेच्चया संपइ । तम्हा एआरिसा पुव्वं अणणुहूआ पसंगा आवडंति । तहावि णाइं विमणदुम्मेणेहिं होइअव्वं अम्हेहिं । एत्थ हु परिक्खा णे चिरपालिअस्स धम्मस्स । अओ उड्ढं अम्हे ण कस्सइ सरणं[8] वच्चिहामो"।

---

१ पश्यतोहराः २ प्रमुषन्तः—चोरयन्तः ३ चलिताः ४ अन्तर्हिता—छन्ना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वयं अपराह्णकाले अग्रतः स्वमेव, संप्रति कृपया मनः उदारं कृत्वा न उत्थापनीया वयम्" निवेदितं सद्भावनया श्रेष्ठिना ।

"अलं मनुजत्वोपदेशेन । भ्रमन्ति अनेके पश्यतोहराः मधुरं जल्पन्तो वेश-परिवर्तनेन लोकं प्रमुष्णन्तः । तस्मात् पश्यन्तु अपरं स्थानम् । न अत्र क्षणमपि स्थातव्यं युष्माभिः" सगर्हं स्फुटं प्रतिषिद्धं तया ।

एवं गृहस्वामिन्या अपमानितौ एतौ झटिति पोट्टकं गृहीत्वा अग्रतः सृतौ ! हन्त । कः प्रतिपृच्छति दारिद्र्य-मुद्रित-भागधेयानां सुखं दुःखम् । आपदि निजाः अपि परकीयाः; तदानीं अपरिचितानां तु का कथा ? नूनं ईदृश एष संसारः । अत्र अभ्रच्छाया इव सर्वापि चञ्चला लीला । गाढस्नेहेऽपि इह अप्रीतेः उद्गमः । दिव्योद्योतेऽपि अस्मिन् अन्तर्हिता तमिस्ररेखा । मधुरालापेऽपि अत्र कटूक्तिप्रसंगः । धिग् धिग् ! तथापि कथं संसारिणां ज्ञानलोचनानि मुद्रितानि । पराभवन्ति प्रतिपदं सद्यस्काः[५] तादृक्षाः अनुभवास्तथापि न कथं परिस्फुरति अन्तरङ्गं वैराग्यम् । अरे ! गाढं आवरणं अज्ञानस्य । प्रत्यक्षमपि न कथं गह्यते[६] मोहधृष्ट्या मत्या ।

भानुमतींसम्मुखी कुर्वता श्रेष्ठिना कथितम्—"भार्ये ! अननुकूलानि अहानि[७] आस्माकानि सम्प्रति । तस्मात् एतादृशाः पूर्वं अननुभूताः प्रसङ्गा आपतन्ति । तथापि न विमनोदुर्मनोभ्यां भवितव्यं आवाभ्याम् । अत्र 'हु' परीक्षा आवयोः चिरपालितस्य धर्मस्य । अतः ऊर्ध्वं आवां न कस्यापि शरणं व्रजिष्यावः[८] । यत्र कुत्रापि स्वाधीनं

५ सद्यस्काः ६ गृह्यते ७ दिनानि ८ आश्रयम् ९ व्रजिष्यामः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जत्थ कत्थइ साहीणं जीवणं जवेहामो ! पलाइअं रित्थं[1] ण दुक्ख-मिणं, परं मा गच्छउ अप्पणिअं[2] धणं साहिमाणं । किं तेण ताडिअ-सिरेण साण-जीवणेण जत्थ णत्थि णाममेत्तमवि मणुअ—गुण-मुल्लंकणं ।" अज्जउत्ता पमाणं'ति कहमाणीए भाणुमईए मोणमालंबिअं ।

सरपालिगय-वडरुक्खस्स हेट्ठ'[3] अइवाहिओ णेहिं मज्झं-दिण-तत्ति[4]-समयो । अवरण्हम्मि पुणो पट्ठिआ एए दक्खिणाए दिसीए । बोलीणाए महुत्तमेत्ताए रयणीए लद्धो दंपईहिं सुरक्खिओ एगो वणणिउंजो । तत्थ गहिआ णेहिं पह-विस्संती । वण-फलेहिं कया उअरपुत्ती । पत्थरिआ कयली-दलाण सेज्जा । कयं सयणं तहिं । परंतु णागच्छइ पुत्त-विरह-विद्दुआ णिद्दा । जाउ अच्छिणिमीलणं लहंता वि पच्चक्खं पुत्तं पेक्खेंता कहेंति—"पुत्त ! मा रुअसु, जणणी-उच्छंग-सुह-वंचिओ तुमं । आसासमीविओ[5] ण सोवि समयो दविट्ठो जत्थ अम्हाणं चिरं विरमालिओ[6] मेलो संभावी । दुव्विहोऽयं कालो वेलाविवागेण बुब्बुअ-विलायं विलीणो होहिइ । सयं णट्ठा भविस्संति सव्वेवि पडिवक्खा संजोगा" एवं कहेंता कप्पंता जाव जागरूआ हवंति ताव पुत्तमसक्खं करेंता सव्वमिणं सिविणरूवं'ति मण्णंता विहिं पच्चारेंति[7] । एवं पासाइं परिवट्टमाणेहिं एएहिं जहा कहंचि रयणी उवप्प-हायं णीआ । पच्चहिअं[8] पच्चूसकालिअं आवस्सयं सामाइ-आइ-किच्चं सद्धाए भत्तीए अणुचिट्ठिअं दंपईहिं । आवया-

---

१ धनम् २ आत्मीयम् ३ अधः 'अधसो हेट्ठं' (हेम० २-१४१) ४ मध्यन्दिन-तप्तिसमयः ५ आशासमीपितः ६ प्रतीक्षितः । यथा—विरमालिअं विहीरिअं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जीवनं यापयिष्यावः। पलायितं रिक्थं न दुःखमिदं, परं मा गच्छतु आत्मीयं धनं स्वाभिमानम्। किं तेन तडितशिरसा श्वान-जीवनेन यत्र नास्ति नाममात्रमपि मनुज-गुण-मूल्याङ्कनम्" । 'आर्यपुत्राः प्रमाणं' इति कथयन्त्या भानुमत्या मौनमालम्बितम्।

सरः पालिगत-वटवृक्षस्य अधः अतिवाहितः आभ्यां मध्यन्दिन-तप्तिसमयः । अपराह्णे पुनः प्रस्थितौ एतौ दक्षिणस्यां दिशि। व्यतीतायां मुहूर्तमात्रायां रजन्यां लब्धः दम्पतीभ्यां सुरक्षितः एकः वन-निकुञ्जः। तत्र गृहीता आभ्यां पथविश्रान्तिः। वनफलैः कृता उदरपूर्तिः। प्रस्तृता कदली-दलानां शय्या। कृतं शयनं तत्र। परन्तु नागच्छति पुत्र-विरह-विद्रुता निद्रा। जातु अक्षिनिमीलनं लभमानौ अपि प्रत्यक्षं पुत्रं प्रेक्षमाणौ कथयतः—"पुत्र! मा रोदिहि जनन्युत्सङ्ग-सुख-वञ्चितः त्वम्। आशा-समीपितः न सोऽपि समयो दविष्ठः यत्र अस्माकं चिरप्रतीक्षितो मेलः सम्भावी। दुर्विधोऽयं कालः वेलावि-पाकेन बुद्बुद्-विलायं विलीनो भविष्यति। स्वयं नष्टाः भविष्यन्ति सर्वेऽपि प्रतिपक्षाः संयोगाः" एवं कथयन्तौ कल्पयन्तौ यावत् जागरूकौ भवतः तावत् पुत्रं असाक्षात् कुर्वन्तौ सर्वमिदं स्वप्नरूपमिति मन्वानौ विधिं उपालभेते। एवं पार्श्वे परिवर्तमानाभ्यां आभ्यां यथा कथञ्चिद् रजनी उपप्रभातं नीता। प्रात्यहिकं प्रत्यूष-कालिकं आवश्यकं सामयि-कादि-कृत्यं श्रद्धया भक्त्या अनुष्ठितं दम्पतीभ्याम्। आपत्-कालेऽपि

(पाइयलच्छी-५७०) ७ उपालभन्ते 'उपालभ्भेर्झह्व-पच्चारवेलवाः (हे० ४-१४६)
८ उपप्रभातम् ९ प्रात्यहिकम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालम्मि वि ण धम्मकज्जं विम्हरिअव्वं'ति सप्पुरिसाणं लक्खणं, अहवा अग्गिपरिक्खुत्तिण्णं सुवण्णं किं ण हवइ देदिप्पमाणं ?

उइअम्मि दिणयरे तओ चलिआ एए अग्गओ। एवं पडिदिअहं अविच्छिण्ण–पयाणेहिं लंबं वत्तणिं[1] अइक्कममाणा नाणाविहाणि कट्ठाणि खमेमाणा विविह-भीसण-वणाडवि-पव्वयाखाय-सरिआइअं कहं कहमवि उल्लंघेमाणा पुत्त-विसयम्मि बहु विकप्पेमाणा य अंतम्मि दक्खिणापह-तिलय-भूअं णाणाविह–वाणिज्ज-लद्ध-पइट्ठं रम्मं दंसणिज्जं वसंत-पुरं णामं णयरं पत्ता। कत्थ गंतव्वं, किं अणुचिट्ठिअव्वं, कहं पाणवित्ती कायव्वा य सम्मं परिचिंतिअं वीमंसिअं एएहिं। ण परस्सयीहूअं जीवणं जीविअव्वं'ति पुव्वणिच्छयाणुसारेण ण णयरम्मि गया इमे। किंतु पुरस्स बाहिं सुरम्मथलम्मि एगं उडजं[2] णिम्माय मट्टिआ-गोमयेण लिंपिअ सव्वं ववत्थिअं काऊण सुहं तत्थ णिवसिआ दंपइणो। आजीविआ-णिमित्तं सेट्ठिणा आणिओ मोल्लेण एगो कुढारो। अडविऊण अडवि आणेइ कट्ठभारिअं, विक्किणेइ य णयरमज्झयारम्मि। ताए जं पत्तं हवइ तेण समयण्णू भाणुमई आयाणुरूवं ववंती संतुट्ठं गाहत्थं संचालेइ। देसंतरम्मि केणइ अणुवलक्खिआ एए तारिसेण साहारणेण कम्मुणा वि अविलिआ[3] वेलं अइ-वाहयंति।

जाला[4] आयण्णिअं मम्मणेण जं जिणदत्तो भज्जा बिइओ केणावि अलक्खिओ जणरवेण लज्जिओ तुण्हिक्को

---

१ वर्त्तनी-मार्ग, यथा—मग्गो पंथो सरणी, अध्दाणं वत्तिणी पहो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न धर्मकार्यं विस्मर्तव्यम्' इति सत्पुरुषाणां लक्षणम्। अथवा अग्नि-परीक्षोत्तीर्णं सुवर्णं किं न भवति देदीप्यमानम्?

उदिते दिनकरे ततः चलितौ एतौ अग्रतः। एवं प्रतिदिवसं अविच्छिन्न-प्रयाणैः लम्बां वर्त्तनीं अतिक्रामन्तौ नानाविधानि कष्टानि क्षममाणौ विविध-भीषण-वनाटवि-पर्वताखात-सरिदादिकं कथंकथमपि उल्लङ्घयन्तौ पुत्रविषये बहुविकल्पयन्तौ च अन्ते दक्षिणापथ-तिलक-भूतं नानाविध-वाणिज्य-लब्धप्रतिष्ठं रम्यं दर्शनीयं वसन्तपुरं नाम नगरं प्राप्तौ। कुत्र गन्तव्यं, किं अनुष्ठातव्यं, कथं प्राणवृत्तिः कर्त्तव्या च सम्यक् परिचिन्तितं विमृष्टं एताभ्याम्। 'न पराश्रयीभूतं जीवनं जीवितव्यं' इति पूर्वनिश्चयानुसारेण न नगरे गतौ इमौ। किन्तु पुरस्य बहिः सुरम्यस्थले एकं उटजं निर्माय मृत्तिका-गोमयेन लिम्पयित्वा सर्वं व्यवस्थितं कृत्वा सुखं तत्र न्युषितौ दम्पती। आजीविका-निमित्तं श्रेष्ठिना आनीतो मूल्येन एकः कुठारः। अटयित्वा अटवीं आनयति काष्ट-भारिकां, विक्रीणाति च नगरमध्ये। तया यत् प्राप्तं भवति तेन समयज्ञा भानुमती आयानुरूपं व्ययमाना सन्तुष्टं गार्हस्थ्यं सञ्चालयति। देशान्तरे केनाऽपि अनुपलक्षितौ एतौ तादृशेन साधारणेन कर्मणाऽपि अव्रीडितौ वेलां अतिवाहयतः।

यदा आकर्णितं मन्मनेन यद् जिनदत्तो भार्याद्वितीयः केनापि अलक्षितो जन-रवेण लज्जितः दुर्विधिना तर्जितः तूष्णीकः निशीथिन्यां

पयवी (पाइयलच्छी० ८३)। २ उटजम्—'कुटिया' इतिभाषा। ३ अव्रीडिताः ४ यदा।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निसीहिणीए[1] सत्तरं पलाणो[2]'त्ति'। ताला किविणस्स मणो पमोअ-मेउरो जाओ। अहह ! सुहं मे अइ सुहं ! अणायासं महं[3] मणोभावणा फलवई हवीअ[4]। दायव्व-दविण-वुड्ढी-भार-विखुध्दो अहमण्णो ण कयाइ पच्चावलिहिइ एत्थ वराओ जिणदत्तो। आगास[5]-कुसुमाइआ इमिआ कप्पणा जमेसो पच्चावलिओ संतो सकुसीअयं[6] दव्वं उत्तमण्णाणं पच्छाकरिस्सइ, तहेव पुत्तं पुण णेहिइ सो णिअं गेहं 'ति तओ णीसंदेहं भूओ मे गिहप्पईवो रयणवालो बालो। दइव-किवाए कहमवि अपूरणिज्जा खई पुण्णा। दुब्भरं अखायं विहिणा समतलं भूअं। नूणं उप्पण्णो मे महाकट्ठ-संचिआए विभूईए भविस्संतो सामी। एवं कप्पणा-महुरं भविस्सं चिंतेंतो णिग्घिणो वि मम्मणो करेइ अणेग-जयणाइं डिंभट्ठं। हणिहणि[7] वड्ढमाणो अंकाओ अंकं साहरिज्जमाणो छावो अईव पिओ पडिभासेइ। आणिआणि अणेगाणि कीलणयाणि पोअ-मण-परितुट्ठिकारयाणि। आगरिसण-कारगेहिं वत्थेहिं चिंचिल्लिओ,[8] लहू-सोवण्णिअ-वलएहिं हत्थेसुं समलंकिओ, मोत्तिअ-मालाए कंठम्मि मंडिओ, महग्घेहिं ताडंकेहिं कण्णेसुं पसाहिओ य एसो। मा णं नयण-दोसो होउ 'त्ति कज्जल-बिंदूहिं णिडालम्मि बाहु-जुअलम्मि य सामलिओ[9]। किं बहुणा, ण णाममेत्ता वि तुडी विज्जइ अस्स परिवालणम्मि।

इअ सिरिचंदणमुणि-विरइआए पुत्तजम्म-देसचाअ-
वसंतपुरागमणाइभावसंजुत्ताए रयणवाल-
कहाए बीओ ऊसासो समत्तो ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सत्वरं पलायितः इति। तदा कृपणस्य मनः प्रमोद-मेदुरं जातम्। अहह! शुभं मे अति शुभम्! अनायासं मम मनोभावना फलवती अभूत्। दातव्य-द्रविण-वृद्धिभार-विक्षुब्धः अधमर्णो न कदापि प्रत्याव लिष्यते अत्र वराको जिनदत्तः। आकाश-कुसुमायिता इयं कल्पना यत् एष प्रत्यावलितः सन् सकुसीदकं द्रव्यं उत्तमर्णेभ्यः पश्चात् करिष्यति, तथैव पुत्रं पुनः नेष्यति स निजं गृहम् इति। ततः निस्सन्देहं भूतो मे गृहप्रदीपः रत्नपालो बालः। दैवकृपया कथमपि अपूरणीया क्षतिः पूर्णा। दुर्भरं अखातं विधिना समतलं भूतम्। नूनं उत्पन्नो मे महाकष्टसञ्चितायाः विभूत्याः भविष्यन् स्वामी। एवं कल्पना-मधुरं भविष्यं चिन्तयन् निर्घृणोऽपि मन्मनः करोति अनेकयत्नान् डिम्भार्थम्। अहन्यहनि वर्धमानः अङ्कात् अङ्कं संह्रियमाणः शावोऽतीव प्रियः प्रतिभासते। आनीतानि अनेकानि क्रीडनकानि पोतमनः-परितुष्टि कारकाणि। आकर्षण-कारकैः वस्त्रैः विभूषितः, लघुसौवर्णिक— वलयाभ्यां हस्तयोः समलंकृतः, मौक्तिकमालया कण्ठे मण्डितः, महा-र्घ्याभ्यां ताडङ्काभ्यां कर्णयोः प्रसाधितः एषः। मा 'णं' नयनदोषो भवतु इति कज्जल-बिन्दुभिः ललाटे बाहुयुगले च श्यामलितः। किं बहुना, न नाममात्राऽपि त्रुटिः विद्यते अस्य परिपालने।

इति श्रीचन्दनमुनिविरचितायां पुत्र-जन्म-देशत्याग—
वसन्तपुरागमनादिभावसंयुक्तायां रत्नपाल-
कथायां द्वितीयः उच्छ्वासः समाप्तः

---

१ निशिथिन्याम-रात्रौ २ पलायितः ३ मम ४ अभूत् ५ आकाश-कुसुमायिता ६ सकुसीदकम् ७ अहन्यहनि ८ विभूषितः ९ श्यामलितः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३

अह तइओ ऊसासो

समत्थ[1]-जीवलोअ-तत्तिणिवारगो, णाणाविह-तरु-लया-पुप्फ-फल-गुम्म-विचित्त-तणोसहि-उप्पायगो, णिज्जल-पएसेग-जीवणाहारो, हालिएहिं अणिमिस-दिट्ठीए दिट्ठिआ[2] चिरं विहीरिओ[3] उब्भूओ पाउसिओ कालो। रोलंब-गवल-कालिआवि णयणाहिरामा, उट्ठाविअ-धूलि उक्केरा वि णीरया, कयंधयारा वि उज्जोइअ-माणसा, चंचल-पयासावि लक्खिअ[4]-अज्जंतुज्जलपयासा, कण्णजाह-भेग्रं थणंती वि अईव कण्णप्पिआ, पाईण-पवण-पेरिआ वि सज्जुक्का, उट्ठिआ ग्रंबरम्मि कायंबिणी[5]। अज्जेव इयाणिमेव सव्वेसिं संतुट्ठिं करेमि'त्ति वरिसिउं पउत्ता धारासारेण सा। जलजलाइग्रं जायं सव्वओ सगयणं भूअलं। ण अम्हाणं संगहो रोअए इईव

---

१ समस्तजीवलोकतप्तिनिवारकः २ दृष्ट्या-सम्मदेनेत्यर्थः ३ प्रतीक्षितः-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३

अथ तृतीयः उच्छ्वासः

समस्त-जीवलोक-तप्ति-निवारकः नानाविध-तरु-लता-पुष्प-फल-गुल्म-विचित्र-तृणौषध्युत्पादकः, निर्जलप्रदेशैकजीवनाधारः हालिकैर-निमिषदृष्टया दिष्टया चिरं प्रतीक्षितः उद्भूतः प्रावृषिकः कालः। रोलम्ब-गवल-कलिकाऽपि नयनाभिरामा, उत्थापितधूल्युत्करोऽपि नीरजाः, कृतान्धकारापि उद्योतित-मानसा, चञ्चलप्रकाशापि लक्षिता-ऽऽयत्युज्ज्वल-प्रकाशा, कर्णजाहभेदं स्तनन्ती अपि अतीव कर्णप्रिया, प्राचीन-पवन-प्रेरिताऽपि सद्यस्का, उत्थिता अम्बरे कादम्बिनी। 'अद्यैव इदानीमेव सर्वेषां सन्तुष्टिं करोमि' इति वर्षितुं प्रवृत्ता धारासारेण सा। जलजलायितं जातं सर्वतः सगगनं भूतलम्। न अस्मभ्यं संग्रहो रोचते इतीव मूसलधारं मन्ये पतितुं लग्नाः प्रणालाः।

---

४ लक्षित-भविष्यदुज्ज्वल-प्रकाशा ५ कादम्बिनी-मेघमाला।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूसलधारं मणे पडिउं लग्गा पाणाला। अणंग-णईरूव-मुररीकयं णयरवीहीहिं। उण्णीरा संभूआ खणेण तलि-मणीरा अवडा[1]। उप्पवाहा[2] जाया जलरासिं धारेउमक्खमा तुच्छा तडागा। पडिपुण्णाओ णिण्णगाओ विअड-तडाओ संजायाओ। णट्ठं तत्तीए णामहेयं। कण्णं गओ सव्वेसिं सव्वओ समयमहुरो ददुराण रावो। विणिद्दा जाया चिर-मुच्छिआ जीवणधणं पप्प वणराई। कया किसि-कारगेहिं किसि-उवगरणेहिं सद्धिं बलद्द-पूआ! लक्खिअ-णक्खत्तबला गहिअ-सुह-सउणा केआराहिमुहं[3] णिग्गया एए बीअ-ववणट्ठं। अहो! सव्वंगिअं सुंदेरं पत्थरिअं समंतओ।

इओ सुविहिअ पच्चूस कालिअ-धम्म-कज्जो जिणदत्तो खंधारोविअ-कुढारो चलिओ कट्ठहारगेहिं सद्धिं कट्ठभारं णेउं वणाहिमुहं, परंतु सुदुल्लहा जाया सुक्क-कट्ठ-संपत्ती तारिसे पाउस-कालम्मि। जत्थ पस्सइ तत्थेव परिहरिअ[4]-हरिअ-कुप्पासा छज्जए[5] पुढवी। सुक्का कुडिल्ला[6] वि लद्धाऽहिणव-कुंचला-ओवासए[7] रुक्खाणं ओली। कुड्ड[8]! णत्थि ओआसो किर सुक्काणं रुक्खाणं। अत्थि णियमो जिणदत्तस्स हरिअ-रुक्खे छेउं गहिअ-दुआलस-सावग-वयेसु। बहुगविट्ठमवि ण पत्तं सुक्कं कट्ठं कत्थइ एएण। संपइ किं कायव्वं'ति चिंतापरो संवुत्तो सो। रक्खिए वयम्मि ण सुरक्खिआ चिट्ठइ आजीविआ। अण्णेहिं कट्ठहारेगेहिं विसयं[9] वज्जरिअं—"भद्दोसि तुमं ण जाणासि जं संपइ

---

१ अवटाः—कूपाः २ उत्प्रवाहाः ३ केदाराभिमुखम्-क्षेत्राभिमुखम् ४ परि-धृत-हरितकुर्पासा ५ शोभते—यथा—अग्घइ, छज्जइ, रेहइ, विरायए, सोहए

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनेकनदीरूपं उररीकृतं नगरवीथिभिः। उन्नीराः सम्भूताः क्षणेन तलिमनीराः अवटाः। उत्प्रवाहा जाताः जलराशि धारयितुं अक्षमाः तुच्छास्तटाकाः। प्रतिपूर्णाः निम्नगाः विकटतटाः सञ्जाताः। नष्टं तप्तेर्नामधेयम्। कर्णं गतः सर्वेषां सर्वतः समय-मधुरो दर्दुराणां रावः। विनिद्रा जाता चिर-मूर्च्छिता जीवन-धनं प्राप्य वनराजी। कृता कृषिकारैः कृष्युपकरणैः सार्धं बलीवर्द-पूजा। लक्षित-नक्षत्र-बलाः गृहीत-शुभशकुनाः केदाराभिमुखं निर्गताः एते बीज-वपनार्थम्। अहो! सर्वाङ्गीणं सौन्दर्यं प्रस्तृतं समन्ततः।

इतः सुविहित-प्रत्यूष-कालिक-धर्मकार्यो जिनदत्तः स्कन्धारोपित-कुठारश्चलितः काष्ठहारकैः सार्धं काष्ठभारं नेतुं वनाभिमुखम्, परन्तु सुदुर्लभा जाता शुष्क-काष्ठ-सम्प्राप्तिः तादृशे प्रावृट्काले। यत्र पश्यति तत्रैव परिधृत-हरित-कुर्पासा राजते पृथ्वी। शुष्का कुटिला अपि लब्धाभिनव-कुड्मला शोभते वृक्षाणां आली। कुड्डं (आश्चर्यम्) नास्ति अवकाशः किल शुष्काणां वृक्षाणाम्। अस्ति नियमो जिन-दत्तस्य हरित-वृक्षान् छेत्तुं गृहीत-द्वादश-श्रावक-व्रतेषु। बहु गवेषित-मपि न प्राप्तं शुष्कं काष्ठं कुत्रापि एतेन। सम्प्रति किं कर्त्तव्यमिति चिन्त परः संवृत्तः सः। रक्षिते व्रते न सुरक्षिता तिष्ठति आजीविका। अन्यैः काष्ठहारकैर्विशदं कथितम्—"भद्रोऽसि त्वम्, न जानासि यत्

सहइ (पा० १५२) ६ कुडिल्ला-कुब्जा : (दे०) 'टेढा मेढा' इतिभाषा ७ शोभते ८ आश्चर्यम् (दे०) ९ विशदम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वट्टए वरिसा-समयो। णियम-परिवालणत्तो आवस्सयं उइअं च कुच्छि-परिवालणं। णत्थि आवइ-काले मज्जाद'त्ति विइआ[1] लोगुत्ती। ता मुअसु, अण्णाण-पडिवण्णं सुहकाल-पालणिज्जं पइण्णं। णिवहंतु ते धम्म-णियमे जे संति धणड्ढा विउल-विभूइमंता जेसिं ण काइ विढवण-चिंता[2]। तएजारिसाणं[3] कए कत्थ धम्म-मंदिर-पवेसणावयासो। ता छिदसु, भो! छिंदसु, हरिअ-कट्ठाण णिउरंबं।"

अणुइअमुईरणं[4] तेसिं धम्मिट्ठ-सेट्ठिस्स ण रुइअं। उद्दित्त-णाण-गहिरिअं पचुत्तरिअं सेट्ठिणा–"ण मुणिअं भो! तुब्भेहिं धम्म-तत्तं। ण धम्मायरणम्मि लच्छी-पुत्ताणं धण-दरिद्दाणं वा परिविसेसो। लद्धतत्तो चुच्छोवि अचुच्छ धम्मकारगो। रहस्सवंझो ईसरो वि धम्मं काउमणीसरो। णूणं आवयाए च्चिअ रेहइ[5] कसवट्ट-वट्टिअं-सुवण्णव्व धम्मो। उअर-परिवालणं तु साणो वि करेइ संमता भममाणो। तत्थ किं चोज्जं[6]? मणुअस्स एसो चिय माहप्पो जमेसो पाणेहिं पि माहप्पमप्पेइ अणुत्तरस्स धम्मस्स। सुक्किक्कणाणं पत्ती वि कहं ण हविस्सइ, जयाहं अवीसामं परिस्समं करिस्सं। विमग्गिअं किं ण अग्गओ आयाहिइ? तोडिअ-वयाणं किं जीवणं जीवणं? अक्खय-पइण्णाणं दुहंपि सुहंकरं। तम्हा मए ण कयावि जहणिज्जं[7] वयं।" एवं साहेऊण एगागी णिब्भओ सेट्ठी सुक्क-कट्ठ-लद्धीए गहण-वणम्मि गओ। भिस-मण्णेसणा कया णेण, परंतु ण एगावि अचित्त-कट्ठ-लट्ठी[8] हत्थमागया इम्मस्स। तहवि अणुआसीणो रित्त-हत्थो पच्चा-वलिओ गिहंमि विलंबेण सेट्ठी?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्प्रति वर्तते वर्षासमयः। नियम-परिपालनतः आवश्यकं उचितं च कुक्षि-परिपालनम्। 'नास्ति आपत्काले मर्यादा' इति विदिता लोकोक्तिः। तस्मात् मुञ्च, अज्ञान-प्रतिपन्नां सुखकाल-पालनीयां प्रतिज्ञाम्। निर्वहन्तु ते धर्म-नियमान् ये सन्ति धनाढ्याः विपुल-विभूति-मन्तः येषां न कापि अर्जन-चिन्ता। त्वादृशानां कृते कुत्र धर्म-मन्दिर-प्रवेशनावकाशः। तस्मात् छिन्धि भोः! छिन्धि हरित-काष्ठानां निकुरम्बम्।"

अनुचितं उदीरणं तेषां धर्मिष्ठ-श्रेष्ठिने न रुचितम्। उद्दिप्त-ज्ञानगाम्भीर्यं प्रत्युत्तरितं श्रेष्ठिना—"न ज्ञातं भोः! युष्माभिर्धर्म-तत्त्वम्। न धर्माचरणे लक्ष्मी-पुत्राणां धन-द्ररिद्राणां वा परिविशेषः। लब्धतत्त्वः तुच्छोऽपि अतुच्छ-धर्मकारकः। रहस्यवन्ध्यः ईश्वरोऽपि धर्मं कर्तुअनीश्वरः। नूनं आपदि एव राजते कषपट्टवर्तितं सुवर्ण-वद् धर्मम्। उदर-परिपालनं तु श्वानोऽपि करोति समन्तात् भ्रमन्। तत्र किं चोज्जं (आश्चर्यम्)? मनुजस्य एतदेव माहात्म्यं यत् एष प्राणैरपि माहात्म्यमर्पयति अनुत्तराय धर्माय। शुष्केन्धनानां प्राप्तिरपि कथं न भविष्यति यदाहं अविश्रामं परिश्रमं करिष्यामि। विमार्गितं किं न अग्रतः आयास्यति? त्रोटित-व्रतानां किं जीवनं जीवनम्? अक्षत-प्रतिज्ञानां दुःखमपि शुभंकरम्, तस्मात् मया न कदापि हातव्यं व्रतम्। एवं कथयित्वा एकाकी निर्भयः श्रेष्ठी शुष्क-काष्ठ-लब्धये गहन-वने गतः। भृशं अन्वेषणा कृता अनेन, परन्तु न एका पि अचित्तकाष्ठयष्टिः हस्तमागता अस्य। तथापि अनुदासीनो रिक्तहस्तः प्रत्यावलितः गृहे विलम्बेन श्रेष्ठी।

---

१ विदिता २ अर्जन-चिन्ता ३ त्वादृशानाम् ४ अनुचितम् ५ राजते ६ आश्चर्यम् ७ हातव्यम् ८ अचित्तकाष्ठयष्टिः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इओ पडिक्खमाणा पइदेवं भाणुमई ट्ठिआ उडज-दुवारम्मि । कहं णागया अहुणावहि अज्जउत्ता ? किं णवीणमरिट्ठं उप्पण्णं ? एवं चिरपडिवालेमाणीए ताए रयणपहमोइण्णो रयणवाल-पिआ । मोअ-मेउरा जाया जाया । रणरणयमावण्णाए[1] ताए उट्ठंकिअं–"कहं चिराइयं अज्ज अज्जउत्तेहिं ? कहमुव्वायं[2] दीसइ भे अंगं ? कत्थ विच्छड्डिआ[3] सिरम्मि णिज्जंती[4] इंधण-भारिआ ।" एवं पेमिल्लाए सहम्मिणीए अणेगाओ पण्हाओ[5] पत्थुआओ ।

तत्त-गहिर-मुद्दाए[6] सेट्ठिणा पयडीकयं–"पिये ! अत्थि पाउस-कालो । दुल्लहं सुक्कं कट्ठं । तं ढुंढुल्लमाणेण[7] मए एत्तिल्लो[8] समयो अइवाहिओ, परंतु ण लद्धं जहेच्छिअं वत्थुं । वय-भंग-भीरुणा मए ण आणिअं सच्चित्तं कट्ठं । तो रित्तहत्थो किर पुण आगओ म्हि । रयणमायरं ! निच्चलं रक्खिअं वयं णिच्छियं रक्खा-कारगं हवइ ।"

"सम्मं चिंतणं अज्जउत्ताणं । ण तुच्छ-भंगुर-पोग्गलिअ-सुहाणं कए णं अतुच्छामरज्झत्थ-सुहाणं हाणिं करेइ सुण्णमणुओ[9] । सुवे परज्जु वा जं पावणिज्जं तं पाविस्सामो, का चिंता ।" णिवेइयं पियधम्माए सहम्मिणीए णिब्भयं ।

एअं खु सुधम्म-पत्तीए पच्चक्खं णिदंसणं । अहो ! एआरिसीए आवयाए वि ण एएसिं मणो चावल्लं पत्तो । बिइओ दिअहो वि अलद्ध-लक्खो णिग्गओ । तइअम्मि दिवसम्मि णीरंध-वणविभागे बंभम्ममाणेण सेट्ठिणा एगाए

---

१ रणरणकं-औत्सुक्यम् २ परिश्रान्तः ३ विच्छर्दिता-त्यक्ता ४ नीयमाना ५ प्रश्नशब्दः प्राकृते स्त्रीलिङ्गेऽपि, यथा—पण्हावागरणं ६ तत्त्वगम्भीरमुद्रया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतः प्रतीक्षमाणा पतिदेवं भानुमती स्थिता उटज-द्वारे। कथं नागताः अधुनावधि आर्यपुत्राः ? किं नवीनं अरिष्टं उत्पन्नम् ? एवं चिर-प्रतिपालयन्त्याः तस्याः नयनपथं अवतीर्णो रत्नपालपिता। मोदमेदुरा जाता जाया। रणरणकं आपन्नया तया उद्दङ्कितम्—"कथं चिरायितं अद्य आर्यपुत्रैः ? कथं उद्वातं दृश्यते युष्माकं अङ्गम् ? कुत्र विच्छर्दिता शिरसि नीयमाना इन्धनभारिका।" एवं प्रेमवत्या सधर्मिण्या अनेके प्रश्नाः प्रस्तुताः।

तत्व-गम्भीर-मुद्रया श्रेष्ठिना प्रकटीकृतम्—"प्रिये ! अस्ति प्रावृट्कालः। दुर्लभं शुष्कं काष्ठम्। तद् गवेषयता मया इयान् समयोऽतिवाहितः, परन्तु न लब्धं यथेष्टं वस्तु। व्रत-भङ्ग-भीरुणा मया न आनीतं सचित्तं काष्ठम्। ततः रिक्तहस्तः किल पुनः आगतोऽस्मि रत्नमातः ! निश्चलं रक्षितं व्रतं निश्चितं रक्षाकारकं भवति।

"सम्यक् चिन्तनं आर्यपुत्राणाम्। न तुच्छ-भङ्गुर-पौद्गलिक-सुखानां कृते अतुच्छामराध्यात्मसुखानां हानिं करोति सुज्ञमनुजः। श्वः परेद्युः वा यत् प्रापणीयं तत् प्राप्स्यामः, का चिन्ता ?" निवेदितं प्रिय-धर्मिण्या सधर्मिण्या निर्भयम्।

एतत् खलु धर्म-प्राप्तेः प्रत्यक्षं निदर्शनम्। अहो ! एतादृश्यां आपदि अपि न एतयोः मनः चापल्यं प्राप्तम्। द्वितीयः दिवसोऽपि अलब्ध-लक्ष्यो निर्गतः। तृतीये दिवसे नीरन्ध्र-वन-विभागे बम्भ्रम्य-

---

७ गवेषयता—'गवेषेर्ढण्ढुल्ल-ढण्डोल-गामेस-धत्ताः' (हे० ४-१८६) ८ इयान् 'इदं किमश्चडेत्तिअ-डेत्तिल्ल-डेदृहाः' (हे० २-१५७) ९ सुज्ञमनुजः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गिरिकंदरीए दिव्व-णियम-प्पहावेण अमरचंदणस्स संघाओ दिट्ठो। णिभालिऊण जहेच्छिअं दव्वं पसण्णमणो सेट्ठिओ जाओ, किंतु विहि-दोसेण दक्खेणावि एइणा[1] ण लक्खिअं हरिचंदणं'ति। धी धी धी! विवरीए विहिम्मि चेअणावि चुक्किअ[2]-केअणा संपज्जइ। संदाणिओ दढो तस्स भारो तक्कालं। मत्थयम्मि काऊणं णयर-दिसं पच्चावलिओ। णयर-परिसरम्मि एज्जंतस्स धुत्त-सिरोमणी धणदत्तो उप्फुल्ल-वयण-कमलो वि कलुसिअंतक्करणो अकम्हा संमुह-मागओ। महमहिअं[3] कट्ठभारमवगंतूण अच्चंतं विक्खापण्णो[4] सो। अहो! अस्स अयाणगस्स सिरंसि अमरचंदणं कुओ आगयं? अहवा घुणक्खरोयणाओ[5] एत्थ संगओ। किं वा ण लद्धो बालिस[6]-बंभणेण चिंतामणी? जाउ पयडो वि कोउहल्ल-तप्परा हवइ। गिण्हेमि किर अस्स मूढयाए अतुल्लं लाहं। पचक्खमवि गंधुग्गिरणं[7] जेण ण लक्खिज्जइ तेण मूढेण चंदण-सब्भावोवि णूणमलक्खिओ हवेज्जा। इअ विचिंतिऊण-उसलिअ[8]-रोमकूओ धुत्ततए सप्पेमं जिणदत्तं वाहरिउं पउत्तो—"भायरं! किं विक्केअणिज्जमिंधणमिणमो? जइ अत्थि? तरिहि जहोचिअ-मुल्लमग्गणं कायव्वं। सप्पुरि-साण एसा चिय पणाली जं ते ण मुहेण मिच्छा जंपणं कुव्वंति। एगहुत्तं कहिअं ण उण परावत्तंति। मुहागिईए तुमं पि 'भद्दपुरिस'त्ति लक्खिज्जसि। ता जहेच्छं मोल्लमाविक्क-रणिज्जं। अहमवि ण तं परावत्तिस्सं समुइअं।" आयण्णिअ

---

१ एतेन २ स्खलितकेतना 'चुक्कादेशः' ३ प्रस्फुटद्-गन्धम् ४ वीक्षापन्नः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माणेन श्रेष्ठिना एकस्यां गिरिकन्दरायां दिव्य-नियम-प्रभावेण अमरचन्दनस्य सङ्घातः दृष्टः। निभालयित्वा यथेष्टं द्रव्यं प्रसन्नमनाः श्रेष्ठिकः जातः किन्तु विधि-दोषेण दक्षेणापि एतेन न लक्षितं हरिचन्दनम् इति। धिग् ! धिग् ! विपरीते विधौ चेतनापि स्खलित-केतना सम्पद्यते। सन्दानितो दृढस्तस्य भारः तत्कालम्। मस्तके कृत्वा नगरदिशं प्रत्यावलितः। नगरपरिसरे आयतः तस्य धूर्त-शिरोमणिः धनदत्तः उत्फुल्लवदन-कमलोऽपि कलुषितान्तःकरणः अकस्मात् सम्मुखमागतः। महमहिअं (प्रस्फुटद्गन्धं) काष्ठभारं अवगम्य अत्यन्तं वीक्षापन्नः सः। अव्वो ! अस्य अज्ञानकस्य शिरसि अमरचन्दनं कुतः आगतम् ? अथवा घुणाक्षरीयन्यायोऽत्र सङ्गतः। किं वा न लब्धो बालिश-ब्राह्मणेन चिन्तामणिः ? जातु प्रकृतिरपि कुतूहल-तत्परा-भवति। गृण्हामि किल अस्य मूढतायाः अतुल्यं लाभम्। प्रत्यक्षमपि गन्धोद्गीर्णं येन न लक्ष्यते तेन मूढेन चन्दन-सद्भावोऽपि नूनं अलक्षितः भवेत्। इति विचिन्त्य उल्लसित-रोमकूपः धूर्ततया सप्रेम जिनदत्तं व्याहर्तुं-प्रवृत्तः—"भ्रातः। किं विक्रेतव्यं इन्धनमिदम् ? यदि अस्ति तर्हि यथोचित-मूल्य-मार्गणं कर्त्तव्यम्। सत्पुरुषाणां एषा एव प्रणाली यत् ते न मुखेन मिथ्या जल्पनं कुर्वन्ति। एकवारं कथितं न पुनः परावर्तन्ते। मुखाकृत्या त्वमपि 'भद्रपुरुषः' इति लक्ष्यसे। तस्माद् यथेष्टं मूल्यं आविष्करणीयम्। अहमपि न तत् परावर्त-

---

विस्मयं गतः ५ घुणाक्षरीयन्यायः ६ मूर्खब्राह्मणेन ७ गन्धोद्गिरणम् ८ उल्लसित-रोमकूपः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुणिज्जमाण-सब्भ-पुरिसस्स वग्गु[1]-भणिइं उज्जुहिअयो अलद्ध-वंचणा-रहस्सो णिआसयेण परासयमंकेमाणो सेट्ठी आणंदिओ जाओ, साहेउं च पउत्तो–"सुकई ! सुट्ठु वागरणं भवओ, णाहं काहं[2] मुहा पलावं। णूणं विक्केअणिज्जो मए कट्ठभारो। अण्णहा कहमम्हारिसाणं चलइ गिहत्थासमो ? णिच्चं णव-खणिअ-कूवस्स णीरं पिएमो अम्हे। णो भवारिसाणं पिव कोसपरिवड्ढणावसरो अम्हारिसाणं। भारिआए ताव मोल्लं केवलमड्ढीइज्जाणयमेत्तं[3]। ण इओ अइरित्तं ण उण ऊणयं जइ घेतव्वं तरिहि.....।"

अलक्खियामरचंदणेदंपज्जस्स[4] रिजुमइणो जिणदत्तस्स भारहिं णिसमिऊण पयारण-कुसलो सो हट्ठतुट्ठो जाओ। "साहुं साहुं भो भद्द ! समुइअं मोल्लं तुमए मग्गिअं, मए वि एद्दहमेत्तमेवाणुमिग्रं"। महाकढिणायासस्स तुम्हारिसाणं जहत्थं मुल्लंकणं कायव्वमम्हारिसेहिं ; इअरहा सेअ-बिंदु-सित्तो कओ परिस्समो अवमणिज्जइ। हंदि ! केरिसमंधयारं ! जे सयय[5] परिस्समेंता, ससरीर-सुहमवि अवगणेंता, सीआतवाइ-किलेसं सहेंता, दुहिआ पिवासिआ अलद्धावासा अणासाइअ-विज्जाब्भासावसरा लुक्का[6] तहा णगिणा अवेक्खि[7]ज्जंति, दुगुंच्छिज्जंति य। तओ विवरीआ पर-परिस्सम-लाहलोलुहा णाणा-कुडिल-कला-कलाव-कोविआ हिअय-विहूणा मणुअ-धम्मवंझा धणकुबेरा विसालावासा वत्थालंकार-विहूसिआ णाणावाहण-परिइण्णा पिचंडिला अलसा चिट्ठंति,

---

१ वल्गुभणितिम् २ करिष्ये ३ अढ़ाई आना ४ अलक्षितामरचन्दनैदम्प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यिष्यामि समुचितम्" । आकर्ण्य ज्ञायमान-सभ्यपुरुषस्य वल्गुभणितिं ऋजुहृदयोऽलब्ध-वञ्चना-रहस्यो निजाशयेन पराशयं अङ्कयन् श्रेष्ठी आनन्दितो जातः, कथयितुं च प्रवृत्तः—"सुकृतिन् ! सुष्ठु व्याकरणं भवतः । नाहं करिष्ये मुधाप्रलापम् । नूनं विक्रेतव्यः मया काष्ठभारः । अन्यथा कथं अस्माद्दशानां चलति गृहस्थाश्रमः ? नित्यं नव-खनित-कूपस्य नीरं पिबामोवयम् । नो भवादृशानामिव कोश-परिवर्धना-वसरोऽस्माद्दशानाम् । भारिकायास्तावत् मूल्यं केवलं सार्धद्वयाण-कमात्रम् । न इतोऽतिरिक्तं न पुनः ऊनकं, यदि गृहीतव्यं तर्हि.....।

अलक्षितामरचन्दनैदम्पर्यस्य ऋजुमतेः जिनदत्तस्य भारतीं निशम्य प्रतारण-कुशलः सहृष्ट-तुष्टः जातः । साधु साधु भो भद्र ! समुचितं मूल्यं त्वया मार्गितम्, मयापि एतावन्मात्रमेव अनुमितम् । महाकठिना-यासस्य त्वादृशानां यथेष्टं मूल्याङ्कनं कर्त्तव्यं अस्माद्दशैः, इतरथा स्वेद-बिन्दु-सिक्तः कृतः परिश्रमः अवमन्यते । हन्दि ! कीदृशं अन्धकारम् ? यत् सततं परिश्राम्यन्तः, स्वशरीरसुखमपि अवगणयन्तः, शीततापादिक्लेशं सहमानाः, क्षुधिताः पिपासिताः अलब्धावासाः अनासादित-विद्याभ्यासावसराः रुग्णाः तथा नग्नाः उपेक्ष्यन्ते, जुगुप्स्यन्ते च । ततः विपरीताः पर-परिश्रम-लाभ-लोलुभाः नाना-कुटिल-कला-कलाप-कोविदाः हृदय-विहीनाः मनुज-धर्म-वन्ध्याः धनकुबेराः विशालावासाः वस्त्रालङ्कार-विभूषिताः नाना-वाहन-परिकीर्णाः पिचण्डिलाः अलसाः

र्यस्य-अज्ञातहरिचन्दनरहस्यस्य इत्यर्थः ५ एतावन्मात्रम् ६ सततम् ७ रुग्णाः ८ उपेक्ष्यन्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मोयंति, कीलंति, जं किमवि जंपेमाणा य पगब्भंति[1]"। पिसुणिअं धणदत्तेण।

चित्तं! धुत्तसेहराणं अलक्खणिज्जा वंचणप्पणाली। वयणेसु अण्णं, अण्णं पुण विआरेसु। तेसिं महुरं जंपणमवि विस-मीसिअं। तेसिं हसिरा आगिई वि कसाय-कलुसा विगिई। तेसिं सम्माण-दाणं पि अलक्खिअ-मायाविआणं। खणं पि तेसिं संगई, पचक्खं दुग्गई। अहवा किमेआरिसं कज्ज-मकरणिज्जं जं ण समायरेइ दुज्जणो जणो? अलं तेसिं कहाहिं।

पुणरवि वंचगेण महुलित्त-खग्ग-धारा-समाए सरस्सईए[2] पवंचिअं–"ता सोम्म! एहि मए सद्धिं मह-गिहपेरंतं, देमि तिण्णि आणयाणि तुह। अत्थि मणुअ-दिट्ठीए तुममवि भायरो मे, किं बहु-प्पलावेण?

केरिसो किवालु'त्ति कप्पेंतो भद्दो जिणदत्तो तमणु-गओ। छूढो[3] कट्ठभारो। गहिआणि वारमाणेणावि तेण पसज्झं दिज्जमाणाणि तिण्णि आणयाणि। "ण अओ उड्ढं तुमए कत्थइ भमिअव्वं कट्ठभारं विक्केउं पइदिणं। अहमेव निच्चिंछअ-मोल्लेण गहिस्सं तं। किं किं ण जुज्जइ जेट्ठासमीणं गिहम्मि, कट्ठं तु पुण णिच्चं वावारणिज्जं वत्थु" संतयंतेण[4] साहिअं तेण।

एगो च्चिय थिरो गाहगो संवुत्तो'त्ति जिणदत्तो जत्थ-तत्थ भमण-संतत्थो मोमुइओ जाओ। किं रहस्सं'ति तहवि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिष्ठन्ति, मोदन्ते, क्रीडन्ति, यत् किमपि-जल्पन्तश्च प्रगल्भन्ते।[1]" पिशुनितं धनदत्तेन।

चित्रम्! धूर्त-शेखराणां अलक्षणीया वञ्चन-प्रणाली। वचनेषु अन्यत्, अन्यत् पुनः विचारेषु। तेषां मधुरजल्पनमपि विष-मिश्रितम्! तेषां हसित्री (हसनशीला) आकृतिरपि कषाय-कलुषा विकृतिः। तेषां सम्मान-दानमपि अलक्षित-मायावितानम्। क्षणमपि तेषां सङ्गतिः प्रत्यक्षं दुर्गतिः। अथवा किं एतादृशं कार्यं अकरणीयं यत् न समाचरति दुर्जनो जनः? अलं तेषां कथाभिः।

पुनरपि वञ्चकेन मधु-लिप्त-खड्गधारा-समया सरस्वत्या[2] प्रपञ्चितम्—"तस्मात् सौम्य! एहि मया सार्धं मम गृहपर्यन्तं, ददामि त्रीणि आणकानि तुभ्यम्। अस्ति मनुजदृष्ट्या त्वमपि भ्राता मे किं बहुप्रलापेन?"

'कीदृशः कृपालुः' इति कल्पयन् भद्रो जिनदत्तः तमनुगतः। क्षिप्तः[3] काष्ठभारः। गृहीतानि वारयतापि तेन प्रसह्य[4] दीयमानानि त्रीणि आणकानि। "न अतः ऊर्ध्वं त्वया कुत्रापि भ्रमितव्यं काष्ठभारं विक्रेतुं प्रतिदिनम्। अहमेव निश्चित-मूल्येन ग्रहीष्यामि तम्। किं किं न युज्यते ज्येष्ठाश्रमिणां गृहे, काष्ठं तु पुनर्नित्यं व्यापारणीयं वस्तु" सान्त्वयता[5] कथितं धनदत्तेन।

'एकः एव स्थिरः ग्राहकः संवृत्तः' इति जिनदत्तः यत्र तत्र भ्रमण-सन्तप्तः मोमुदितः जातः। किं रहस्यमिति तथापि न लक्षितं

---

१ प्रगल्भन्ते २ सरस्वत्याः ३ क्षिप्तः 'वृक्ष-क्षिप्तयोः रुक्ख-छूढौ (हे० २-१२७) ४ प्रसह्य ५ सान्त्वयता।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ण लक्खिअं णेण पंजलेण[1]। इत्थं णिअयं सेट्ठी महा-मुल्लिल्लं हरिचंदणभारं साहारणकट्ठमोल्लेण अल्लिवइ धुत्तस्स धणदत्तस्स। सो वि अस्स रहस्सस्स मा कोवि कोविओ[2] होउ'त्ति गुत्तरूवेण गहिऊण संगोवेइ। अणुऊलं वारं पप्प अण्णत्थ पट्ठविअ अउलो लाहो गहणिज्जो 'त्ति णिच्छिअं वंचगेण। किंतु पडिफलिअं कइअवं केरिसं पडिभयं कज्जलिअं परिणामं दक्खवेइ 'त्ति ण णायं तेण माया-विणा।

जिणदत्तस्सेवं सुहेण उअर-णिव्वाहो हवइ। पत्त-मुद्दाए संतुट्ठा भाणुमई साणंदं विवइ-कालमुल्लंघेइ। पुव्वावत्थासरणं जाहे जाहे हवेज्जा, ताहे ताहे णिअ-घडिअ-पाव-परिणइं चिंतेमाणा इमे मणं पसाअंति। धम्मो चिअ एगं सरणं'ति सरंता ण मिच्छा सोअपरा जायंति। परं ण एआरिसं दिणं, जामो, मुहुत्तं वा वच्चइ जम्मि पिअ-पुत्तस्स सई ण सज्जुक्का होइ। तत्थगयं उअंतं पावेउं पडिपलं हिअयमुत्तम्मिअं[3] चिट्ठइ, परं दविट्ठ-देसंतरम्मि ण मणावि[4] चिरंजीविणो पुत्तस्स पउत्ती पत्ता सिआ।

---

१ प्राञ्जलेन २ कोविदः ३ उत्तान्तम्-खिन्नमित्यर्थः ४ मनागपि।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनेन प्राञ्जलेन। इत्थं नियतं श्रेष्ठी महामूल्यवन्तं हरिचन्दनभारं साधारण-काष्ठ-मूल्येन अर्पयति धूर्ताय धनदत्ताय। सोऽपि 'अस्य रहस्यस्य मा कोऽपि कोविदः भवतु' इति गुप्तरूपेण गृहीत्वा संगोपयति, अनुकूलं वारं प्राप्य अन्यत्र प्रस्थाप्य अतुलो लाभो ग्रहणीयः' इति निश्चितं वञ्चकेन। किन्तु प्रतिफलितं कैतवं कीदृशं प्रतिभयं कज्जलित परिणामं दर्शयति इति न ज्ञातं तेन मायाविना।

जिनदत्तस्य एवं सुखेन उदर-निर्वाहो भवति। प्राप्त-मुद्रया सन्तुष्टा भानुमती सानन्दं विपत्कालं उल्लङ्घयति। पूर्वावस्थास्मरणं यदा कदा भवेत् तदा तदा निज-घटित-पाप-परिणतिं चिन्तयन्तौ इमौ मनः प्रसादयतः। 'धर्मः एव एकं शरणम्' इति स्मरन्तौ न मिथ्याशोककरौ जायेते। परं न एतादृशं दिनं, यामः, मुहूर्तं वा व्रजति यस्मिन् प्रियपुत्रस्य स्मृतिर्न सद्यस्का भवति। तत्रगतं उदन्तं प्राप्तुं हृदयं उत्तान्तं तिष्ठति, परम् दविष्ठदेशान्तरे न मनागपि चिरञ्जीविनः पुत्रस्य प्रवृत्तिः प्राप्ता स्यात्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इओ य अइसुहेण लालिओ पालिओ रयणवालो बालो चंकमणक्खमो जाओ। सवएहिं सद्धि अणेगाहिं डिभकीडाहिं कीलेंतो, खणेण रूसेंतो, हसेंतो, रुएंतो, भूअलम्मि आलोट्टेंतो सयज्झ[1]-छावेहिं विथक्केंतो[2], किविणस्स हिअयं कोआसावेइ, पसाहेइ, आणंदाणंदिअं च कुणइ। अणेगाहिं आहिवाहीहिं सुरक्खिओ संगोविओ पुत्तो अट्ठवासिओ जाओ। पट्ठविओ मम्मणेणं पढणणिमित्तं पाढसालाए अणुहविणो गुरुणो समीवं। विणय-विवेग-संपण्णो एसो चवलमेहाए विज्जाज्झयणं कुणेंतो णाणाविज्जा-पारं गओ जाओ। इंगि आगारमाराहेमाणो अज्झावयस्स परमं पसायं पत्तो। विज्जा-भार-गरुओ वि लाघव-गुणेहिं सव्वत्थ सिलाहणिज्जो मुणिओ। मम्मणेणावि गिह-कज्जम्मि, आयाणप्पयाणम्मि[3], आवण-वावारम्मि य परिचिओ, संसत्तो च कओ। दुआलस्सवासिओ वि परिणय-वयो इव कज्ज-कुसलो संवुत्तो। आवणम्मि चिट्ठमाणो, वावारं कुणमाणो, महुरं ववहरमाणो य सव्वेसिं अईव चक्खुस्सो[4] लग्गइ। अणेगे गाहगा तु इमिणा वत्तालावेण संतुट्ठा तत्थ चिट्ठन्ति। बालोवि केरिसो दक्खो'त्ति भिसं पसंसेमाणा उरेण उवऊढंता पुलइआ हवंति।

---

१ प्रातिवेश्मिकबालैः, यथा—'सयज्झो, समोसिओ' (पाइयलच्छी ७६६)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतश्च अति सुखेन लालितः पालितः रत्नपालः बालः चङ्क्रमण-क्षमो जातः। सवयोभिः सार्धं अनेकाभिः डिम्भ-क्रीडाभिः क्रीडन् क्षणेन हृष्यन्, हसन्, रुदन् भूतले आलुण्ठन् सयज्भः-शावैः (प्रातिवेश्मिक-बालैः) वितिष्ठन् कृपणस्य हृदयं विकासयति, प्रसादयति, आनन्दानन्दितं च करोति। अनेकैः आधि-व्याधिभिः सुरक्षितः सङ्गोपितः पुत्रः अष्टवार्षिकः जातः। प्रस्थापितः मन्मनेन पठन-निमित्तं पाठशालायां अनुभविनो गुरोः समीपम्। विनय-विवेक-सम्पन्नः एष चपलमेधया विद्याध्ययनं कुर्वन् नानाविद्यापारङ्गतो जातः। इङ्गिताकारं आराधयन् अध्यापकस्य परमं प्रसादं प्राप्तः। विद्याभारगुरुकोऽपि लाघवगुणैः सर्वत्र श्लाघनीयः ज्ञातः। मन्मनेनापि गृहकार्ये आदान-प्रदाने आपण-व्यापरे च परिचितः संसक्तश्च कृतः। द्वादशवार्षिकोऽपि परिणतवयाः इव कार्यकुशलः संवृत्तः। आपणे तिष्ठन्, व्यापार कुर्वन्, मधुरं व्यवहरन् च सर्वेषां अतीव चक्षुष्यः लगति। अनेके ग्राहकाः तु अनेन वार्तालापेन सन्तुष्टाः तत्र तिष्ठन्ति। 'बालोऽपि कीदृशो दक्षः' इति भृशं प्रशंसन्तः उरसा

---

२ वितिष्ठन् ३ आदानप्रदाने ४ चक्षुष्यः-सुभगः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परं इत्तोप्पं[1] विविह-गिह-कज्ज-कुसलेणावि ण णायं 'कोहं' इअ रहस्सं णेण। मम्मणेणावि वीसुं एआरिसमणुऊलं वायावरणं जणिअं जेण मणयमवि ण अस्स कयावि अयम्मि विसयम्मि माणसं संदिद्धं हवइ। मम्मणो चिअ मे पिया, मम्मण-भज्जा चिअ मह जम्मदायिगा जणणि'त्ति जाणाइ सो, ण दिट्ठो कोइ कयाइ विवज्जासो[2]। परं, परं णिगूहिअमवि तुस-रासिम्मि छण्णं फुलिंगव्व रहस्सं जया कया बाहिरमागच्छइ। जमत्थि मत्थि चिय, तस्स णत्थित्तं कहं हवइ'त्ति णिच्छिअं तत्तं।

गओ एगया रयणवालो अहमण्णस्स[3] गिहम्मि वुड्ढिं गयं धणं पुण आणेउं। ण पच्चप्पिउं खमो सो ठिइ-वसंवओ। बालत्तणओ[4] अविण्णाय-परत्थ'-पारतंतो कय[5]-कयग्गहो तत्थेव ठिओ। णाहमज्ज अगहिअ-सवुड्ढिरित्थो रित्तहत्थो पच्चावलिस्सं। अणेगहुत्तं समागओहंमिह धणमाणेउं, परंतु तुमं णिरंतरं किमवि किमवि मिसमायाय मं परावत्तेसि। हद्धी! केरिसी जणाण णीई जाया? जया गहणिज्जं धणं तयाणिं तु महुरमहुर-वयणेहिं वयंति। 'तुम्हे किर अम्ह संरक्खया पालया जीवण-दाण-दायग'त्ति लालप्पमाणा अबीअं सोअण्णं पयडयंति। संपण्णे कज्जे, करायत्ते अत्थे य ण कोइ संबंधो'त्ति दूरओ णीसरंति। दायगेण वाहित्ता[6] रत्तयणणा जं किमवि पच्चुत्तरंता उत्तेजिआ हवंति। हंत! आगओ केरिसो विचित्तो दूसमो! जणेहिं गहिअं दायव्वं'ति विम्हुट्ठं, परंतु णाहं विच्छड्ढिस्सं समप्पिअं ईसिं वि।

---

१ एतत्प्रभृति, यथा इत्तोप्पं एअप्पभिइ।(पाइयलच्छी-४४८) २ विपर्यासः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपगूहन्तः पुलकिताः भवन्ति। परं इत्तोष्पं (इतः प्रभृति) विविध-गृहकार्यकुशलेनापि न ज्ञातं 'कोऽहम्' इति रहस्यं अनेन। मन्मने-नापि विष्वक् एतादृशं अनुकूलं वातावरणं जनितं येन मनागपि न अस्य कदापि अस्मिन् विषये मानसं संदिग्धं भवति। 'मन्मनः एव मे पिता, मन्मन-भार्या एव मम जन्मदायिका जननी' इति जानाति सः। न हृष्टः कोऽपि कदापि विपर्यासः। परं परम-निगूहितमपि तुषराशौ छन्नं स्फुलिङ्गवत् रहस्यं यदा कदा बहिः आगच्छति। यदस्ति तदस्ति एव, तस्य नास्तित्वं कथं भवति इति निश्चितं तत्त्वम्।

गतः एकदा रत्नपालः अधमर्णस्य[३] गृहे वृद्धिं गतं धनं पुनः आनेतुम्। न प्रत्यर्पयितुं[४] क्षमः स स्थिति-वशंवदः। बालत्वात्[५] अविज्ञातपरार्थ-पारतन्त्र्यः कृत-कदाग्रहः[६] तत्रैव स्थितः। नाहं अद्य अगृहीत-सवृद्धि-रिक्थो रिक्तहस्तः प्रत्यावलिष्ये। अनेकवारं समागतोऽहं इह धनमा-नेतुम्, परन्तु त्वं निरन्तरं किमपि किमपि मिषमादाय मां परावर्तयसे। हा! धिक्! कीदृशी जनानां नीतिर्जाता। यदा ग्रहणीयं धनं तदानीं तु मधुरमधुर-वचनैर्वदन्ति। 'यूयं किल अस्माकं संरक्षकाः, पालकाः, जीवनदानदायकाः' इति लालप्यमाना अद्वितीयं सौजन्यं प्रकटयन्ति। सम्पन्ने कार्ये, करायत्ते अर्थे च न कोऽपि सम्बन्धः इति दूरतः निस्सरन्ति। दायकेन व्याहृता[७] रक्तनयना यत् किमपि प्रत्युत्तरन्तः उत्तेजिताः भवन्ति। हन्त! आगतः कीदृशः विचित्रो दुःषमः, जनैः गृहीतं दातव्यम्' इति विस्मृतम्। परन्तु नाहं त्यक्ष्यामि समर्पितं

---

३ अधमर्णस्य-ग्राहकस्येत्यर्थः ४ बालत्वात् ५ अविज्ञातपरार्थ-पारतन्त्र्यः ६ कृतकदाग्रहः ७ व्याहृताः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अज्ज तु पडिण्णायं मए अगहिअ-धरणेण ण जहिअव्वं ठाणमिणं। इअ साहेऊण तत्थेव निच्चलं ठिओ रयण वालो रइअ[1]-पल्हथिओ।

सगरिहं सुणिऊण तस्स थुडंकिअयं[2] वयणं परोवि कोव-कंपिआहरो जाओ। हरे! दुद्धगंधिअमुहो[3] वि जं किमवि अवलवइ जंबुल्लो[4]। जाणामि अहमवि अस्स अवं-जणिज्जं[5] वईअं। पगब्भो ण जाणेइ चत्त-सगिहस्स ठिइं। जंभणंभणोः कहं ण लज्जए णीइं उवदिसेंतो। ता विसयं करेमि अस्स पुरओ मायरपिअराणं दुहदं वुत्तंतं। इअ चिंतेऊण कोह-कासाइअ-नेत्तो सो सगरिहं वोत्तुमाढत्तो—"अरे धट्ठ! तुण्हिक्को होहि तुण्हिक्को। मा मोरउल्ला पगब्भं[6] दंससु। ण मुणेसि महामुक्ख! मायर-पिअराणं पवास-कारणं तुह जम्मो'त्ति। कीअ-दास! कीस तुमं एआरिसं धिट्ठिमं दक्खवेसि, किमप्पिअं ते बप्पेण[7] मे दव्वं? ओसर[8] ओसर बप्पुडा[9]! इओ आयण्णेउं णिअं कज्जलिअं अईअं। जम्मंध! कहं गव्विल्लो हविअ[10] भमसि? णाहं तुज्झं किमवि दाहं। णत्थि णाम कोइ तुज्झ अहिआरो मग्गणट्ठं इह।" एवं समुह-विकूणिअं अहमण्णस्स कक्कस-वयणतीरेहिं ताडिओ मम्माहओ 'अमुणिअ-तप्पच्चारण[11]-हिअयो संकिओ कलुस-समावण्णो असमंजसं दसं च पत्तो। कहमेसो पच्चारेइ गरिहेइ य मं अवियारिअ-वक्कपाहाण-पक्खेवेण? कीस एएण 'कीअदासो'त्ति दूसिओ

---

१ रचितपर्यस्तिकः 'पालथी मारके' इतिभाषा २ रोषतप्तवचनम्, यथा—रोसेण उण्हिक्कं वयणं जं थुडंकिअयं (पाइयलच्छी ६५१) ३ दुग्धगन्धिकमुखः—बालकः ४ बकवादी (दे०) ५ अव्यञ्जनीयम् ६ स्वच्छन्द-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इषदपि । अद्य तु प्रतिज्ञातं मया अगृहीतधनेन न हातव्यं स्थानमिदम् । इति कथयित्वा तत्रैव निश्चलं स्थितः रत्नपालः रचित-पर्यस्तिकः ।

सगर्हं श्रुत्वा तस्य थुडङ्किअयं (रोषयुक्तं) वचनं परोऽपि कोपकम्पिताधरः जातः । अरे ! दुग्धगन्धिकमुखोऽपि यत् किमपि अपलपति 'जम्बुल्लः' (वाचालः) । जानामि अहमपि अस्य अव्यञ्जनीयं व्यतीतम् । प्रगल्भो न जानाति व्यक्त-स्वगृहस्य स्थितिम् । 'जम्भणम्भणो' (स्वच्छन्दभाषी) कथं न लज्जते नीतिं उपदिशन् । तस्मात् विशदं करोमि अस्य पुरतो मातृ-पित्रोः दुःखदं वृत्तान्तम् । इति चिन्तयित्वा कोपकाषायितनेत्रः स सगर्हं वक्तुं आरब्धः—"अरे ! धृष्ट ! तूष्णीको भव तूष्णीकः । मा मुधा प्रागल्भ्यं दर्शय । न जानासि महामूर्ख ! मातृ-पित्रोः प्रवासकारणं तव जन्म इति । क्रीतदास ! कस्मात् त्वं एतादृशं धृष्टत्वं दर्शयसि, किं अर्पितं ते बप्पेन (पित्रा) मह्यं द्रव्यम् । अपसर ! अपसर ! वराक ! ('बापड़ा' इति भाषायाम्) इतः आकर्णयितुं निजं कज्जलितं अतीतम् । जन्मान्ध ! कथं गर्वितो भूत्वा भ्रमसि ? नाहं तुभ्यं किमपि दास्यामि । नास्ति नाम कोऽपि तव अधिकारो मार्गणार्थं इह ।" इत्थं समुखविकूणितं अधमर्णस्य कर्कशवचनतीरैस्ताडितो मर्माहतः अज्ञात-तदुपालम्भ-हृदयः शङ्कितः कलुषसमापन्नश्च असमञ्जसां दशां प्राप्तः । कथं एष उपालभते गर्हते च मां अविचारित-वाक्य पाषाण-प्रक्षेपेण । कस्मात् एतेन 'क्रीतदासः'

भाषी ७ प्रागल्भ्यं ८ पित्रा 'बाप' इतिभाषा (दे०) ९ अपसर १० 'बापडा' इतिभाषा (दे०) ११ हविअ-भूत्वा १२ अज्ञात-तदुपालम्भहृदयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कलंकिओऽहयं। किमण्णे मे जन्मदायगा मायर-पिअरा ? किं ण मम्मणो मे तत्तिओ[1] पिआ। अव्वो ! ण गुज्झं जाव विसयीकुणेमि ताव ण मए किं पि पच्चुत्तरिअव्वं। इअ णिच्छिआण सयराहमेव तओ उट्ठिओ णाणा-विगप्प-पेंखोलिअ-माणसो तुण्हिमासेवमाणो तत्त-गवेसण-तप्परो चलिओ। मग्गम्मि आवणिओ[2] एगो थेरो आवणम्मि ठिओ दिट्ठि-पहं गओ। विमण-दुम्मणो सो अईअं रहस्सं पयडी-कारेउकामो तस्स ससीममागओ।

हिम[3]-पुलुट्ठमरविंदं विव मिलायमाणमुहमिमं रयणवालं लक्खिअ किं कारणं'ति गवेसणापरो सो पुच्छेउं लग्गो– "वच्छ ! कीस तुमं दीससि अज्ज गहिर-चिंता-विहलो ? णिच्चं पंफुल्लं तुह वयण-सयपत्तं कहमज्ज हिअं[4] विलिअं मे पडिहाइ ? भण, सिग्घं भण, जहा ते दुह-पडिआरं करेमि किंचि।"

दीहं उसिणं नीससंतेण रयणेण सूइओ सव्वो वि जहावत्तं वुत्तंतो। कहमहं तेण णिब्भंच्छिओ[5] 'कीअदास'त्ति सद्देण। किं रहस्सं विज्जए एत्थ ? को एआरिसो गुज्झो वइअरो ? जिण्णासेमि ताय ! सव्वमिणं जहातहं।

आयण्णिअ रयणवालस्स पुच्छणं सेराणणो जाअ। सो परिणयवयो। अणुहूअमईअं पच्चक्खं परिप्फुरिअं तस्स। अवत्तव्वं गुज्झमिणं दरफुडिआहरो वि मूअल्लिओ[6] ठिओ।

---

१ तात्त्विकः २ आपणिकः—'दूकानदार' इतिभाषा ३ हिमप्लुष्टम्-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति दूषितः कलङ्कितः अहम् ? किमन्यौ मे जन्मदायकौ मातरपितरौ ? किं न मन्मनो मे तात्विकः पिता ? अव्वो ! न गुह्यं यावद् विशदीकरोमि तावत् न मया किमपि प्रत्युत्तरितव्यम् । इति निश्चित्य शीघ्रमेव ततः उत्थितः नाना-विकल्प-प्रेङ्खोलितमानसः तूष्णीमासेवमानस्तत्व-गवेषण-तत्परश्चलितः । मार्गे आपणिकः एकः स्थविरः आपणे स्थितो दृष्टि-पथं गतः । विमनोदुर्मनाः स अतीतं रहस्यं प्रकटीकारयितुकामः तस्य ससीमं आगतः ।

हिम-प्लुष्टमरविन्दमिव म्लायन्मुखं इमं रत्नपालं लक्षयित्वा 'किं कारणम्' इति गवेषणापरः स प्रष्टुं लग्नः—"वत्स ! कस्मात् त्वं दृश्यसे अद्य गभीर-चिन्ता-विह्वलः ? नित्य प्रफुल्लं तव वदन-शत पत्रं कथं अद्य त्रस्तं व्रीडितं मम प्रतिभाति ? भण, शीघ्रं भण, यथा तव दुःख-प्रतीकारं करोमि किञ्चित् ।"

दीर्घं उष्णं निःश्वसता रत्नेन सूचितः सर्वोऽपि यथावृत्तं वृत्तान्तः । कथं अहं तेन निर्भर्त्सितः 'क्रीतदास' इति शब्देन ? किं रहस्यं विद्यते अत्र ? कः एतादृशः गुह्यः व्यतिकरः । जिज्ञासामि तात ! सर्वमिदं यथातथम् ।

आकर्ण्य रत्नपालस्य पृच्छनं स्मेराननः जातः स परिणतवयाः । अनुभूतं अतीत प्रत्यक्षं परिस्फुरितं तस्य । अवक्तव्यं गुह्यमिदं ईषत्स्फुटिताधरोऽपि मूकायितः स्थितः ।

हिमदग्धमित्यर्थः । ४ त्रस्तम् 'त्रस्तस्य हित्थतट्ठौ (हे० २-१३६) ५ निर्भर्त्सितः ६ ईषत्स्फुटिताधरः 'दराड्ढाऽल्पे' (हे० २-११५) ७ मूकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पडिवय-सुणरोगतप्परं विलंबासहं विलोइअ बालमुहं अंते थेरेण सदक्खिण्णं मणयं रहस्सुग्घाडणं कयं—"पुत्त ! विचित्तोऽयं महारण्णरूवो संसारो। किमघडिअं ण घडइ एत्थ जंतूणं। ताव चिअ मणुओ उत्तप्पो[1] हवइ जाव तिणा ण अईअं पच्चक्खं कीरइ। अज्ज ! सव्वावि दिट्ठिपहमागच्छन्ती जगस्स लीला ण मायण्हि आइरित्ता[2]। केवलमासा णह-संकासा[3]। भद्द ! अलाहि रहस्स-पप्फोडणेण। खलइ मे रसणा ते इइवुत्तं पयडोकाउं। तहा वि अत्थि ते तिव्वा जिण्णासा, तो कहेमि किंचि तवाऽविण्णायं पुव्वचरिअं। सुणसु, आसि णयर-जणमाणणिज्जो अड्ढो ते पिया जिणदत्तो। पियंवया दाणसीला भाणुमई सक्खं लच्छी ते जणणी। आसी जया तुमं गब्भम्मि तयाणिं जाओ अकम्हा आवइतडी[4]-णिवाओ तुह सामिद्धीए उवरिं। सुमिणविलायं विलोणा सव्वावि वंस-परंपरा-संचिआ लच्छी। जाव दविणविणिमयेण मम्मण-गिहम्मि तुमं रक्खिऊण रयणीए अलक्खिआ अणत्थ पलाणा ते जणणी-जणया। एवं कहमाणो सो थेरो बाह-जलाउल-लोयणो संवुत्तो। आसी तुह पिआ मे परमो मित्तो। ण एआरिसो सुअणो मए दिट्ठो अण्णजणो पुत्त ! संपई ण जाणेमि कत्थ ते जवेंति विवआ-कालं। तुज्झ विरह-दुब्बला। कुल भाणुआ ! अत्थि तुम्हकेरं परमं किच्चमिणं जं लिहिआणुसारं णिय-हत्थेण पहूअं धणं विढविअ, रिणमुत्तो हविअ, पिअराणं च गवेसणं काऊण, तेहिं सद्धिं णिअं घरं गच्छेज्जा। सोम्म ! सो चिच्चिअ आणंदणो

---

१ उद्धताः २ मृगतृष्णातिरिक्ता-यथा—मायण्हिआ, झला (पाइयलच्छी ७४२) ३ नभोतुल्या ४ आपत्तडिन्निपातः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिवचः श्रवणैकतत्परं विलम्बासहं विलोक्य बालमुखं अन्ते स्थविरेण सदाक्षिण्यं मनाग् रहस्योद्घाटनं कृतम्—"पुत्र! विचित्रोऽयं महार्णवरूपः संसारः। किं अघटितं न घटते अत्र जन्तूनाम्? तावदेव मनुजः उद्धतो भवति यावत् तेन न अतीतं प्रत्यक्षं क्रियते। आर्य! सर्वापि दृष्टिपथं आगच्छन्ती जगतो लीला न मृगतृष्णातिरिक्ता। केवलं आशा नभः-सङ्काशा। भद्र! अलाहि रहस्य-प्रस्फोटनेन। स्खलति मे रसना तव इतिवृत्तं प्रकटीकर्तुम्। तथापि अस्ति ते तीव्रा जिज्ञासा तदा कथयामि किञ्चित् तव अविज्ञातं पूर्व-चरितम्। शृणु "आसीत् नगरजनमाननीयः आढ्यस्ते पिता जिनदत्तः। प्रियंवदा दानशीला भानुमती साक्षात् लक्ष्मीस्ते जननी। आसीत् यदा त्वं गर्भे तदानीं जातोऽकस्मात् आपत्तडिन्निपातस्तव समृद्धेः उपरि। स्वप्न-विलायं विलीना सर्वापि वंश-परम्परा-सञ्चिता लक्ष्मीः। यावद् द्रविण-विनिमयेन मन्मन-गृहे त्वां रक्षित्वा रजन्यां अलक्षितौ अन्यत्र पलायितौ ते जननी-जनकौ। एवं कथयन् स स्थविरः वाष्पजलाकुल-नयनः संवृत्तः। आसीत् तव पिता मे परमं मित्रम्। न एतादृशः सुजनः मया दृष्टः अन्यजनः। पुत्र! सम्प्रति न जानामि कुत्र तौ यापयतः विपत्कालं तव विरह-दुर्बलौ। कुलभानो! अस्ति त्वदीयं परमं कृत्यं इदं यत् लिखितानुसारं निजहस्तेन प्रभूतं धनं अर्जयित्वा ऋणमुक्तो भूत्वा पित्रोः गवेषणां कृत्वा तैः सार्धं निजं गृहं गच्छेः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णंदणो जो वंसुद्धार-कारगो अम्मापिऊणं सुहजणओ पुव्व-जाणं च विच्छोलिअ[1] णामधेयो धिप्पइ[2]। उअ[3], ण खेएण किमवि भविस्सइ, भविस्सइ किर महंतेण पुरिसत्थेण सव्वं। अत्थि मे कप्पणा, तुमं अवस्सं सुण्णं गिहं हरिअ-भरिअं काहिसि, इअ साहेऊण सहिअयो वुड्ढो वीसत्थ-दिट्ठीए पुत्तं रयणं पलोएउं लग्गो।

असुअ-पुव्वं कण्णकंटगाइअं णिअमईअमुअंतं मुणिऊण रयणवालो चित्तलिहिअव्व मंतकोलिअव्व थद्धो, उव्विग्गो, विम्हिओ, रोमंचिओ य जाओ। हरे! इत्तोप्पं ण विइआ मए अप्पणआ पउत्ती। हंदि! (सत्यं!) पिसुणिअं तेण अहमण्णेण। वेव्वे! (विषादे!) अहं कीअदासोम्हि। अव्वो! (पश्चात्तापे!) दलइ मे हिअयं अम्मा-पिऊणं तारिसी ठिई। थू! णिलज्जेण मे जीवणेण, जस्स जम्मो वि सव्व-विद्धंसकारगो! खु! किं मए एआरिसं कलु-समायरिअं! ऊ! केण ण विण्णायं मे कुलंगारचरिअं! अम्मो! कहमेआरिसं जायं! अइ[4]! दुहिआ विज्जंति मे परम-सिलाहणिज्जा पुज्जा पिअरा। अहह! जइ हं गब्भाओ पडंतो, ता पिअराण ण तारिसी ठिई हुंती। णवरि[5] किं कायव्वं मए? अलाहि मोरउल्ला बहु-चिंतणेण इण्हिं। अप्पणो[6] सव्वं सुहं भावि पुरिसत्थेण, इच्चाइ-बहुविगप्प-विलोडिअ-हिअय-सागरो थेरं पणमिऊण एक्कसरिअं तओ पचलिओ। कत्थइ रइमलभमाणो गिहमागओ। एगम्मि

---

१ धौतनामधेयः—यथा विच्छोलियं धोअं (पाइयलच्छी ९२१) २ दीव्यते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौम्य ! स एव आनन्दनो नन्दनः यः वंशोद्धारकारकः मातापितृणां सुखजनकः पूर्वजानां च विक्षालित-नामधेयः दीप्यते । पश्य, न खेदेन किमपि भविष्यति, भविष्यति किल महापुरुषार्थेन सर्वम् । अस्ति मे कल्पना त्वं अवश्यं शून्यं गृहं हरित-भरितं करिष्यसि इति कथयित्वा सहृदयो वृद्धो विश्वस्त-दृष्ट्या पुत्रं रत्नं प्रलोकितुं लग्नः ।

अश्रुतपूर्वं कर्णकण्टकायितं निजं अतीतं उदन्तं श्रुत्वा रत्नपाल-श्चित्रलिखितवत् मन्त्रकीलितवत् स्तब्धः, उद्विग्नः, विस्मितः, रोमाञ्चितश्च जातः । हरे ! इतः प्रभृति न विदिता मया आत्मीया प्रवृत्तिः । हन्दि ! (सत्यम्) पिशुनितं तेन अधमर्णेन । वेव्वे (विषादे) क्रीतदासोऽस्मि । अव्वो ! (पश्चात्तापे) दलयति मे हृदयं मातापित्रोः, तादृशी स्थितिः । थू ! निर्लज्जेन मे जीवनेन यस्य जन्मापि सर्वविध्वंसकारकम् । खु ! किं मया एतादृशं कलुषं आचरितम् ? ऊ ! केन न विज्ञातं मे कुलाङ्गारचरितम् । अम्मो ! कथं एतादृशं जातम् ? अइ ! (सम्भावने) दुःखितौ विद्येते मे परमश्लाघनीयौ पूज्यौ पितरौ । अहह ! यदि अहं गर्भात् अपतिष्यम् तर्हि पित्रोः न तादृशी स्थितिः अभविष्यत् । णवरि (आनन्तर्ये) किं कर्तव्यं मया ? अलाहि मुधा बहुचिन्तनेन इदानीम् । स्वयं सर्वं शुभं भावि पुरुषार्थेन, इत्यादि बहुविकल्प-विलोडित-हृदय-सागरः स्थविरं प्रणम्य झगिति ततः प्रचलितः ।

---

३ उअ, पश्य इत्यर्थे (हे० २-२११) ४ अइ संभावने (हे० २-२०५) ५ आनन्तर्ये ६ स्वयं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अणात्थुअम्मि[1] भूअलम्मि बाहुल्ल[2]-कवोल-णिमिअ-वामहत्थो भूमिं खणंतो णीरवं ठिओ।

इओ य मम्मणो वि मज्झण्ह-जम्मण-वेलं जाणिऊण मा बुभुक्खिओ चिरं चिट्ठउ रयणवालो पुत्तो'त्ति सत्तरं हम्मि-[3] अमागओ। परं ण णिअच्छिओ णयण-चंदो नंदो। किमे-अप्पभिइ ण पच्चावलिओ रिणमाणेउं गओ सो ? "भज्जे ! किं णागओ अहुणावहि तुह कोड-कोड्डाकारगो ? कहं तुमं पुत्त-चिंता-निरवेक्खा कज्जलग्गा चिट्ठसि ?" उट्टंकिअं उच्च सरं मम्मणेण।

"इआणिमेव आगच्छमाणो ईसिं मे लोअण-पहं पत्तो, पच्छा कहिं ठिओ'त्ति ण लक्खिओ मए चवल-चरिओ सो" णिवेइअं सच्छरिअं भज्जाए।

कत्थ लुक्किओ एसो'त्ति अह उवरिं अणुसंधाउं लग्गो मम्मणो झत्ति विम्हअ-खेअ-मिस्साए दिट्ठोए।

सुसिअ[4]-मुहसरोजो बहमाण-बाहधारो अणुड्ढीकय-कंधरो धरणि-वट्टम्मि ठिओ किवणेण पेक्खिओ पुत्तो।

अव्वो ! किमिणं, किमिणं ? केण वाम-विहिणा तुमं दूमिओ पुत्त ! रुअमाणो चिट्ठसि ? केण मयंधलेण ते अवराहो कओ ? कस्स अप्पिअं जीविअं जो तं[5] अवमण्णइ ? णिच्चं हंसतमुहो तुमं किणो विमणदुम्मणो ? किं ण लद्धं तए जहेच्छिअं वत्थुं ? किमज्ज खप्पुर[6]-सहावाए तुह माउआ अहरिओ[7] ? किमहवा रिणमदाउकामेण थड्ढेण

---

१ अनास्तृते २ वाष्पार्द्रकपोल-न्यस्तवामहस्तः ३ (दे०)। ४ शुष्कमुख-सरोजः ५ त्वाम् ६ रुक्षस्वाभावया ७ अधरितः-तिरस्कृतः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुत्रापि रतिं अलभमानः गृहं आगतः। एकस्मिन् अनास्तृते भूतले वाष्पार्द्र-कपोल-न्यस्त-वामहस्तः भूमिं खनन् नीरवं स्थितः।

इतश्च मन्मनोऽपि मध्याह्नजेमनवेलां ज्ञात्वा मा बुभुक्षितः चिरं तिष्ठतु रत्नपालः पुत्रः इति सत्वरं हर्म्यं आगतः। परं न निरीक्षितो नयनचन्द्रो नन्दः। किं एतत्प्रभृति न प्रत्यावलितः ऋणं आनेतुं गतः सः? "भार्ये! किं नागतः अधुनावधि तव क्रोड-क्रीडा-कारकः? कथं त्वं पुत्र-चिन्ता-निरपेक्षा कार्यलग्ना तिष्ठसि?" उट्टङ्कितं उच्चस्वरं मन्मनेन।

"इदानीमेव आगच्छन् ईषद् मे लोचनपथं प्राप्तः, पश्चात् कुत्र स्थितः इति न लक्षितो मया चपलचरितः सः" निवेदितं साश्चर्यं भार्यया।

'कुत्र निलीनः एषः' इति अधः उपरि अनुसन्धातुं लग्नः मन्मनः झटिति विस्मय-खेद-मिश्रया दृष्ट्या।

शुष्क-मुख-सरोजः वहद्वाष्पधारः अनुर्ध्वीकृत-कन्धरः धरणि-पृष्ठे स्थितः कृपणेन प्रेक्षितः पुत्रः।

अव्वो! किमिदं, किमिदम्? केन वाम-विधिना त्वं दूनः पुत्र! रुदन् तिष्ठसि? केन मदान्धेन तव अपराधः कृतः? कस्य अप्रियं जीवितं यस्त्वां अवमन्यते? नित्यं हसन्मुखः त्वं किणो (प्रश्ने) विमनोदुर्मनाः?

किं न लब्धं त्वया यथेष्टं वस्तु? किं अद्य खप्पुर-स्वभावया (रुक्षस्वभावया) तव मात्रा अधरितः? किमथवा ऋणं अदातुकामेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुमं पराहूओ ? भणसु, वच्छ ! भणसु जहावित्तं[1] वुत्तंतं, पुच्छेइ ते वाउलो जणओ सयराहमेव तप्पडिआरं काउकामो। एवमस्सासमाणेण मम्मणेण बाहाहिं साहरिअ उट्ठाविओ पुत्तो कोडीकओ। मत्थयं जिग्घेंतो णयणजलुल्लं लवणं लुंछिउं[2] लग्गो।

एवं मम्मणेण परिपुच्छिओ सग्गहं जहाभूअं वइअरं पयडीकाउं पेरिओ सगग्गरक्खरं रयणवालो फुडमकासी जहाणायं रहस्सं—"अत्थि[3] खु तत्थभवंता भवंता पिअरसमाणा मे सेट्ठिप्पवरा, परं ण मे जणगा जणगा वत्थुत्तो। बुज्झिअं मए अज्ज सव्वंपि गुज्झं। अत्थि सिणेहंकुरघणाघणो महामणो पयडसत्तो जिणदत्तो मे पुज्जो पिआ। पच्चक्खं पेम-णई भाणुमई मे जम्मदायिणी जणणी। हंत, हंत ! दरिद्द-दवदड्ढा मोत्तूण मं अत्थ-परावत्तेणं भे गिहम्मि, अण्णाया कत्थइ पवसिआ[4]। संपइ जइ मे जणणी-जणया आगम्म कहेंति "आगच्छ पुत्त !" तक्खणं अविलंबं तेहिं सद्धिं वच्चामि णीसंदेहं णिअं गिहं। हद्धी ! किं पर-गिहठिइसुहं सुहं ? तुडिअमुडजमवि णिअं णिअं, धवलगिहं पि पारक्कं पारक्केरं।" एवं भणंतो सो तारस्सरं परिदेविउं पउत्तो।

अविहाविअं, अवितक्कियं, अपच्चासिअं च सुणिआण रयणवयणं मम्मणेण अणुहूआ काइ असहणिज्जा अउला विअणा। तिव्वगइं पत्ता हिअयगई। विप्फारिअं जायं

---

१ यथावृत्तं २ मार्ष्टुम् ३ अत्थिस्त्यादिना (१४८) इति सूत्रेण बहुवचनेपि 'अत्थि' आदेशः ४ प्रोषिता।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तब्धेन त्वं पराभूतः ? भण वत्स ! भण यथावृत्तं वृत्तान्तम्, पृच्छति तव व्याकुलो जनकः शीघ्रमेव तत्प्रतीकारं कर्तुकामः। एवं आश्वसता मन्मनेन बाहुभ्यां संहृत्य उत्थापितः पुत्रः क्रोडीकृतः। मस्तकं जिघ्रन् नयनजलार्द्रं लपनं माष्टुं लग्नः।

एवं मन्मनेन परिपृष्टः साग्रहं यथाभूतं व्यतिकरं प्रकटोकर्तुं प्रेरितः सगद्गदाक्षरं रत्नपालः स्फुटं अकार्षीत् यथाज्ञातम् रहस्यम्— "सन्ति खलु तत्रभवन्तो भवन्तः पितृ-समानाः मे श्रेष्ठिप्रवराः, परं न मे जनकाः वस्तुतः। बुद्धं मया अद्य सर्वमपि गुह्यम्। अस्ति स्नेहाङ्कुर-घनाघनः महामनाः प्रकटसत्त्वः जिनदत्तः मे पूज्यः पिता। प्रत्यक्षं प्रेमनदी भानुमती मे जन्म-दायिनी जननी। हन्त ! हन्त ! दारिद्र्य-दवदग्धाः मुक्त्वा मां अर्थ-परावर्तनेन युष्माकं गृहे, अज्ञाताः कुत्रापि प्रोषिताः। सम्प्रति मे जननीजनकौ आगम्य कथयतः— 'आगच्छपुत्र' तत्क्षणं अविलम्बं तैः सार्धं व्रजामि निःसन्देहं निजं गृहम्। हद्धी ! किं परगृह-स्थिति-सुखं सुखम् ? त्रुटितं उटजमपि निजं निजम्, धवलगृहमपि परकीयं परकीयम्।" एवं भणन् स तारस्वरं परिदेवितुं प्रवृत्तः।

अविभावितं, अवितर्कितं, अप्रत्याशितं च श्रुत्वा रत्नवचनम् मन्मनेन अनुभूता कापि असहनीया अतुला वेदना। तीव्रगतिं प्राप्ता हृदयगतिः। विस्फारितं जातं नेत्र-युगलम्। चिरसंस्थाना आशा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नेत्त-जुअलं । चिर-संखाया[1] आसा हिम-पिंडलिया इव तरलिआ जाया ! ऊ ! को पोरच्छ[2]-पुरच्छिमो अस्स मित्तिओ मे जन्म-जम्मंतर-पडिवक्खो ? हा ! खु खलेण सुघडिओ सुमंडिओ वंस-पासाओ अणट्ठं भूमिसाकओ । पिसुण ! किं ते हत्थम्मि आगयं मे कप्पणा[3]-कप्पतरु-कप्पणेण ? वत ! विचित्तो मुहुमुहाणं[4] सहावो जमकारणं ते पर-दुहेण सुहिआ, परणासेण य तुट्ठा दुट्ठा । अरे ! निरट्ठया जाया सव्वावि अस्स लालणा पालणा । उअ, हवइ किं पर-पुत्तेण वासिअं गिहं ? एवं बहु विकप्पंतो सो मम्मणो कमवि उवायं गवेसंतो वोत्तं पउत्तो—"पुत्त ! केण तुमं पर-सुह-दुब्बलेण खलेण मुहा भुल्लविओ", निरट्ठयमासंकं च पाविओ सि ? को जिणदत्तो ? का भाणुमई ? केण दुहिलेण घडिआणि कवोल-कप्पिआणि अमूइं णामधिज्जाणि ? ता मा भुल्लिरो भवसु, सिग्घं चलसु, कुणसु य सहभोअणं । उअ, हवइ सीअला णाणावंजण-संजुआ सरसा रसवई । पडिक्खइ तुह माया जायमपासंती गहिल्लीभूआ ।"

अलाहि सेट्ठिप्पवर ! जहत्थवत्थूवरिं कवड-पडाखेवेण बहुजायमिणमो जमज्जप्पभिइ रक्खिओहं संतमसम्मि । संपइ पज्जलिओ मे णाणप्पईवो । अहवा विभाया[5] मे भंति-सामिणी[6] अण्णाण-जामिणी । पुव्वं कायव्वा महं पवास-गमण-ववत्था, पच्छा गहिस्समहं किंपि भोअणं । हंत ! जइ मए एसो वुत्तंतो पुव्वं जाणिओ हुंतो तो किअंतं सुंदरं हुंतं ?" णीसंकं वंजिअं बालेणावि रयणवालेण ।

---

१ चिरसंस्त्याना 'समः स्त्यः खेः (हे० ४—१५) २ पोरच्छः खलः-तत्र पौरस्त्यः प्रथमः, धूर्तशेखर इत्यर्थः ३ कल्पना-कल्पतरु-कल्पनेन, कल्पनं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हिम-पिण्डलिका इव तरलिता जाता। ऊ! कः पोरच्छ्-पौरस्त्यः (धूर्तशेखरः)अस्य मिलितो मे जन्मजन्मान्तरप्रतिपक्षः? हा! खलु खलेन सुघटितः सुमण्डितो वंश-प्रासादः अनर्थं भूमिसात् कृतः। पिशुन! किं ते हस्ते आगतं मे कल्पना-कल्पतरु-कल्पनेन? बत! बत! विचित्रो मधुमुखानां (पिशुनानां) स्वभावो यत् अकारणं ते परदुःखेन सुखिताः परनाशेन च तुष्टाः दुष्टाः। अरे! निरर्थका जाता सर्वापि अस्य लालना पालना। उत! भवति किं पर-पुत्रेण वासितं गृहम्? एवं बहु विकल्पयन् स मन्मनः कमपि उपायं गवेषयन् वक्तुं प्रवृत्तः— "पुत्र! केन त्वं परसुख-दुर्बलेन खलेन मुधा भ्रंशितो निरर्थकं आशङ्कां च प्रापितः असि? को जिनदत्तः? का भानुमती? केन द्रुहिलेन घटितानि कपोल-कल्पितानि अमूनि नामधेयानि? ततः मा भ्रान्तिभाग् भव, शीघ्रं चल, कुरु च सहभोजनम्। पश्य, भवति शीतला नाना-व्यञ्जन-संयुक्ता सरसा रसवती। प्रतीक्षते तव माता जातं अपश्यन्ती ग्रथिलीभूता।

अलाहि श्रेष्ठिप्रवर! यथार्थ-वस्तुपरि कपट-पटाक्षेपेण। बहु जातं इदं यत् अद्यप्रभृति रक्षितोऽहं सन्तमसे। सम्प्रति प्रज्वलितः मे ज्ञानप्रदीपः। अथवा विभाता मे भ्रान्ति-स्वामिनी अज्ञान-यामिनी। पूर्वं कर्तव्या मम प्रवासगमन-व्यवस्था। श्चात् ग्रहीष्यामि अहं किमपि भोजनम्। हन्त! यदि मया एष वृत्तान्तः पूर्वं ज्ञातः अभविष्यत् तदा कियत् सुन्दरं अभविष्यत्।" निःशङ्कं व्यञ्जितं बालेनापि रत्नपालेन।

छेदनमित्यर्थः ४ मुहुमुहुः-पिशुनः तेषाम् ५ भुल्लविओ भ्रंशितः, 'भ्रंशेः फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः' (हे० ४-१७७) ६ विभाता-विभातं-प्रभातं प्राप्तेत्यर्थः ७ भ्रान्ति-स्वामिनी-भ्रान्तिमयीत्यर्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"हा ! केण सढेण विवरीअं पाडिओ एसो दढयाए। चित्तं ! अस्स सहावम्मि केरिसी रुक्खमा समागया। अच्चंतं लज्जिरो अप्पभासी वि अज्ज केरिसो वायालो थूलवयो य जाओ। धी धी धी ! उप्फालेण[1] सव्वमवि णिप्फलं कयं। असज्झोयं रोओ। पच्चक्खं णिरासा इमस्स आसा" अवसिअं मम्मणेण।

"काहं सव्वमवि पबंधं सयराहमेव पुत्त ! अहुणा तु भोअणं घेत्तव्वं[2]।" कहमाणेणमेवं सेट्ठिणा उट्ठाविओ पुत्तो भोअणट्ठं। अणासाइअ-रसा सरसा वि रसवई कहं कहमवि आसाइआ एएहिं। एत्थंतरम्मि आहूआ मम्मणेण णिअसंतिआ वाणिज्जकुसला पुरिसा। साहिअं सव्वंपि करणिज्जं। सज्जीकयं जाणवत्त[3]। एत्थ सुलभेण भंडेण भरिअं तं। पसत्थ-तिह-करण-जोग-संजुआ सुहमुहुत्ता पत्थाण-वेला णिच्छिआ। आगए तम्मि समये सव्वेसिं सम्मुहं सविणयं जणय-थाणीअं मम्मणं पणमंतेण रयणेण सूइअं-'मज्झ कएणं कयं पिउपायस्स रिणं मोयावेउं गच्छामि अहमज्ज देसंतरं। एवइअकालं अहमेत्थ परमाणंदेण ठिओ, ओरस-पोअव्व परम सिणेहेण लालिओ पालिओ सव्वंगिअं सुहं च पत्तो। एएसिं महाणुहावाणं अज्जवि तारिसी पीई। तहवि मए कत्तव्वं पालणिज्जं'ति पवासेमि संइ। जाणवत्तम्मि जं भंडं विक्केअं तं सव्वं सेट्ठिणो विज्जइ, ण किंचिवि महं। देसंतरं गंतूण भंडं विक्किअ जं लाहं लहिस्सं तेण पिउपायेण गहिअं सकुसीअं धरणं तहा जाणवत्तगयं पि दव्वं पच्चप्पिणिस्सं।

---

१ उप्फालेण-मच्छरिणा यथा—पोरच्छो, पिसुणो, मच्छरी, खलो, मुहमुहो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"हा ! केन शठेन विपरीतं पाठितः एष दृढतया। चित्रं ! अस्य स्वभावे कीदृशी रुक्षता समागता। अत्यन्तलज्जालुः अल्पभाषी अपि अद्य कीदृशो वाचालः स्थूलवचाश्च जातः। धिग् ! धिग ! उप्पालेन (मत्सरिणा) सर्वमपि निष्फलं कृतम्। असाध्योऽयं रोगः। प्रत्यक्षं निराशा अस्य आशा" अवसितं मन्मनेन।

"करिष्यामि सर्वमेव प्रबन्धं शीघ्रमेव पुत्र ! अधुना तु भोजनं गृहीतव्यम्।[1]" कथयता एवं श्रेष्ठिना उत्थापितः पुत्रो भोजनार्थम्। अनासादितरसा सरसा अपि रसवती कथं कथमपि आसादिता एताभ्याम्। अत्रान्तरे आहूताः मन्मनेन निजसत्काः वाणिज्य-कुशलाः पुरुषाः। कथितं सर्वमपि करणीयं कार्यम्। सज्जीकृतं यानपात्रम्। अत्र सुलभेन भण्डेन भरितं तत्। प्रशस्त-तिथि-करण-योग-संयुता शुभमुहूर्ता प्रस्थानवेला निश्चिता। आगते तस्मिन् समये सर्वेषां सम्मुखं सविनयं जनक-स्थानीयं मन्मनं प्रणमता रत्नेन सूचितम्— "मम कृते कृतं पितृपादस्य ऋणं मोचयितुं गच्छामि अहं अद्य देशान्तरम्। एतावत्कालं अहमत्र परमानन्देन स्थितः, औरसपोतवत् परमस्नेहेन लालितः पालितः सर्वाङ्गीणं सुखं प्राप्तः। एतेषां महानुभावानां अद्यापि तादृशी प्रीतिः। तथापि 'मया कर्तव्यं पालनीयम्' इति प्रवसामि सम्प्रति। यानपात्रे यत् भण्डं विक्रेयं तत् सर्वं श्रेष्ठिनः विद्यते, न किञ्चिदपि मम। देशान्तरं गत्वा भण्डं विक्रीय यल्लाभं लप्स्ये तेन पितृ-पादस्य गृहीतं सकुसीदं[4] धनं तथा यानपात्रगतमपि द्रव्यं प्रत्यर्पयिष्यामि। प्रस्थानकालिकं पारितोषिकं यद्-

---

१ उप्पालो (पा० १२३) २ गृहीतव्यम् ३ यानपात्रम्-पोत इत्यर्थः। ४ सकुसीदम्—'ब्याज सहित' इति भाषा।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पट्ठाण-कालिअं पारिओसिअं[1] जं किंचिवि सेट्ठि-सगासाओ पाविस्सं, तस्स लाहं गहिस्सं सयमेवाहं, ण पच्छा करिस्सं तं सेट्ठिणो पुण । इअ आयण्णिअ कयज्जं[2]-सेहरो मम्मणो किमप्पेमि'त्ति संसयं पत्तो । अंतम्मि अईव तुच्छत्तणं दक्खवेंतेण दढमुट्ठिणा अप्पिया 'मेमुंदी' णामिआ एगा तक्कालिआ खुद्दा मुद्दा पारिओसिअ-रूवेण । सव्वेसिं पासगाणं मणेसुं अईव हीणत्तं पत्तो सो किविणो इमिणा अइतुच्छदाणेण । धिअ ! दढमुट्ठिणो णिग्घिणं हिअयं णिल्लज्जं दाणं, चिरपोसिअेण पुत्तेणावि केरिसो ववहारो ? तहवि समयण्णूणा रयणेण साणंदं गहिआ सा, मत्थयत्थं काऊण सुरक्खिअं रक्खिआ । भवंताणं किवाओ बहुलाह-कारणं भव्विस्सइ मे णूणं दाणमिणं लघिट्ठं लक्खिज्जमाणमवि । अहवा सण्हमवि णग्गोह-बीअं ण किं महावित्थार-कारणं होइ ?

इअ सिरिचंदणमुणि-विरइआए पाउसागमामरचंदणपत्तीधणदत्त-विप्पतारण-पुत्तपरिवड्ढण-णिअपरिण्णाणाइभावेहिं भाविआए रयणवालकहाए
तइओ ऊसासो समत्तो

१ पारितोषिकम्-इनाम 'सीख' इतिभाषा २ कदर्यशेखरः—कृपणप्रमुखः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किञ्चिदपि श्रेष्ठि-सकाशात् प्राप्स्यामि तस्य लाभं ग्रहीष्यामि स्वयमेव अहम्, न पश्चात् करिष्यामि तत् श्रेष्ठिनः पुनः। इति आकर्ण्य कदर्य-शेखरः मन्मनः 'किं अर्पयामि' इति संशयं प्राप्तः। अन्ते अतीव तुच्छत्वं दर्शयता दृढमुष्टिना अर्पिता 'मेमुँदी' नामिकी एका तात्कालिकी क्षुद्रा मुद्रा पारितोषिक-रूपेण। सर्वेषां दर्शकानां मनसि अतीव हीनत्वं प्राप्तः स कृपणः अनेन अतितुच्छ-दानेन। धिग्! दृढमुष्टेः निर्घृणं हृदयम्, निर्लज्जं दानम्, चिरपोषितेन पुत्रेणापि कीदृशो व्यवहारः? तथापि समयज्ञेन रत्नेन सानन्दं गृहीता साः। मस्तकस्थं कृत्वा सुरक्षितं रक्षिता। भवतां कृपातः बहुलाभ-कारणं भविष्यति मे नूनं दानमिदं लघिष्ठं लक्ष्यमाणमपि। अथवा सूक्ष्ममपि न्यग्रोध-बीजं न किं महाविस्तार-कारकं भवति?

इति श्री चन्दनमुनिविरचितायां प्रावृडागमामर-
चन्दनप्राप्ति-धनदत्तविप्रतारण-पुत्रपरिवर्धन-
निजपरिज्ञानादिभावैर्भावितायां
रत्नपालकथायां तृतीयः
उच्छ्वासः समाप्तः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४

चोत्थो ऊसासो

अत्थि एसो तेलुक्क-विइओ पयडीए णिअमो जं जारिसी सुहाऽसुहा जस्स भावणा तारिसो च्चिअ परिणामो पुरस्सरो होइ । णिच्चं आमं[1] सरेमाणा हवंति आमयाविणो तहा आरुग्गं कप्पंता अरोआ । ण तेहिं कयाइ उच्चयं पयं पाविज्जइ जेसिं मणम्मि णिच्चं अणासा, दुब्बलं, अप्पणोवि अ अवोसासो परिप्फुरइ । "गयगया अम्हारिसाणं दिअहा । संपइ तु जहाकहंचि कालो जवणिज्जो अम्हेहिं । आगमिस्सइ अम्हाणमवि कोइ अणुलोमोऽवसरो तयाणि चिंतिस्सामो किमवि काउं" इत्थं जे पडिसमयं णिअयं वेअल्ल[2] मणुहवंति ण ते पंचजणा कत्थइ कयत्था, फलिअ-मणोरहा, सागार-सुमिणा य होउमरिहंति । वट्टंति जेसिमुआरा विआरा, सुह-

१ रोगम् २ असामर्थ्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४

चतुर्थ उच्छ्वासः

अस्ति एष त्रैलोक्य-विदितः प्रकृत्याः नियमः यत् यादृशी शुभाशुभा यस्य भावना तादृशः एव परिणामः पुरस्सरो भवति। नित्यं आमं स्मरन्तः भवन्ति आमयाविनः तथा आरोग्यं कल्पन्तः अरोगाः। न तैः कदापि उच्चैः पदं प्राप्यते येषां मनसि नित्यं अनाशा, दौर्बल्यं, आत्मनोऽपि च अविश्वासः परिस्फुरति। "गतगता अस्मादृशानां दिवसाः। सम्प्रति तु यथाकथञ्चित् कालः यापनीयः अस्माभिः। आगमिष्यति अस्माकमपि कोऽपि अनुलोमोऽवसरस्तदानीं चिन्तयिष्यामः किमपि कर्तुम्" इत्थं ये प्रतिसमयं निजकं वैकल्यं अनुभवन्ति, न ते पञ्चजनाः कुत्रापि कृतार्थाः, फलित-मनोरथाः, साकार-स्वप्नाश्च भवितुं अर्हन्ति। वर्तन्ते येषां उदारा विचाराः, शुभङ्करा कल्पना,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

करा कप्पणा, संव्वंगिग्रं हिग्रं, अकलुसं च चित्तं, तेसिं सव्वत्थ सुहं सुहं संमुहीणं। आवइ-समयम्मि वि ण सुक्कइ[1] तेसिं आसा-ओज्झरो[2]। भयाणय-णिसीहम्मि वि य दिट्ठि पहं गच्छइ दिणमुहं। मिलइ सयमेव विहिअ-सुहासय-वित्थारो अचिंतिओ परेसिमत्थारो[3]। तम्हा अत्थि उच्छाहो किर सव्व-सभलयाए मूलं, कप्पणाण कप्परुक्खो, कामाण कामकुंभो, चिंतिआण चिंतामणी पुण।

वड्ढमाणंतरंग-उच्छाहो अणेगवयंसेहिं परिवारिओ, गुरुजणासीसाहिं आसासिओ, मंगल-पाढगेहिं माघहेहिं थुणिओ, सम्मुहं सयमुवट्ठिएहिं सुह-सउणेहिं वड्ढाविओ, अणुऊल-वायावरणेहिं चोइओ य रयणवालो मम्मण-गिहाओ णिग्गओ। मज्झेपहं मत्थय-ठविअ-पुप्फकरंडिआ अहिमुहमाच्छंती मिलिआ एगा पुप्फच्चिणिआ[4]। बहु-सुहं पट्ठिआणं'ति रयणेण तक्कालं गहिआ पुप्फ करंडिआ[5] दाऊण तीसे मम्मणप्पिअं लहुमुद्दादाणं। ताए[6] दाडिमस्स धायईए य सज्जुक्काणि सुरहिआणि पुप्फाणि आसी। सुहाणि'त्ति सुरक्खिआणि ताणि विवेगिणा रयणेण। परमेट्ठि-पंचगं सरेंतो अणेग[7]-बाणोत्तरेहिं सद्धिं गुरु-जणे पणमंतो जाव आरुहइ पवहणं ताव एगेण अणुहविणा थेरेण आगम्म सूइअं "पुत्त ! जहेच्छं वच्चसु, लहसु पुण्णं लाहं, परंतु मा वच्चसु कालकूड-णामगं दीवं। जओ तत्थ गंतारा विप्पलंभिज्जंति तत्थगय-धुत्तसेहरेहिं।" 'हंता' इअ कहंतेण रयणेण पडिवण्णं

---

१ सुक्कइ (अकर्मक०) २ आशानिर्झरः यथा—ओज्झरं निर्झरं जाण (पा० ६५७) ३ साहिज्जं अत्थारो (पाइय०) साहाय्यमित्यर्थः ४ 'मालण' इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वाङ्गीणं हितं, अकलुषं च चित्तं, तेषां सर्वत्र सुखं सुखं सम्मुखीनम्। आपत्-समयेऽपि न शुष्यति तेषां आशा-निर्झरः। भयानकनिशीथेऽपि च दृष्टिपथं गच्छति दिनमुखम्। मिलति स्वयमेव विहित-शुभाशय-विस्तारः अचिन्तितः परेषां अत्थारः (साहाय्यम्)। तस्मात् अस्ति उत्साहः किल सर्वसफलताया मूलम्, कल्पनानां कल्पवृक्षः, कामानां कामकुम्भः चिन्तितानां चिन्तामणिः पुनः।

वर्धमानान्तरङ्गोत्साहः अनेकवयस्यैः परिवारितः, गुरुजनाशीर्भिः आश्वासितः, मङ्गलपाठकैर्मागधैः स्तुतः, सम्मुखं स्वयमुपस्थितैः शुभ-शकुनैः वर्धापितः, अनुकूलवातावरणैः चोदितः (प्रेरितः) च रत्नपालः मन्मनगृहात् निर्गतः। मध्येपथं मस्तकस्थापितपुष्पकरण्डिका अभिमुखं आगच्छन्ती मिलिता एका पुष्पचायिनी। 'बहु शुभं प्रस्थितानाम्' इति रत्नेन तत्कालं गृहीता पुष्प-करण्डिका दत्वा तस्यै मन्मनार्पितं लघुमुद्रादानम्। तस्यां दाडिमस्य धातक्याश्च सद्यस्कानि सुरभितानि पुष्पाणि आसन्। 'शुभानि' इति सुरक्षितानि तानि विवेकिना रत्नेन। परमेष्ठिपञ्चकं स्मरन् अनेक बाणोत्तरैः ("मुनीम" इति भाषायाम्) सार्धं गुरुजनेभ्यः प्रणमन् यावद् आरोहति प्रवहणं तावदेकेन अनुभविना स्थविरेण आगम्य सूचितम्—'पुत्र! यथेच्छं व्रज, लभस्व पूर्णं लाभम्, परन्तु मा व्रज कालकूटक-नामकं द्वीपम्। यतः तत्र गन्तारो विप्रलभ्यन्ते तत्रगतधूर्तशेखरैः'। 'हन्ता' (अभ्युपगमे) इति कथयता रत्नेन प्रतिपन्नं तस्य वचनम्। विमुक्ताः लङ्गरकाः ('लंगर'

भाषा। यथा—पुप्फच्चिणिआओ पुप्फलाईओ (पाइय० २१३) ५ फूलों की टोकरी ६ तीसे। ७ बाणोत्तरः 'गुमास्ता मुनीम' इतिभाषा (दे०)।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्स वयणं। विमुत्ता णंगरआ। वायाणुऊलं पूरिओ सिअ-पडो। चालिअं बोहित्थं णिज्जामगेहिं। जहा-जहा तमग्गओ परिवड्ढिअं तहा-तहा अथग्घ-जलरासि-मज्झगयं उवरिं आगासं परिओ णीरं णीरमेव नयण-पहमोअरिअं। किं सव्वावि धरा जलमइया जलजलागारा संवुत्ता। अव्वो! दंसणिज्जा ठिई तत्त-दंसगेहिं पारावारस्स। मा सोमुल्लंघणं होउ'त्ति मणे संकिआओ मिव अग्गओ सरमाणीओ वि वीईओ पुणो पच्छा ओसप्पंति[1]। ण महंतएहि सत्तिप्पदंसणं कायव्वं'त्ति मणे महासामत्थसाली खणेण जीवलोगं पव्वा-लेउं[2] खमोवि समुद्दो समेरो चिट्ठइ। तम्हा 'सायरवर-गंभीर'त्ति आगमिएहिं तित्थगराणं कए तारिसो उवमा उवढोइआ। विअरणेण ण दाण-सुंडाणं धणहाणी भवेज्ज'त्ति सुण्णाइं महापयोहरोअराणि सययं भरमाणो वि णरित्तिमं पत्तो म्हि'त्ति दक्खवेंतो मणे सो उल्लोल-कल्लोलेहिं रेहइ। तेहिं खु पत्तव्वाणि महग्घ-रयणाणि मुत्ताहलाणि अ जे अभीआ णिण्ण-जलमज्झप्पवेसणपरा हत्थगयप्पाणा सिआ य धीवरा, ण उण दरिअ-हिअयेहिं णवर पुलिण-चंकमणप्प-वणेहिं'ति दंसेंतो इव विइण्ण[3]-सण्ह-संख-सुत्ति-उक्केर-वित्थिण्णेण तडेण अग्घइ। एवं कव्व-कप्पणा-परो भणुमई-सुओ मज्झेसमुद्दं सकुसलं वच्चइ।

जं जं चिंतेइ अप्पण्णू मणुओ तं तं सव्वं तारिसं होइ'त्ति ण णिच्छिओ णिअमो। अव्वो! मणुअ-चिंतिअं जइ

---

१ अवसर्पन्ति २ पव्वालेउं—प्लावयितुम् 'प्लावेरोम्वालपव्वाली (हे० ४-४१) ३ विकीर्णश्लक्ष्णशङ्खयुक्त्युत्तत्करविस्तीर्णेन।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति भाषायाम्) वातानुकूलं पूरितः सितपटः । चालितं बोहित्थं (नौका इति भाषायाम्) निर्यामकैः । यथा यथा तद् अग्रतः परिवर्धितं तथा तथा अस्ताघ-जलराशि-मध्यगतं उपरि आकाशं परितो नीरमेव नयनपथं अवतरितम् । किं सर्वापि धरा जलमयी जलजलाकारा संवृत्ता ? अव्वो ! दर्शनीया स्थितिः तत्त्वदर्शकैः पारावारस्य । 'मा सीमोल्लङ्घनं भवतु' इति मन्ये शङ्किताः इव अग्रतः सरन्त्योऽपि वीचयः पुनः पश्चात् अवसर्पन्ति । 'न महद्भिः शक्तिप्रदर्शनं कर्त्तव्यम्, इति मन्ये महासामर्थ्यशाली क्षणेन जीवलोकं प्लावयितुं क्षमोऽपि समुद्रः समर्यादः तिष्ठति । तस्मात् 'सागरवरगम्भीराः' इति आगमिकैः तीर्थकराणां कृते तादृशी उपमा उपढौकिता । 'वितरेण न दान-शौण्डानां धनहानिर्भवेत्' इति शून्यानि महापयोधरोदराणि सततं बिभ्रद् अपि न रिक्ततां प्राप्तोऽस्मि' इतिदर्शयन् मन्ये उल्लोलकल्लोलैः राजते । तैः खलु प्राप्तव्यानि महार्घ्य-रत्नानि मुक्ताफलानि च ये अभीताः निम्न-जलमध्य-प्रवेशनपराः हस्तगत-प्राणास्युश्च धीवराः, न पुनः दरितहृदयैः केवलं पुलिन-चङ्क्रमण-प्रवणैः इति दर्शयन् इव विकीर्णश्लक्ष्ण-शङ्ख-शुक्त्युत्कर-विस्तीर्णेन तटेन राजते । एवं काव्य-कल्पनापरः भानुमतीसुतः मध्ये-समुद्रं सकुशलं व्रजति ।

यद् यत् चिन्तयति अल्पज्ञः मनुजः तत् तत् सर्वं तादृशं भवतीति न निश्चितः नियमः । अव्वो ! मनुजचिन्तितं यदि सर्वं साकारं सम्पद्यते, तदा एकेन खलु क्षणेन विसंस्थुलं जायते जगतीकार्यम्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सव्वं सागारं संपज्जइ तया एगेण खलु खणेण विसंठुलं[1] जायइ जगई-कज्जं। अत्थवत्था होइ च अदिट्ठा ववत्था। विचित्तं रहस्सं विज्जए एत्थ। लक्खंति केइ अलक्ख-लक्खणसहा महामेहाविणो जणा।

अयंडं सव्वरीए पज्जोइआ विज्जू। उट्ठिआ मुइरा[2]। कण्णं गओ थणिअ-सद्दो। पज्झरिउं[3] पउत्ता बहला जल-धारा। पत्थरिअं गाढं धयारं। वाओ सवेगं झंझा-पहंजणो। संगोविअमवि जाणवत्तं सतंतमिव अकलिअ-ककुहं[4] विहिपेरिअं मणे धावेउं लग्गं इओ तओ। तत्था सव्वेवि जणा तत्था एजमाणंतक्करणा किंकायव्व-विमुहा सुमरिअ-णिअ-णिअ-इट्ठ-देवा संजाया। कण्णधारेहिं अईव पयट्टिअं पोअं रोद्धुं, तहवि पडिऊल-पवणेण पणुल्लिअं[5] भावि-वसंवयं तं एगं अलक्खिअं दीवं पत्तं। पहाया रयणो। संता वुट्ठी। उवतडं संदाणिअं[6] जाणवत्तं। उग्गओ दिणयरो। कोऽयं दीवो'त्ति जागरिआ पबला जिण्णासा। पवहणाओ उत्तरिओ रयण-वालो जाव पय-ण्णासं कुणइ पुलिणम्मि ताव सम्मुह-मागच्छंतो एगो मणुओ लोअण-मग्गं गओ। वाहित्तो सो समीवमागओ। पुट्ठं रयणवालेण को एसो पएसो'त्ति। जाणाविअं तेण तक्कालं। "कुमार! अत्थि एसो कालकूडा-ऽहिआणो दीवो। एत्थ नाणा-णियडी-भेअ-कुसलो[7] पइदिण मायरिअ-दंभचरिओ सव्व-धुत्तसेहरो 'कसिणायणो' णामं णिवई। एगेगओ अहिअयरा धुत्तप्पहाणा महुरालावा

---

१ अव्यवस्थितम् २ मुदिरा :—मेघाः ३ क्षरितुम् 'क्षरः खिर-कर-पज्झर-पच्चड-णिच्चल-णिट्ठआः (हे० ४-१७३) ४ अकलितदिक् ५ प्रेरितम् (प्र०-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्तव्यस्ता भवति च अदृष्टा व्यवस्था। विचित्रं रहस्यं विद्यते अत्र। लक्षयन्ति केऽपि अलक्ष्यलक्षणसहाः महामेधाविनो जनाः।

अकाण्डं शर्वर्यां प्रद्योतिता विद्युत्। उत्थिताः मुदिराः। कर्णं गतः स्तनित-शब्दः। क्षरितुं प्रवृत्ता बहला जलधारा। प्रस्तृतं गाढान्धकारम्। वातः सवेगं झंझा-प्रभञ्जनः। सङ्क्षोपितमपि यानपात्रं स्वतन्त्रमिव अकलित-ककुब् विधि-प्रेरितं मन्ये धावितुं लग्नमितस्ततः। तत्स्थाः सर्वेऽपि जनाः त्रस्ताः एजमानान्तःकरणाः किंकर्त्तव्य-विमुखाः स्मृत-निज-निजेष्टदेवाः संजाताः। कर्णधारैः अतीव प्रयतितं पोतं रोद्दुम्, तथापि प्रतिकूल-पवनेन प्रेरितं भावि-वशंवदं तत् एकं अलक्षितं द्वीपं प्राप्तम्। प्रभाता रजनी। शान्ता वृष्टिः। उपतटं सन्दानितं यानपात्रम्। उद्गतः दिनकरः। 'कोऽयं द्वीपः' इति जागरिता प्रबला जिज्ञासा। प्रवहणात् उत्तरितो रत्नपालः यावत् पदन्यासं कुरुते पुलिने तावत् सम्मुखं आगच्छन् एको मनुजः लोचनमार्गं गतः। व्याहृतः स समीपं आगतः। पृष्टः रत्नपालेन-'कः एष प्रदेशः' इति। ज्ञापितं तेन तत्कालम्-"कुमार! अस्ति एष कालकूटाभिधानः द्वीपः। अत्र नाना-निकृति-भेद-कुशलः प्रतिदिनं आचरितदम्मचरितः सर्व-धूर्त-शेखरः 'कृष्णायनः' नाम नृपतिः। एकैकतः अधिकतराः धूर्त-प्रधानाः मधुरालापाः सत्यापिताक्षुण-यथार्थ-व्यवहाराः

णुद् इत्यस्य रूपम् ६ सन्दानितम्-बद्धमित्यर्थः ७ नानानिकृतिभेदकुशलः (निकृतिर्दम्भचर्या)।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सच्चविआऽखूण[1]-जहत्थ-ववहारा अत्तत्था सव्वेवि पउरा। विहि-वसओ कोइ भद्दो संजत्तिओ[2] समागच्छइ एत्थ, सो गिद्धेहिं मय-कलेवरमिव खंडखंडिओ, विप्पलंभिओ, महादारिद्दं पाविओ य होइ। मए सद्धिं वि एआरिसी भिसं णिअडीमइआ घडणा घडिआ।

जहा-भरिअ-भंडो जाणवत्तेण पारावारं पारं कुणमाणो पडिऊलपहंजण-पणुल्लिओ दुव्विहि-वसंवओ एत्थ कालकूडदीवम्मि समावडिओ। अमुणिअ-वंचण-प्पवंचेण मए विहाविअं जमत्थि मह पासे एगं महामुल्लिल्लं रयण-करंडगं णिच्चं कुसंका-कुलाए पलंबाए तरंगमालिणो जत्ताए तस्स समीवे रक्खणं ण खेमंकरं, तम्हा वच्चेमि मज्झेणयरं पलोएमि अ कमवि पुण्णं णीइमंतं विक्खाय-सच्च-हरिअंदं तं ठावेउं थावण-रूवेण (णासरूवेण) तस्स समीवं, जहा पच्चावलेंतो णेण मग्गेण पुणो सुरक्खिअं पाएज्जा णिअं णिहिं। इअ विचिंतिअ गहिअ-रयण-करंडिओ पट्टणं पत्तो, को तारिसो सच्चवाइ-सेहरो'त्ति अणुसंधाउं लग्गो। णव्वं पवासुअं मं पलोइअ घय-धण्णाइ विक्कयकारगो कोइ आवणिओ पुव्वसंगओ मिव 'सागयं-सागयं' साहेंतो सेराणणो सम्मुहमागओ, सबाहुक्खेवं मिलेंतो सो कुसलं च पुच्छेउं पउत्तो। कमवि भद्दं पुरिसं णच्चाहं तयावणम्मि गओ, उच्चासणम्मि णिवेसिओ य तेण सद्धिं सप्पेमं संलविउमाढत्तो। सव्वं धवलं धवलं दुद्धं'ति विसासिरेण मए णिअवत्थुरक्खणट्ठं सग्गहं पत्थिओ सो, दंसिअं महग्घं वत्थुमवि। मणसा तं रक्खिउं अईव तप्परोवि सो अलवलवसहो[3] सं

---

१ सत्यापिताक्षूण—यथार्थव्यवहाराः २ सांयात्रिकः—पोतवणिक्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्रस्थाः सर्वेऽपि पौराः। विधिवशतः कोऽपि भद्रः सांयात्रिकः समागच्छति अत्र, स गृद्धैः मृतकलेवरमिव खण्डखण्डितः विप्रलब्धः, महादारिद्र्यं प्रापितश्च भवति। मया सार्धं अपि एतादृशी भृशं निकृतिमयी घटना घटिता।

यथा-भरितभण्डो यानपात्रेण पारावारं पारं कुर्वन् प्रतिकूल-प्रभञ्जन-प्रेरितः दुर्विधिवशंवदोऽत्र कालकूटद्वीपे समापतितः। अज्ञात-वञ्चना-प्रपञ्चेन मया विभावितं यद् अस्ति मम पार्श्वे एकं महामूल्यवत् रत्न-करण्डकम्। नित्यं कुशङ्काकुलायां प्रलम्बायां तरङ्गमालिनः यात्रायां तस्य समीपे रक्षणं न क्षेमंकरम्, तस्माद् व्रजामि मध्येनगरं विलोके च कमपि पूर्णं नीतिमन्तं विख्यातं सत्यहरिश्चन्द्रं तत् स्थापयितुं स्थापनरूपेण (न्यासरूपेण) तस्य समीपम्, यथा प्रत्यावलमानः अनेन मार्गेण पुनः सुरक्षितं प्राप्नुयां निजं निधिम्। इति विचिन्त्य गृहीत-रत्नकरण्डिकः पत्तनं प्राप्तः, कस्ताहशः सत्यवादिशेखरः इति अनुसन्धातुं लग्नः। नव्यं प्रवासिनं मां प्रलोक्य धृतधान्यादिविक्रयकारकः कोऽपि आपणिकः पूर्वसङ्गतः इव 'स्वागतं-स्वागतम्' कथयन् स्मेराननः सम्मुखमागतः सबाहुक्षेपं मिलन् स कुशलं च प्रष्टुं प्रवृत्तः। कमपि भद्रं पुरुषं ज्ञात्वा अहं तदापणे गतः, उच्चासने निवेशितश्च तेन सार्धं स प्रेम संलपितुं आरब्धः। 'सर्वं धवलं धवलं दुग्धम्' इति विश्वसता मया निजवस्तु-रक्षणार्थं साग्रहं प्रार्थितः सः, दर्शितं च महार्घ्यं वस्त्वपि।

मनसा तद् रक्षितुं अतीव तत्परोऽपि स अलवलवसहः[३] (धूर्त-

---

३ अलवलवसहो—धूर्तवृषभः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अणण्णं सच्चवाइं दक्खवेंतो सच्च-धवलिआए ललिआए गिराए वोत्तुमारद्धो–"बंधुप्पवर! किं कहिअं भवंतेण थावण-रक्खणट्ठं ? ण उण उईरणिज्जमिणं। मए पुव्वमेव सवहीकयमुवहि-रक्खणं। नूणं भद्द-सहावेण सव्वं जगं भद्दं'ति मुणमाणेण मए रक्खिओ कस्सइ महाणुहावस्स णासो, परंतु अइ कडुओ तप्परिणामो जहा कहंचि पारं पाविओ। तओ पच्छा ण कयाइ तारिच्छं कच्चं कायव्वं'ति परिण्णायं मए। तओ किवाए अण्णत्थ गंतव्वं णास-विण्णास-वडियाए, णाहं कहमवि सीकाहमिणं।"

उक्किट्ठं तस्स सच्च-णिट्ठं दिट्ठिं अणुहविअ एत्थेव रित्थं रक्खेमि'त्ति अहं अणुरोहं काउं पउत्तो। तम्मि समयम्मि एगा बालिआ घयं किणेउमागया। वंचग-वसहेण तेण पुणरवि मं पभावेउं एगा णियडी फुडीकया। जहा गहिअं एगगुणं दव्वं, तव्विणिमए दिण्णं बिउणं घयं। सप्पि गहिअ गया कण्णा। विम्हिएण मए तक्कालमुड्डंकिअं– "अहो ! वाणिओ सि तुमं जं जाणासि वाणिय-वित्तिमवि। हरे ! दव्वगहणाहितो अल्लविअं विगुणं अज्जं, कहमण वज्जमिणं कज्जं जं वणिअ-णाम-दूसगं मूढया-विअंभिअं च। णाए पणालीए कहं तुह विवणी णीवि सुरक्खिअं रक्खिउं खमा।"

"सम्मं वितक्किअं तुमए। हीरणमणुहवइ मे मणो पडुत्तरं दाउं। परं किं कहेमि, अत्थि मे एआरिसो दाण-सीलो सहावो, वावारेवि ण सो पम्हुट्ठो हवइ। कहं कज्जं चलइ'त्ति ण मे रसणा वंजिउं पहुप्पइ। अज्ज ! णत्थि किं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिरोमणिः) स्वं अनन्य-सत्यवादिनं दर्शयन् सत्य-धवलितयाललितया गिरा वक्तुं आरब्धः—"बन्धुप्रवर! किं कथितं भवता स्थापन-रक्षणार्थम्? न पुनः उदीरणीयमिदम्। मया पूर्वमेव शपथीकृतं उपधि-रक्षणम्। नूनं भद्रस्वभावेन सर्वं जगत् भद्रं इति जानानेन मया रक्षितः कस्यापि महानुभावस्य न्यासः, परन्तु अति कटुकः तत्परिणामः यथाकथञ्चित् पारं प्रापितः। ततः पश्चात् न कदापि तादृशं कृत्यं कर्त्तव्यमिति प्रतिज्ञातं मया। ततः कृपया अन्यत्र गन्तव्यं न्यास-विन्यास-प्रतिज्ञया, नाहं कथमपि स्वीकरिष्ये इदम्।

उत्कृष्टां तस्य सत्यनिष्ठां दृष्टिं अनुभूय 'अत्रैव रिक्थं रक्षामि' इति अहं अनुरोधं कर्तुं प्रवृत्तः! तस्मिन् समये एका बालिका घृतं क्रेतुं आगता। वञ्चकवृषभेण तेन मां प्रभावयितुं एका निकृतिः स्फुटीकृता। यथा गृहीतं एकगुणं द्रव्यं तद्विनिमये दत्तं द्विगुणं घृतम्। सर्पिः गृहीत्वा गता कन्या। विस्मितेन मया तत्कालं उट्टङ्कितम्– अहो! वाणिजोऽसित्वं यद् न जानासि वाणिजवृत्तिमपि। अरे! द्रव्यग्रहणात् अर्पितं द्विगुणं आज्यं, कथं अनवद्यमिदं कार्यं यद् वणिकनामदूषकं मूढताविजृम्भितं च। अनया प्रणाल्या कथं तव विपणिः नीवीं सुरक्षितां रक्षितुं क्षमा?

"सत्यं वितर्कितं त्वया। हीरणां (लज्जां) अनुभवति मे मनः प्रत्युत्तरं दातुम्। परं किं कथयामि अस्ति मे एतादृशः दानशीलः स्वभावः, व्यापारेऽपि यो न विस्मृतो भवति। 'कथं कार्यं चलति' इति न मे रसना व्यञ्जयितुं प्रभवति। आर्य! नास्ति किं सर्वक्षति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सव्वक्खइ-पूरगो सव्व-सत्तिमंतो सव्वेसिं जोग-क्खेम-कुसलो पहू ?" पुण्ण-सद्धा-पुव्वअं णिवेइअं तेण ।

इओ घयं गहिऊण सा कण्णा णिअं ठाणं पत्ता ? ताए पिअरेण घयं विलोएऊण सच्छेरं पुट्ठं—"पुत्तिआ ! कहं मुल्लाणुसारेण दुउणं घयं दीसइ । ण तारिसो कोइ अण्णो धुत्त-सिरोमणी विज्जए णयरम्मि । तेण कहं एआरिसं कयं ? एत्थ किमवि रहस्सं विज्जइ । किं कोइ पवासुओ तत्थ उवविट्ठो आसि ?"

पुत्तिआए भणिअं—"आम, एगो अणुवलक्खिओ कोइ णरो तत्थ किमवि वत्थुं रक्खेउकामो असइं अणुरोहं कुणमाणो आसि ।" सच्चं तव्वंचणट्ठं किर तेण एसा णिअडी पयडीकया । कण्णे ! सत्तरं वच्चसु घयं पच्चप्पिणेउं, पुणरवि जहा हं कहेमि तहा पयडीकुणसु उच्चसरं । सप्पिं गहिऊण बालिआ झत्ति हट्टं पत्ता, मिलाणाणणीहूअ साहेउं च पउत्ता—"आवणिअ ! कहमेअं अणुइअं कयं ? कहं विगुणं सप्पिं समप्पिअं ? तं पेक्खिअ मह पिआ अईव कुविओ जाओ । अहमवि मुक्ख'त्ति सद्देण अक्कोसिआ, णिरणुक्कोसं ताडिआ य ।" तत्तं सिक्खंतेण उईरिअं—"भद्दे ! अप्पधणा वयं'ति ण चिंतणिज्जं किमवि । णेआउग्रेण समजल-सित्तेण भोअणेण संतुट्ठा सुहं जीवणं जवेमो । णायविढविआ एगा कवड्डिआवि कोडी-तुल्ला । अण्णायसंचिआ कुडिला कोडी वि ण णे कज्ज-साहणी, तम्हा पच्छा कुणसु तुह अहिअं अहिअं घयं" एवं कहंतीए तीए घयभायणं पुरओ रक्खियं, अइरित्तं पच्चप्पिऊण तक्खणं च पडिवलिअं तीए । मए विमंसिअं—हंत ! बालिआए पिय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूरकः सर्वशक्तिमान् सर्वेषां योगक्षेमकुशलः प्रभुः ?" पूर्णश्रद्धापूर्वकं निवेदितं तेन।

इतो घृतं गृहीत्वा सा कन्या निजं स्थानं प्राप्ता। तस्याः पित्रा घृतं विलोक्य साश्चर्यं पृष्ठम्—"पुत्रिके ! कथं मूल्यानुसारेण द्विगुणं घृतं दृश्यते ? न तादृशः कोऽपि अन्यः धूर्ततशिरोमणिः विद्यते नगरे, तेन कथं एतादृशं कृतम् ? अत्र किमपि रहस्यं विद्यते। किं कोऽपि प्रवासी तत्र उपस्थितः आसीत् ?

पुत्रिकया भणितं—"आम्, एकः अनुपलक्षितः कोऽपि नरः तत्र किमपि वस्तु रक्षितुकामः असकृत् अनुरोधं कुर्वन् आसीत्।" सत्यं तद्वञ्चनार्थं किल तेन एषा निकृतिः प्रकटीकृता। कन्ये ! सत्वरं व्रज घृतं प्रत्यर्पयितुम्, पुनरपि यथाहं कथयामि तथा प्रकटीकुरु उच्चस्वरम्। सर्पिः गृहीत्वा बालिका झगिति हट्टं प्राप्ता, म्लाननना-भूय कथयितुं प्रवृत्ता—"आपणिक ! कथं एतद् अनुचितं कृतम् ? कथं द्विगुणं सर्पिः समर्पितम् ? तत् प्रेक्ष्य मम पिता अतीव कुपितो जातः। अहमपि 'मूर्खी' इति शब्देन आकृष्टा, निरनुक्रोशं ताडिता च। तत्त्वं शिक्षयता उदीरितम् "भद्रे ! 'अल्पधना वयम्' इति न चिन्तनीयं किमपि। नैयायिकेन समजल-सिक्तेन भोजनेन संतुष्टाः सुखं जीवनं यापयामः। न्यायार्जिता एका कपर्दिका अपि कोटितुल्या, अन्याय-सञ्चिता कुटिला कोटिरपि न अस्माकं कार्यसाधनी, तस्मात् पश्चात् कुरु त्वं अहितं अधिकं घृतम्।" एवं कथयन्त्या तया घृतभाजनं पुरतः रक्षितम्, अतिरिक्तं प्रत्यर्प्य तत्क्षणं प्रतिवलितं तया। मया विमृष्टम्—हन्त ! बालिकायाः पित्रा नूनं महासत्यवादिना भवितव्यम्। अतिरिक्तं आगतमपि घृतं येन न रक्षितम्। अहा ! कीदृशी विशुद्धा नीतिः, विमलं चिन्तनम्, धार्मिकी निष्ठा च ? यदि अस्याः पितुः समीपं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रेण णूणं महासच्चवाइणा हो अव्वं । अइरित्तं आगयं पि घयं जेण ण रक्खिअं, अहा ! केरिसी विसुद्धा णीई, विमलं चिंतणं, धम्मिआ णिट्ठा य ? जइ इमीसे पिउणो समीवं अहं रक्खेमि णिअं धणं, तया ण किंचिवि आयईए भयं संभावणिज्जं 'ति णिच्छिअ तओ तक्खणं धणं गहिअ कण्णाए अणुपयं चलिओ । आवणिअस्स णावा मणे मज्झेसमुद्दं बुड्डा । पिट्ठओ तेण बहु संबोहिअं, परंतु मए किमवि ण पडिवण्णं । अयं धुत्त-सेहर'त्ति फुडं अणुहवमाणो तग्गिहं पत्तो । तेणावि ससंमाणं कुसलपण्हाओ पुट्ठाओ । अत्थि काइ मह जुग्गा सेव्व'त्ति साणुणयं जिण्णासिअं । मए वि दव्व-दंसणेण सद्धिं णिआहिप्पाओ सूइओ । गुरुमुल्लिल्लं रित्थं पेक्खिअ सो तग्गहणट्ठं अंतक्करणम्मि अईव आउरो जाओ, परं उवरिल्ल-भावेण पुव्व-वाणिअव्व पडिसेह-पंडिओ हूओ । जहा-जहा तेण पडिसिद्धं तहा-तहा मए तत्थेव रक्खणट्ठं पसज्झं चिट्ठा विहिआ । तयंतराले एगो विप्पो भिक्खमडंतो 'सत्थि कल्लाणं'ति उच्चारेंतो तस्स णिहलणं[1] पविट्ठो । भूदेवस्स पत्थ-मियं तंदुलं देहि'त्ति गह-वइणा भज्जा आणत्ता । ससंमाणं भारिआए विप्पस्स दाणं दिण्णं । दाणं गहिअ चलिओ वाडवो चिंतेउं लग्गो–'चोज्जं ! किमिणं नवीणं जायं, एत्थ एआरिसी दाणसोलया ! मुट्ठिमिअं चुण्णमवि दुल्लहं जत्थ । किविणिमा-कक्कसा भज्जा ण उच्छिट्ठेण हत्थेण साणं हक्कारेइ । पेसणं कुणंती वि धण्णाणकणे चव्वए, तत्थ सालीणं दाणं ! अत्थि कोइ वंचणा-

---

१ गृहम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अहं रक्षामि निजं धनं तदा न किञ्चिदपि आयतौ भयं सम्भावनीय-मिति निश्चित्य ततः तत्क्षणं धनं गृहीत्वा कन्यायाः अनुपदं चलितः। आपणिकस्य नौर्मन्ये मध्येसमुद्रं ब्रुडिता। पृष्ठतः तेन बहु सम्बोधितम्, परन्तु मया किमपि न प्रतिपन्नम्। 'अयं धूर्तशेखरः' इति स्फुटं अनुभवन् तद्गृहं प्राप्तः। तेनापि ससम्मानं कुशल-प्रश्नाः पृष्टाः। 'अस्ति कापि मम योग्या सेवा' इति सानुनयं जिज्ञासितम्। मयाऽपि द्रव्य-दर्शनेन सार्धं निजाभिप्रायः सूचितः। गुरुमूल्यवत् रिक्त्थं प्रेक्ष्य स तद्ग्रहणार्थं अन्तःकरणे अतीव आतुरो जातः। परं उपरितन-भावेन तु पूर्ववाणिजवत् प्रतिषेध-पण्डितो भूतः। यथा-यथा तेन प्रतिषिद्धं तथा तथा मया तत्रैव रक्षणार्थं प्रसह्य चेष्टा विहिता। तदन्तरालेऽपि एको विप्रो भिक्षां अटन् 'स्वस्ति, कल्याणम्' इति उच्चरन् तस्य निहेलनं (सदनं) प्रविष्टः। 'भूदेवाय प्रस्थमितं तन्दुलं देहि' इति गृहपतिना भार्या आज्ञप्ता। ससम्मानं भार्यया विप्राय दानं दत्तम्। दानं गृहीत्वा चलितो वाडवः चिन्तयितुं लग्नः—"चोज्जं! (आश्चर्यम्) किमिदं नवीनं जातम्, अत्र एतादृशी दानशीलता! मुष्टि-मितं चूर्णमपि दुर्लभं यत्र। कृपणताकर्कशा भार्या न उच्छिष्टेन हस्तेन श्वानं निषेधति। पेषणं कुर्वती अपि धान्यकणान् चर्बति, तत्र शालीनां दानम्! अस्ति कोऽपि वञ्चना-प्रपञ्चः। अनुसन्धान-तत्परस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पवंचो। अणुसंधाण-तप्परस्स तस्स पच्छा अवलोअमाणस्स अहं दिट्ठिमग्गमोइण्णो। हंत! अस्स पवासुअस्स पतारणट्ठं एसा वयण्णया। कहं ण घेतव्वो मएवि अस्स अवसरस्स लाहो? इअ णिच्छिअ तक्खणं सो णिअमुद्धवेढणम्मि एगं लहुं तणं संणिवेसिअ पच्छा वलिओ, दीणाणणो भुच्चा साहेउं पउत्तो- "हद्धी! महंतो अवराहो, अभूअपुव्वो मंतू, अखमणिज्जा य मे तुडी जाया। भाय! अच्चंतं दुहिओम्हि! हा! जाहे हं दाणं गहेउं णिण्णकंधरो भूओ तयाणि अणाभोगेण एगं छद्दिआए तणं मह उण्हीसम्मि संलग्गं। किंचि अग्गओ वच्चमाणस्स मह करो तण-संजुत्तो जाओ। तक्खणमहं कंपिअ-कलेवरो संवुत्तो। हा हा! अण्णाणयाए किमिणं अघडिअं घडिअं! अज्जप्पभिइ ण मए कस्सइ अदिण्णादाणं गहिअं, अज्जपइण्णा-भंगो हवीअ। ण मुल्लिल्लं तणं'ति किमदिण्णादाणमिअं एवं जइ लहुमवराहं ण किमवि'त्ति उवक्खेज्जा, तयाणिं अणग्गल-वित्तीओ हुंतो सुवण्णावहरणमवि ण दोस-दुट्ठं मणेज्जा। अव्वो? बंभणस्स सव्वो वि किरिआ-कलाओ विलुत्तो हवेज्जा। अम्हाणं भिक्खागाणं कए णवरं भिक्खाए च्चिअ अहिआरो। भिक्खाए तुट्ठा अम्हे परमाणंदिणो पइपलं। अम्हाकं संगहेण धणस्स किं पओअणं", इअ वाकुणंतो तणं हत्थोहत्थिं पच्चप्पिणिअ पच्चावलिओ। तस्स अबीअं सच्च-णिट्ठं वागरणं सुणिअ अहं अईव पभाविओ जाओ। अहो! केरिसो विप्पोऽयं अलोलुहो, णीइ-कुसलो, दढधम्मो य महप्पा विज्जए, जइ हं इमस्स धणं समप्पेमि, तया ण काइ अवहरण-संका समुट्ठिआ सिआ; एवं विमंसिअ एक्कवए तओ धणं गहिअ पचलिओ,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्य पश्चात् अवलोकमानस्य अहं दृष्टिमार्गमवतीर्णः। हन्त ! अस्य प्रवासिनः प्रतारणार्थं एषा वन्दान्यता। कथं गृहीतव्यः मयाऽपि अवसरस्य लाभः ? इति निश्चित्य तत्क्षणं स निजमूर्धवेष्टने एकं लघु तृणं संनिवेश्य पश्चाद् वलितः, दीनाननो भूत्वा कथयितुं प्रवृत्तः—"हद्धी ! महान् अपराधः, अभूतपूर्वः मन्तुः, अक्षमणीया च मे त्रुटिर्जाता। भ्रातः ! अत्यन्त-दुःखितोऽस्मि। हा। यदा अहं दानं गृहीतुं निम्नकन्धरो भूतः, तदानी अनाभोगेन एकं छदिकायाः तृणं मम उष्णीषे संलग्नम्। किञ्चिद् अग्रतो व्रजतो मम करः तृणसंयुक्तो जातः। तत्क्षणं अहं कम्पित-कलेवरः संवृत्तः। हा हा। अज्ञानतया किमिदं अघटितं घटितम् ? अद्यप्रभृति न मया कस्यापि अदत्तादानं गृहीतम्। अद्य प्रतिज्ञाभङ्गः अभूत्। 'न मूल्यवत् तृणम्' इति किमदत्तादानमिदम् ? एवं यदि लघुं अपराधं न किमपि इति उपेक्षे तदानीं अनर्गलवृत्तिको भवन् सुवर्णावहरणमपि न दोष-दुष्टं मन्येय। अव्वो ! ब्राह्मणस्य सर्वोऽपि क्रियाकलापः विलुप्तो भवेत्। अस्माकं भिक्षुकाणां कृते केवलं भिक्षाया एव अधिकारः। भिक्षासन्तुष्टा वयं परमानन्दिनः प्रतिपलम्। अस्माकं संग्रहेण धनस्य किं प्रयोजनम् ? इति व्याकुर्वन् तृणं हस्ताहस्ति प्रत्यर्प्य प्रत्यावलितः। तस्य अद्वितीयं सत्य-निष्ठं व्याकरणं श्रुत्वा अहं अतीव प्रभावितो जातः। अहो ! कीदृशः विप्रः अयं अलोलुभः, नीतिकुशलः, दृढधर्मश्च महात्मा विद्यते। यदि अहं अस्मै धनं समर्पयामि तदा न कापि अपहरणशङ्का समुत्थिता स्यात्, एवं विमृश्य एकपदे ततो धनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुव्व-धुत्तेणं वारिओ वि अहं ण तत्थ ट्ठिओ। तमणुवच्चंतो तस्स णिलयं पविट्ठो। तेणाहं अइ महुर-ववहारेण ववहरिओ। मएवि णिअं दव्वं दंसिअ रक्खणट्ठं अग्गहो कओ; परंतु तेण धुत्तेण फुडं अणिच्छा दक्खविआ। तयाणिमेव इक्को जोई भिक्खट्ठमागओ संखं पुरेउं लग्गो। तं पेक्खिअ सो अईव उप्फुलो जाओ। सभत्ति वंदणा कया। धण्णं भागहेयं'ति वएंतेण पायसभिक्खाए तस्स झोलिआ पूरिआ। अण्णाइं पि बहूइं सुमहुर-भोज्जाइं समप्पिआइं। गुरु-झोलिओ मोमुइओ जोई गुरु-ससीमं पत्तो। कमवि णवीणं रसड्ढं भिक्खं णिहालिअ जरंडो[1] गुरू विम्हयं पत्तो। अज्ज को एरिसो सज्जुक्को दायारो णयरम्मि उप्पण्णो, जेण एरिच्छा पगाम-रसा रसवई भिक्खाए दिण्णा! पडिदिअहं तु तुमं सुक्कं, रुक्खं, अंतं, पंतं च भोअणजायं आणिणेसि, ण कयाइ एआरिसं मणुण्णं भोअणं लब्भसि, किं तत्थ कोई णवीणो भद्दो धणड्ढो जणो ट्ठिओ आसी? अवस्सं रहस्सं विज्जए एत्थ किमवि। सीसेण 'हंता' कहंतेण पडिवण्णं। गुरुणा उप्पालिअं-"सीस! झोलिअं गहिअ तत्थेव गंतुं तुरसु। मह पवंचिअं पयडीकुणमाणो अचुच्छ-साहल्लं लहसु।" गुरुणो पमाणं'ति वयंतो तुरेंतो सीसो सझोलिओ तत्थेव पुणरागम्म सखेअं वोत्तुमाढत्तो-"भत्त! अज्ज मए अणट्ठो उवालंभो गुरुस्स पत्तो, जयाहं भिक्खं णेऊण गुरूवकंठं गओ। तुह दिण्णं सरसं भिक्खं पेक्खिअ विरत्तो गुरू रत्तो जाओ। आविलिज्जाए वायाए पच्चारेउं पउत्तो-"मूढ! कप्पए किं

---

१ जरण्डो-वृद्धः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गृहीत्वा प्रचलितः। पूर्वधूर्तेन वारितोऽपि अहं न तत्र स्थितः। तं अनुव्रजन् तस्य निलयं प्रविष्टः।

तेन अहं अतिमधुर-व्यवहारेण व्यवहृतः। मयापि निजं द्रव्यं दर्शयित्वा रक्षणार्थं आग्रहः कृतः, परन्तु तेन धूर्तेन स्फुटं अनिच्छा दर्शिता। तदानीमेव एको योगी भिक्षार्थं आगतः शङ्खं पूरयितुं लग्नः। तं प्रेक्ष्य स अतीव उत्फुल्लो जातः। सभक्तिवन्दना कृता। धन्यं भागधेयं इति वदन् पायस-भिक्षया तस्य झोलिका पूरिता। अन्यानि अपि बहूनि सुमधुर-भोज्यानि समर्पितानि। गुरुझोलिको मोमुदितो योगी गुरु-ससीमं प्राप्तः। कामपि नवीनां रसाढ्यां भिक्षां निभाल्य जरण्डः (वृद्धः) गुरुः विस्मयं प्राप्तः। अद्य कः एतादृशः सद्यस्कः दाता नगरे उत्पन्नः, येन ईदृक्षा प्रकामरसा रसवती भिक्षायां दत्ता? प्रतिदिवसं तु त्वं शुष्कं रूक्षं अन्तं प्रान्तं च भोजनजातं आनयसि। न कदापि एतादृशं मनोज्ञं भोजनं लभसे। किं तत्र कोऽपि नवीनो भद्रो धनाढ्यो जनः स्थितः आसीत्? अवश्यं रहस्यं विद्यते अत्र किमपि।

शिष्येण 'हन्ता' कथयता प्रतिपन्नम्। गुरुणां कथितम्—"शिष्य! झोलिकां गृहीत्वा तत्रैव गन्तुं त्वरस्व। मम प्रपञ्चितं प्रकटीकुर्वन् अतुच्छसाफल्यं लभस्व। 'गुरवः प्रमाणम्' इति वदन् त्वरमाणः शिष्यः सझोलिकः तत्रैव पुनरागम्य सखेदं वक्तुं आरब्धः—"भक्त! अद्य मया अनर्थः उपालम्भो गुरोः प्राप्तः। यदाहं भिक्षां नीत्वा गुरूपकण्ठं गतः। तव दत्तां सरसां भिक्षां प्रेक्ष्य विरक्तो गुरुः रक्तो जातः। क्रुद्धया वाचा उपालब्धुं प्रवृत्तः—"मूढ! कल्पते किं साधूनां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साहूणं एआरिसी भिक्खा ? णवरं तएां भुंजेतो वि बक्करो कामेण पगामं पराहूओ हवए तया सरसं भुंजेतो जोई कइं बंभचेरवसंवओ। मिच्छा कहणमिणं जं रस-लोलुहो वि जोइ'त्ति ? किं पओअणं अम्हाकं णाणा-रस-वंजण-जुएण भोअणेण ? अम्हेहिं तु सुक्खं रुक्खं भोअव्वं, विजएणे वणे चिट्ठिअव्वं, तुह-जत्ता च कायव्वा। णूणं ण हवइ कयाइ तवस्सा-विहूणा सभला साहणा" एवं कहिअ तत्थेव पायसाइअं छड्डिअ पच्छावलिओ सो। तं सुणिअ अहं तु उत्तंभिओ, विम्हिओ, तग्गुण-रंजिओ य जाओ। अव्वो ? केरिसं वेरग्गं, अब्भुआ णिप्पिवासिआ, विचित्ता य विरत्ती ! णीसंकं मए तत्थेव दव्वं अप्पिअव्वं। अलाहि विकप्पेण। तक्कालं तं अणुसरंतो पुरस्स बहिआ मढम्मि महंतस्स दंसणं कयं। विरत्ति-विगसिओ वत्तालाओ जाओ। मए वि णास-सुरक्खट्ठं विणत्तो सो। अम्हाकं किं पओयणं'ति बहु-णिसिद्धं तेण। अंते अइ अग्गहेण तेण सीकयं मह पत्थएां। एत्थ ण किमवि भयं'ति णीचिंतो समुद्दम्मि अग्गओ चलिओ।

पिट्ठओ महादव्व-लोलुहेण महंतेण सव्वे वि सीसा पुहत्तं पाविआ। मढ-पओलीए मुहमवि परावत्तिअं। सव्वेवि रुक्खा छेइआ। णिआ एगा अच्छी वि फोडिआ। सव्वावि लीला अण्णारिसी चिअ कया।

किंचि कालाणंतरं जयाहं पच्छा सुरक्खियं णासं गहेउकामो तत्थ समागओ, तया ण किमवि उवलक्खिअं पत्तं, ण महंतेण वत्तावि विहिआ। "विम्हुट्ठोसि तुमं, ण एत्थ सुमिणेवि एआरिसी घडणा घडिआ।"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतादृशी भिक्षा ? केवलं तृणं भुञ्जानः अपि बर्करः कामेन प्रकामं पराभूतो भवति, तदा सरसं भुञ्जानो योगी कथं ब्रह्मचर्य-वशंवदः ? मिथ्या कथनमिदम् यत् रसलोलुपोऽपि योगी । किं प्रयोजनं अस्माकं नाना-रस-व्यञ्जन-युतेन भोजनेन ? अस्माभिस्तु शुष्कं रुक्षं भोक्तव्यं, विजने वने स्थातव्यं, तीर्थ-यात्रा च कर्तव्या । नूनं न भवति कदापि तपस्याविहीना कापि सफला साधना" एवं कथयित्वा तत्रैव पायसादिकं मुक्त्वा पश्चात् वलितः । तत् श्रुत्वा अहं तु उत्थम्भितः विस्मितस्तद्गुणरञ्जितश्च जातः । अब्बो ! कीदृशं वैराग्यम् ? अद्भुता निष्पिपासिता, विचित्रा च विरक्तिः । निस्सङ्कं मया तत्रैव द्रव्यं अर्पितव्यम् । अलं विकल्पेन । तत्कालं तं अनुसरन् पुरस्य बहिः मठे महन्तस्य दर्शनं कृतम् । विरक्ति-विकसितो वार्तालापो जातः । मयापि न्याससुरक्षणार्थं विज्ञप्तः सः । 'अस्माकं किं प्रयोजनम्' इति बहुनिषिद्धं तेन । अन्ते अति आग्रहेण तेन स्वीकृतं मम प्रार्थनम् । अत्र न किमपि भयमिति निश्चिन्तः समुद्रे अग्रतश्चलितः ।

पृष्ठतः महाद्रव्य-लोलुभेन महन्तेन सर्वेऽपि शिष्याः पृथक्त्वं प्रापिताः । मठ-प्रतोल्याः मुखमपि परावर्तितम् । सर्वेऽपि वृक्षाः छिन्नाः । निजं एकं अक्षिः अपि स्फोटितम् । सर्वाऽपि लीला अन्यादृशी एव कृता ।

किञ्चित् कालानन्तरं यदा अहं पश्चात् सुरक्षितं न्यासं गृहीतुकामः तत्र समागतः, तदा न किमपि उपलक्षितं प्राप्तम् । न महन्तेन वार्ताऽपि विहिता । 'विस्मृतोऽसि त्वं न अत्र स्वप्नेऽपि एतादृशी घटना घटिता' स्फुटं निषिद्धं तेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

फुडं णिसिद्धं तेण। कुमार! तओ प्पभिइ अहं जत्थ तत्थ भमेमि, परंतु ण कोइ मह पउत्ति सुणेइ। अत्थु, इण मेव कहणस्स तप्पज्जं[1], जं तए अईव कुसलत्तेण वट्टिअव्वं, अण्णहा ण कुसलं'ति मंतव्वं। संखेवेण एवं णिवेइऊण मा कोइ मं पासउ'त्ति तक्खणं पलाणो सो।

संभरिआ रयणेण अणुहविणो थेरस्स सद्दा। हंत! अमुणिअं विहि-विलसिअं अणहिलसिअं ठाणमागअं। संपइ किं कायव्वं'ति चिंताउरो जाओ कुमारो।

इअ सिरिचंदणमुणि-विरइआए णयराओ पट्ठाण-
कालकूडदीवागमण-णियडीघडणासवणाइ-
भावेहिं रेहिआए रयणवाल-
कहाए चउत्थो ऊसासो
समत्तो

१ तात्पर्यम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुमार ! ततः प्रभृति अहं यत्र तत्र भ्रमामि, परन्तु न कोऽपि मम प्रवृत्तिं शृणोति। अस्तु, इदमेव कथनस्य तात्पर्यं यत् त्वया अतीव कुशलत्वेन वर्तितव्यम् अन्यथा न कुशलमिति मन्तव्यम् । संक्षेपेण एवं निवेद्य 'मा कोऽपि मां पश्यतु' इति तत्क्षणं पलायितः सः।

संस्मृता रत्नेन अनुभविनः स्थविरस्य शब्दाः ? हन्त। अज्ञातं विधि-विलसितं अनभिलषितं स्थानं आगतम्। सम्प्रति किं कर्त्तव्यमिति चिन्तातुरः जातः कुमारः।

इति श्री चन्दनमुनि-विरचितायां नगरात् प्रस्थान-
कालकूटद्वीपागमन-निकृतिघटनाश्रवणादिभावैः
शोभितायां रत्नपाल-कथायां चतुर्थः
उच्छ्वासः समाप्तः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

५

अह पंचमो ऊसासो

अहो ! पोग्गलिआ सव्वावि भव्वा परिणई पुण्णकम्म-पणुल्लिआ । पुण्णबंधोवि ण हवेज्ज विणा सुहजोगं । 'जत्थ सुहजोगो तत्थ णिअमेण णिज्जरे 'त्ति पवेइअं आगमिएहिं । णिज्जरा वि ण तवमंतरेण । तवो वि पयडं धम्मंगो । तम्हा धम्मो च्चिअ सव्व-सुहमूलं'ति विणिच्छिअं तत्तं ।

इओ अ दुवे अस्सारूढा रायकेरा पुरिसा णिअ-ककुहं धावेंता रयणेण लक्खिआ । 'के एए' इअ संकिअं जायं माणसं । केण पओअणेण इमे समीवयंति मं'ति कोउहल्ला-उलो जाओ अप्पा । झडित्ति सविहं पत्ता एए पुच्छेउं लग्गा सहिलासमित्थं—"कुमार-सिट्ठ ! संति किं तुह समीवं दाडिमस्स धायईए य पसूणाणि । जुज्जंति ताणि महालुक्कस्स[1]

---

१ महारुग्णस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

५

अथ पञ्चमः उच्छ्वासः

अहो ! पौद्गलिकी सर्वापि भव्या परिणतिः पुण्यकर्मप्रेरिता। पुण्य-बन्धोऽपि न भवेत् विना शुभयोगम्। 'यत्र शुभयोगः तत्र नियमेन निर्जरा' इति प्रवेदितं आगमिकैः। निर्जराऽपि न तपोऽन्तरेण। तपोऽपि प्रकटं धर्माङ्गम्। तस्माद् धर्म एव सर्व-सुख-मूलम्' इति विनिश्चितं तत्वम्।

इतश्च द्वौ अश्वारूढौ राजकीयौ पुरुषौ निजककुभं धावन्तौ रत्नेन लक्षितौ। 'कौ एतौ' इति शङ्कितं जातं मानसम्। केन प्रयोजनेन इमौ समीपयतः माम् इति कुतूहलाकुलः जातः आत्मा। झटिति सविधं प्राप्तौ एतौ प्रष्टुं लग्नौ साभिलाषमित्थम्—"कुमार-श्रेष्ठ ! सन्ति किं तव समीपं दाडिमस्य धातक्याश्च प्रसूनानि ? युज्यन्ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णरणाहस्स तिगिच्छा-णिमित्तं । जइ संति ता अवस्सं दायव्वाणि तुमए । एसो महामुल्लोऽवसरो ण चुक्कणिज्जो समयण्णुणा" एवं कहेंता पच्चुत्तरं पडिक्खंता तुण्हिक्का ठिआ ।

अहो ! धुत्ताणं अकलणिज्जा कला । अलक्खणिज्जा विज्जा । अणवगंतव्वं तत्तं । कहं णायं एहिं दाडिम-धायई-पुप्फाणं गुज्झं ? विचित्तो किर परप्पयारण-विज्जाए पढमिल्लो पयासो 'ति ससंको जाओ कुमारो । अहवा हवेज्ज अंधवट्टकीयमिणं[1] । दक्खयाए देमि अस्स पच्चुत्तरं जहा ण विणट्ठं होइ सामइअं किच्चं । किंचि चिंतेऊण सूइअं रयणेण—"संभवेज्ज रोयाणं भीसणमक्कमो । पडिकिरिआ वि तेंसि णाणोसहोवयार-सज्जा । पुप्फाणं हेउणो तुम्हाणमुट्ठं कणावि णाणुइआ, तहावि अपरिचिआ अम्हे इहच्च[2]-मणुएहिं । तो कहं पच्चेमो जं तुम्हकेरं मग्गणं जहत्थं 'ति । जइ अप्पणो रायमंती एत्थ आगंतूणं समीचीण-आए पयडेइ वइअरं, कुणेइ य वीसत्थं णे मणं, णूणं जहच्छिअ-वत्थूवलब्धी भाविणि 'त्ति संभावणिज्जं ।

णिसमिऊण रयणवालस्स जुत्तिजुत्तं वयणं उप्फुल्ला संजाया ते दंडवासिआ[3] । एक्कसरिअं महामच्चं पट्ठवेमो तं घेत्तुं 'ति कहमाणा सहसा धाविआ ते णयर-दिसं । णाणाविह-कप्पणापरो विहिप्पवरो कुमरो[4] तत्थेव ठिओ अदिस्सं भविस्सं गवेसंतो ।

---

१ अन्धवर्त्तकीयम्-अतर्कितं किमपि यदा अदृष्टघटितं भवति तदाऽयं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तानि महारुग्णस्य नरनाथस्य चिकित्सा-निमित्तम्। यदि सन्ति तदा अवश्यं दातव्यानि त्वया। एष महामूल्यः अवसरो न भ्रंशितव्यः समयज्ञेन" एवं कथयन्तौ प्रत्युत्तरं प्रतीक्षमाणौ तूष्णीकौ स्थितौ।

अहो! धूर्तानां अकलनीया कला। अलक्षणीया विद्या। अनवगन्तव्यं तत्त्वम्। कथं ज्ञातं एताभ्यां दाडिम-धातकी-पुष्पाणां गुह्यम्? विचित्रः किल पर-प्रतारण-विद्यायाः प्राथमिकः प्रयासः इति सशङ्को जातः कुमारः। अथवा भवेद् अन्धवर्तकीयमिदम्। दक्षतया ददामि अस्य प्रत्युत्तरं यथा न विनष्टं भवति सामयिकं कृत्यम्। किञ्चित् चिन्तयित्वा सूचितं रत्नेन—"सम्भवेत् रोगाणां भीषणमाक्रमः। प्रतिक्रियाऽपि तेषां नानौषधोपचार-साध्या। पुष्पाणां हेतोः युष्माकं उद्दङ्कनाऽपि नानुचिता। तथापि अपरिचिताः वयं इहत्य-मनुजैः। ततः कथं प्रतीमो यत् युष्माकं मार्गणं यथार्थमिति। यदि स्वयं राजमन्त्री अत्र आगत्य समीचीनतया प्रकटयति व्यतिकरं, कुरुते च विश्वस्तं अस्माकं मनः। नूनं यथेप्सित-वस्तूपलब्धिः भाविनी इति सम्भावनीयम्।

निशम्य रत्नपालस्य युक्तियुक्तं वचनं उत्फुल्लौ सञ्जातौ तौ दण्डपाशिकौ। शीघ्रं महामात्यं प्रस्थापयावः तद् गृहीतुम् इति कथयन्तौ सहसा धावितौ तौ नगर-दिशम्। नाना-विध-कल्पनापरो विधिप्रवरः कुमारस्तत्रैव स्थितः अदृश्यं भविष्यं गवेषयन्।

न्यायः प्रवर्तते। यथाऽन्धेन करौ प्रलम्बायितौ, सहसा वर्त्तकः पक्षी कराभ्यां गृहीतस्तेन। २ इहत्यमनुजैः। ३ दण्डपाशिकः 'सिपाई' (इतिभाषा) ४ कुमारः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कइवाह[1] सब्भ-णयर-महंतएहिं समं अचिरमागओ सविह मेअस्स सइवो[2] णयणेहिं अमयं वासेंतो। जाया जय-जिणिंदाइविही[3]। पुट्ठं कुसलं। कुओ समागमणं 'ति पुच्छा पुण। दिहि-प्पहाणेण पहाणेण परिचिओ कओ इमो णिवइणो दूसहच्छि-विअणाए। कया णाणोवयारा, परं ण भूओ आमोवसमो; पच्चुल्लं परिवड्ढआ पीला। आगओ कोइ एगो अणुहवि-तल्लजो अगयंकारो। कयं णियाणं। लद्धा जहत्था ठिई। पत्थुग्रं भेसजं, परंतु तं दाडिम-धायई-सुमेहिं सद्धिं पजुंजइ 'त्ति तेसिं मग्गणा कया। विहि-वसओ कत्थइ ण मिलिओ भिसं ढंढुल्लमाणाणमवि णे तेसिं संजोगो। आउरस्स खणमेत्तमवि दूसहं विसढं च, तहावि असक्के णिरुवाए किं काउं सक्कं। अतक्किअं सवण-कुहरमागग्रं जं कोइ संजत्तिओ समुद्द-तडम्मि उत्थंभिओ[4]। पीडिआणं मणेसुं सव्वओ परिप्फुरइ काइ आसालहरी। संभवेज्ज आगंतुगस्स समीवं तं वत्थुं। तम्हा आगया अम्हेच्चया मणुआ। अहमवि तयट्ठमेव उवट्ठिओम्हि। गहउ जहेच्छिग्रं मुल्लं, दायव्वं जीवण-दायगं अमुल्लं तं। णत्थि मुल्लिल्लं वत्थुं किंतु मुल्लिलो समयो। ता जइ अत्थि तं साणुग्ग-हमविलंबेण विअरउ भवंतो। णीसंदेहं णीरोओ णिवो सुहायइ-हेऊ भविस्सइ भवंतस्स। विगयकइअवं[5] आयण्णिअ अमच्च-भारइं पच्चइअं[6] जायं रयणस्संतक्करणं। महंतं कुड्डमिणं जमइ तुच्छमवि वत्थुं अचुच्छ-लाह-कारणं हवेज्ज

---

१ कतिपयसभ्य-नगरमहत्तकैः २ सचिवः ३ प्राकृते विधिशब्दस्य स्त्रीलिङ्गे पि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कतिपय-सभ्य-नगर-महत्कैः समं अचिरं आगतः सविधं एतस्य सचिवः नयनाभ्यां अमृतं वर्षयन्। जातो जयजिनेन्द्रादिविधिः। पृष्ठं कुशलम्। कुतः समागमनम् इति पृच्छा पुनः? धृति-प्रधानेन प्रधानेन परिचितः कृतोऽयं नृपतेः दुःसहाक्षिवेदनया। कृताः नानोपचाराः, परं न भूतः आमोपशमः, प्रत्युत परिवर्धिता पीडा। आगतः कोऽपि एकः अनुभवि-तल्लजोऽगदङ्कारः। कृतं निदानम्। लब्धा यथार्था स्थितिः। प्रस्तुतं भैषजं, परन्तु तद् दाडिम-धातकी-सुमैः सार्धं प्रयुज्यते इति तेषां मार्गणा कृता। विधिवशतः, कुत्रापि न मिलितः भृशं गवेषयतां अपि अस्माकं तेषां संयोगः। आतुरस्य क्षणमात्रमपि दुःसहं, विषमं च, तथापि अशक्ये निरुपाये किं कर्तुं शक्यम्? अतर्कितं श्रवणकुहरमागतं यत् कोऽपि सांयात्रिकः समुद्रतटे उत्थम्भितः। पीडितानां मनःसु सर्वतः परिस्फुरति कापि आशा-लहरी। सम्भवेत् आगन्तुकस्य समीपं तद् वस्तु। तस्माद् आगताः आस्माकाः मनुजाः। अहमपि तदर्थमेव उपस्थितोऽस्मि। गृह्णातु यथेप्सितं मूल्यं, दातव्यं जीवनदायकं अमूल्यं तत्। नास्ति मूल्यवत् वस्तु, किन्तु मूल्यवान् समयः। तस्माद् यदि अस्ति तत् सानुग्रहं अविलम्बेन वितरतु भवान्। निःसन्देहं नीरोगो नृपः शुभायति-हेतुर्भविष्यति भवतः। विगत-कैतवं आकर्ण्य अमात्यभारती प्रत्ययितं जातं रत्नस्य अन्तःकरणम्। महद् आश्चर्यमिदं यत् अतितुच्छमपि वस्तु अतुच्छ-लाभकारणं

प्रयोगः। यथा-सव्वाहिं नयविहीहिं ४ उत्थम्भितः—रुका हुआ (इतिभाषा) ५ विगतकैतवम् ६ प्रत्ययितम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विहिणिओइअं। अहवा विमलं भागहेयं कहं, कया, कत्थ पडिफलेइ 'त्ति अगम्मं गुज्झं। देमि अणायासमाणीआणि ताणि णिरट्ठं परिट्ठविअव्वाणि मे सुमाणि। इअ वीमंसिअ कुमारेण सहोदज्जं[1] महुरमालविअं—"अत्थि मंतिप्पवर! तुम्हेहिं अइ अण्णेसिअं तं वत्थुं अणायासमागयं मे सद्धिं। इओ किमहिअं भव्वं जं मामगं वत्थुं णयरणाहस्स कज्जमेइ। कहं जहेच्छिअं मोल्लं गेज्झं ति साहिअं। मोल्लं तु भवारिसाणं किवच्छि-विकूणिअमेव[2] अम्हारिसाणं। पडिवालेंतु खणं भवंता जहा अहमवि तुम्हेहिं समं पुप्फोवढोअण-णिहेण[3] णिवइ-दंसण-लाहं गिण्हिउं सक्केमि।"

बहुवरं, दुत्ति[4] होह सज्जा तुम्हे। विरमालेइ रणरणयेण णरवई तत्थ। अयमागच्छेमि 'त्ति भणंतो रयणवालो तक्कालं परिहिअ-णिव-सहोइअ-णेवत्थो, धारिअ-णाणाविहालंकारो, गहिअ-उवईकरणारिह-विसिट्ठ-वत्थुणिचओ[5], सुसज्जिअ-पुप्फकरंडिओ, अणेगेहिं णिअ-मणुअेहिं परिवालिओ य अमच्चेण सागं णिवइ-दंसणट्ठं णिग्गओ। णिवेणावि लद्धा इमिआ पउत्ती जमेगो बालो पोअ-वाणिओ गहिअ ताणि पुप्फाणि मं सक्खं काउमागच्छेइ 'त्ति। अदिट्ठि पत्तो णिवो पेक्खइ तस्स मग्गं ताव मंतिणा सद्धिं उसलिअ-रोमकूओ[6] उवगओ जिणदत्त-सुओ। कयं सविणयं णिवइणोऽहिणंदणं। जाया ओवयारिआ[7] वत्ता। पाहुडीकयं अण्णं महग्घं वत्थुं पुप्फाणि पुण। हट्ठो जाओ णिवो।

---

१ सहोदार्यम् २ कृपाक्षिविकूणितमेव। ३ पुष्पोपढौकनमिषेण ४ झगति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवेत् विधि-नियोजितम्। अथवा विमलं भागधेयं कथं, कदा, कुत्र, प्रतिफलति इति अगम्यं गुह्यम्। ददामि अनायासं आनीतानि तानि निरर्थं परिष्ठापितव्यानि मे सुमानि। इति विमृश्य कुमारेण सहौदार्यं मधुरं आलपितम्—"अस्ति मन्त्रिप्रवर! युष्माभिः अति अन्वेषितं तद् वस्तु अनायासं आगतं मया सार्धम्। इतः किं अधिकं भव्यं यद् मामकं वस्तु नगरनाथस्य कार्यमेति। कथं यथेप्सितं मूल्यं ग्राह्यमिति कथितम्? मूल्यं तु भवादृशानां कृपाक्षिविकूणितमेव अस्मादृशानां। प्रतिपालयन्तु क्षणं भवन्तः, यथा अहमपि युष्माभिः समं पुष्पोपढौकन-मिषेण-नृपतिदर्शन-लाभं ग्रहीतुं शक्नोमि।"

बहुवरम्, झगिति भवत सज्जाः यूयम्। प्रतीक्षते रणरणकेन नरपतिः तत्र। 'अयं आगच्छामि' इति भणन् रत्नपालः तत्कालं परिधृत-नृप-सभोचित-नेपथ्यः, धारित-नानाविधालङ्कारः, गृहीत-उपदीकरणार्ह-विशिष्ट-वस्तु-निचयः, सुसज्जित-पुष्पकरण्डिकः, अनेकैः निजमनुजैः परिवारितश्च अमात्येन-साकं नृपतिदर्शनार्थं निर्गतः। नृपेणापि लब्धा इयं प्रवृत्तिः यत् एको बालः पोतवणिग् गृहीत्वा तानि पुष्पाणि मां साक्षात्कर्तुं मागच्छति इति। अधृतिं प्राप्तः नृपः प्रेक्षते तस्य मार्गं, तावद् मन्त्रिणा सार्धं उसलिअ-रोमकूपः (रोमाञ्चितः) उपनतः जिनदत्तसुतः। कृतं सविनयं नृपतेः अभिनन्दनम्। जाता औपचारिकी वार्ता। प्राभृतीकृतं अन्यद् महार्घ्यं वस्तु, पुष्पाणि पुनः। हृष्टो जातो नृपः। विहितः कुशलवैद्यवरेण औषध-प्रयोगः। अस्ख-

५ गृहीतोपदीकरणार्हविशिष्टवस्तुनिचयः ६ रोमाञ्चितम् (देशीयशब्दः)
७ औपचारिकी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विहिओ कुसल-वेज्जवरेण ओसह-प्पयोगो । अक्खलिया जाया तस्स सुहावहा पडिकिरिआ । अणणुहूअ-पुव्वं सायं वेइअं रण्णा । अणेण मज्झ जीविअदाएं दिण्णं 'ति अईव तुट्ठो भूओ णिवो रयणवालस्सुवरिं । कया उइआ ववत्था । दाविअं वसणारिहं विसालं ठाणं । सुट्ठिअं कयं भंडं । दिण्णं रण्णा राय-सहाए आसणं । पेक्खइ तं भूवइ किवा-दिट्ठीए । सणिअं-सणिअं परिचिओ जाओ तत्थ-गय-ट्ठिईए कुमारो । संचालिओ वावारो । विकीणेउमाढत्तं अइलाहगर-भावेण भंडं । लद्धो अचिंतिओ लाहो । वइक्कंतो छम्मासिओ कालो । गहिअं जुग्गेण भावेण पुणरवि णवीणं तत्थसुलहं भंडं । सयराहमेव णिअं दैसं गंतव्वं 'ति चेट्ठिअं कुमारेण । परं विही किमहिणवं घडेइ 'त्ति णिसमिअव्वं भव्वेहिं ।

अत्थि एगा समय-कुसला विआर-दक्खा सुगहिअ-णाणाविह-सिप्पकलासत्तस्सर - साहणाए - सुविइअ - गंधव्व - विज्जा विचित्त--भासापरिण्णाण--विलसिअ--कव्वकलावा मुत्ता सरस्सई विव अदुट्ठ-वण्णरूवा अणुवमेयागिई अब्भुआगरिसणा सव्वंग-सुंदरी महुरमहुरालावा गुणवई रयणवई णाम णिवस्स धूआ । सा जोव्वणं पत्ता पिअराण चिंता-कारणं जाया । अणेगे कुमारा इमाए कएणं सण्हं विलोइआ रण्णा, परं ण तत्थ कुल-रूव-सील-विज्जाईणं जहच्छिअ-गुणाणं उववत्ती जाया । अजोगस्स जस्स कस्सइ णिवो ण दाउमहिलसइ । जप्पभिइ सव्व-गुण-संजुओ सुरूवो विणयसीलो विवेगी रयणवालो णयणायणमागओ तप्पभिइ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लिता जाता तस्य सुखावहा प्रतिक्रिया। अननुभूतपूर्वं सातं वेदितं राज्ञा। अनेनं मह्यं जीवितदानं दत्तमिति अतीव तुष्टो भूतो नृपो रत्नपालस्योपरि। कृता उचिता व्यवस्था। दापितं वसनार्हं विशालं स्थानम्। सुस्थितं कृतं भाण्डम्। दत्तं राज्ञा राजसभायां आसनम्' प्रेक्षते तं भूपतिः कृपा-दृष्ट्या। शनैः शनैः परिचितः जातः तत्रगत-स्थित्या कुमारः। सञ्चालितः व्यापारः। विक्रेतुं आरब्धं अतिलाभ-करभावेन भाण्डम्। लब्धः अचिन्तितः लाभः। व्यतिक्रान्तः षाण्मासिकः कालः। गृहीतं योग्येन भावेन पुनरपि नवीनं तत्र-सुलभं भाण्डम्। शीघ्रमेव निजं देशं गन्तव्यमिति चेष्टितं कुमारेण। परं विधिः किं अभिनवं घटयति इति निशामयितव्यं भव्यैः।

अस्ति एका समय-कुशला विचार-दक्षा सुगृहीत-नानाविध-शिल्पकला सप्तस्वरसाधनया सुविदित-गान्धर्व-विद्या विचित्र भाषा-परिज्ञानविभूषित-काव्य-कलापा मूर्ता सरस्वती इव अदुष्टवर्णरूपा अनुपमेयाकृतिः अद्भुताकर्षणा सर्वाङ्गसुन्दरी मधुर-मधुरालापा गुणवती रत्नवती नाम नृपस्य दुहिता। सा यौवनं प्राप्ता पित्रोः चिन्ताकारणं जाता। अनेके कुमाराः तस्याः कृते सूक्ष्मं विलोकिताः राज्ञा, परं न तत्र कुल-रूप-शील-विद्यादीनां यथेप्सित-गुणानां उपपत्तिः जाता। अयोग्याय यस्मै कस्मै नृपो न दातुमभिलषति। यत्प्रभृति सर्व-गुण-संयुतः सुरूपो विनयशीलो विवेकवान् रत्नपालो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णिवस्स हिअयम्मि णुमण्णो[1] सो धूआ-पच्चप्पिणट्ठं। णूणमत्थि मे पेमसुहा-ण्हाविआए[2] सुआए जुग्गो रयणवालो कुमारो। ण मए एआरिसो रूव-गुण-सुंदरो परो वरो नरो दिट्ठो; परंतु पावासुओ[3] एसो किं पडिवज्जिहिइ ताए सग्गहं पाणिग्गहणं 'ति चिंताउलिओ णिवो तूल-सयणिज्जम्मि संविसंतोवि[4] ण लहइ णिसीहम्मि णिद्दं। रायेण रक्खिआ णिआ भावणा सइवस्स समक्खं। तेणावि अणुमोइअं उइअं पहुस्स चिंतणं 'ति। कायव्वो पयत्तो, कयाइ लभेज्जा साहल्लं एत्थ। एगम्मि पसण्ण-वायावरणम्मि हक्कारिओ विजणम्मि कुमारो। कुसल-पुच्छणेण सद्धिं दक्खयाए पुरओ रक्खिआ मणोभावणा। नहि णणु अम्हाणं भावणा णिप्फला होहि 'त्ति पयडिआ आसा। भीसणायंक-णिवारगं कुमारं पइ किं पडिकुणेमि इओ अण्णं ?

सुमिणेवि अतक्किअं, अदिट्ठं, अवीमंसिअं च सुणिऊण णिवस्स मग्गणं अईव विम्हिओ चिंतिओ य जाओ कुमारो। किं करणिज्जं किमुत्तरं देयं 'ति विकप्पणा-वीई-आहओ हूओ हिअय-वीईमाली[5]। एगओ अपत्त-जणणीजणगेण मए ण दारपरिग्गहो कायव्वो 'त्ति णिच्छओ। अण्णओ परम-सिलाहणिज्जो णयरणाहस्स अहक्किअव्वो[6] अणुरोहो। उवणओ एत्थ सप्प-छच्छुंदरिआए णाओ।

किमवि अचवमाणं[7] तुण्हीभावमागअं एयं विलोइअ पुणो णरिंदेण सग्गहं पुट्ठं—"कहं तुण्हिक्को त्थि कुमारो ?"

---

१ निषण्णः—उपविष्ट इत्यर्थः 'द्विन्योरुत्' 'उमो निषण्णे' (हे० ११७४)
२ प्रेमसुधास्नपितायाः ३ प्रवासी 'प्रवासीक्षौ' (हे० १-२५) ४ शयानोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नयनायनमागतः तत्प्रभृति नृपस्य हृदये निषण्णः स दुहितृ-प्रत्यर्पणार्थम्। नूनं अस्ति मे प्रेमसुधा-स्नपितायाः सुतायाः योग्यो रत्नपालः कुमारः। न मया एतादृशः रूप-गुण-सुन्दरः परो वरो नरो दृष्टः। परन्तु प्रवासी एष किं प्रतिपत्स्यते तया साग्रहं पाणिग्रहणमिति चिन्ताकुलितः नृपः तूलशयनीये संविशन्नपि न लभते निशीथे निद्राम्। राज्ञा रक्षिता निजा भावना सचिवस्य समक्षम्। तेनापि अनुमोदितं 'उचितं प्रभोःचिन्तनमिति, कर्त्तव्यः प्रयत्नः, कदापि लभेत साफल्यं अत्र। एकस्मिन् प्रसन्नवातावरणे आकारितः विजने कुमारः। कुशल-पृच्छनेन सार्धं दक्षतया पुरतः रक्षिता मनोभावना। नहि ननु अस्माकं भावना निष्फला भविष्यति इति प्रकटिता आशा। भीषणान्तक-निवारकं कुमारं प्रति किं प्रतिकरोमि इतः अन्यत् ?

स्वप्नेऽपि अतर्कितं अदृष्टं अविमृष्टं च श्रुत्वा नृपस्य मार्गणं अतीव विस्मितः चिन्तितश्च जातः कुमारः। किं करणीयं, किं उत्तरं देयमिति विकल्पना-वीच्याहतो भूतो हृदय-वीचिमाली। एकतः अप्राप्त-जननीजनकेन मया न दारपरिग्रहः कर्त्तव्यः इति निश्चयः, अन्यतः परमश्लाघनीय-नरनाथस्य अनिषेधनीयः अनुरोधः। उपनतः अत्र सर्प-छुच्छुन्दरिकायाः न्यायः।

किमपि अजल्पन्तं तूष्णीभावमागतं एतं विलोक्य पुनः नरेन्द्रेण साग्रहं पृष्टम्—"कथं तूष्णीकोऽस्ति कुमारः ?

---

५ हृदयसमुद्रः ६ अनिषेधनीयः। 'निषेधे हक्कः (हे० ४-१३४) ७ अजल्पन्तम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"महं मे भग्गं जं पुरप्पहुणा सप्पसायमामंतिओहं दुहि-आ-दाणट्ठं; किंतु कत्थ अम्हाणं धणेगलोलुहाणं वणिआणं कुलं ? कत्थ छिइ-पइट्ठिओ वीररस-विसिट्ठो रायण्ण-वंसो ? कुह अम्हेच्चया सत्थपरायणा णिच्चभीआ मणोदसा ? कहिं खत्तिआणं थिरसंकप्पा परत्थ-प्पवणा साहसिआ मणट्ठिई ? सोहए सुवण्ण-खसिआ[1] महग्घा मणी, ण उणाइ कय-चा-गचिग्गेवि काय-सयले। जओ जुग्गेण जुग्गस्स जोअणा जोअगस्स मेहामाहप्पं पयडीकरेइ। तो अण्णे अण्णयाणुरूवा महारूव-सत्ति-सालिणो रायकुमारा पेक्खिअव्वा" फुडं कोमलसरं सविणयं कयंजलिणा णिवेइ अंरयणेण।

"ण एत्थ वंचग-सेहराणं णाहस्स पुरओ चलिस्सइ तुह वंचगा वित्ती। जं मण्णणिज्जं तं मण्णणिज्जमेव एत्ताहे, सायं, सुवे, परज्जु अवरज्जु वा। ण एत्थ कोइ अण्णो निग्गमण-मग्गो 'त्ति धुवं मुणिअव्वं। एत्थेव किर कुसलं, किं बहुवाया-वित्थरेण" पणुल्लिअं सव्वंगगिराए सगव्वं जणाहिवेण।

आयण्णिऊण णिवस्स परिणाम-विसढं अंतिमं सूइयं अणूहअं हिअय-कंपणं कुमारेण। ण आणाप्पहाणाणं णिवाणं सुट्ठिआ पीइ 'त्ति सइमागयं णीई-वयणं। तक्खणं रयणेण परिवट्टिओ भासाए सरो। विणत्तं पडिवण्ण-भाव-संदब्भिआए गिराए—"णरणाह ! कया मया पडिसिद्धं भे कहणं ?

---

१ सुवर्णखचिता। 'खचितपिशाचयोश्च सल्लौ वा' (हे० १-२३)।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"महद् मे भाग्यं यत् पुरप्रभुणा सप्रसादं आमन्त्रितः अहं दुहितृदानार्थम्। किन्तु कुत्र अस्माकं धनैकलोलुभानां वाणिजानां कुलम्? कुत्र क्षितिप्रतिष्ठो वीररस-विशिष्टो राजन्यवंशः? कुत्र आस्माका स्वार्थपरायणा नित्यभीता मनोदशा? कुत्र क्षत्रियाणां स्थिरसङ्कल्पा परार्थप्रवणा साहसिकी मनःस्थिति? शोभते सुवर्णखचिता महर्ध्या मणिः[१] न पुनः कृतचाकचिक्येऽपि काचशकले। यतः योग्येन योग्यस्य योजना योजकस्य मेधामाहात्म्यं प्रकटीकरोति। ततः अन्ये अन्वयानुरूपाः महारूपशक्तिशालिनो राजकुमाराः प्रेक्षितव्याः" स्फुटं कोमलस्वरं सविनयं कृताञ्जलिना निवेदितं रत्नेन।

"न अत्र वञ्चकशेखराणां नाथस्य पुरतः चलिष्यति तव वञ्चका वृत्तिः। यत् मन्तव्यं तद् मन्तव्यमेव इदानीं, सायं,श्वः, परेद्युः अपरेद्युर्वा। न अत्र कोऽपि अन्यो निर्गमनमार्गः इति ध्रुवं ज्ञातव्यम्। अत्रैव किल कुशलं किं बहु वाचा-विस्तरेण" प्रेरितं सव्यङ्गगिरा सगर्वं जनाधिपेन।

आकर्ण्य नृपस्य परिणाम-विषमं अन्तिमं सूचितं अनुभूतं हृदयकम्पनं कुमारेण। 'न आज्ञाप्रधानानां नृपाणां सुस्थिता प्रीतिः' इति स्मृतिमागतं नीतिवचनम्। तत्क्षणं रत्नेन परिवर्तितो भाषायाः स्वरः। विज्ञप्तं प्रतिपन्नभावसंहृष्यया गिरा। "नरनाथ! कदा मया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अणेलिसं[1] मह भागहेयं जं सक्खं कप्पलयव्व रायण्णा कण्णा मे वंस-रुक्खमारुहइ। को खु एआरिसो मंदभग्गो जो अब्भागच्छमाणिं लच्छि हक्केइ ? णिआ जुग्गया तु फुडं रक्खिअव्व 'त्ति विवेगिणो धम्मो, जहा ण पच्छाताओ हवइ।

कण्हायण-भूवइणा तक्खणं आहूओ राउल-मुहत्तिओ[2]। पुट्ठं पुत्तिआए पाणिग्गहणट्ठं सुलग्गं तक्कालिअं। पचंग-णिहालण-पुरस्सरं किमवि अंगुलि-पव्वेसु संखायमाणेण चंदसूराइस्सरे गहमाणेण फुडीकयं तेण उवयमस्स पक्ख-मज्झगयं सुदिणं। एगच्चीकया सव्वावि तज्जुग्गा सामग्गी। आढत्तं तुरिआइ-संणिणाएण समं सुहवी-सुस्सर-समुट्ठिअं मंगलगीआइअं पढमिल्लं किच्चं। उच्छिईकया तोरणाईणं मणोहरा रयणा। सज्जीकयाइं णाणामांगलिअ-पुप्फपत्ताण उक्केरेण दाराइं। सिरिरयणवालो रयणवइं परिणेस्सइ 'त्ति सव्वेहिं णायरेहिं णायं। तेहिं वि जहाठाणं विविह-कोउअ-मंगलाइं विरइआइं। समीवमागओ पाणिग्गहण-वासरो। गहिअ-उव्वट्टणेण रयणेण पहिरिओ[3] वरोइओ वग्गुवेसो[4]। अईव धिप्पिरो सो हय-खंधमारूढो। पइच्चच्चरं वड्ढाविआ वरजत्ता णिव मंदिरं पत्ता। जाओ सव्वोवि विवाह-विहि-णिव्वाहो। सलज्ज-णयणेहिं दइअ-मुहचंदं पलोअमाणीए रयणवईए चओरिव्व मणंमि अणोवमिअं सुहमणुहूयं। दायं देंतेण णिवेण अपरिमिआ सुवण्ण-रयणरासी णाण-

---

१ अनीदृशं-अनुपममित्यर्थः २ राजकुलमौहूर्तिकः ३ परिधृतः ४ वल्गुवेशः (वल्गु-रुचिरम्)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिषिद्धं भवतः कथनम् ? अनीदृशं मम भागधेयं यत् साक्षात् कल्पलतावत् राजन्या कन्या मे वंशवृक्षं आरोहति । कः खलु एतादृशो मन्दभाग्यः योऽभ्यागच्छन्तीं लक्ष्मीं निषेधति ? निजा योग्यता तु स्फुटं रक्षितव्या इति विवेकिनो धर्मः, यथा न पश्चात्तापो भवति ।

कृष्णायनभूपतिना तत्क्षणं आहूतो राजकुल-मौहूर्तिकः । पृष्टं पुत्रिकायाः पाणिग्रहणार्थं सुलग्नं तात्कालिकम् । पञ्चाङ्ग-निभालन-पुरस्सरं किमपि अंगुलीपर्वेषु संख्यायता चन्द्रसूर्यादिस्वरान् गृह्णानेन स्फुटीकृतं तेन उपयमस्य पक्षमध्यगतं सुदिनम् । एकत्रीकृता सर्वापि तद्योग्या सामग्री । आरब्धं तूर्यादिसंनिनादेन समं सुभगी-सुस्वर-समुत्थितं मङ्गल-गीतादिकं प्राथमिकं कृत्यम् । उच्छ्रीकृता तोरणादीनां मनोहरा रचना । सज्जीकृतानि नानामाङ्गलिक-पुष्पपत्राणां उत्करेण द्वाराणि । 'श्रीरत्नपालः रत्नवतीं परिणेष्यति' इति सर्वैर्नागरैर्ज्ञातम् । तैः अपि यथास्थानं विविधकौतुकमङ्गलानि विरचितानि । समीपं आगतः पाणिग्रहणवासरः । गृहीतोद्वर्तनेन रत्नेनापि परिधृतः वरोचितः वल्गुवेशः । अतीव दीप्रः सः हयस्कन्धमारूढः । प्रतिचत्वरं वर्धापिता वरयात्रा नृपमन्दिरं प्राप्ता । जातः सर्वोऽपि विवाह-विधि-निर्वाहः । सलज्जनयनाभ्यां दयितमुखचन्द्रं प्रलोकमानया रत्नवत्या चकोरीवत् मनसि अनुपमितं सुखं अनुभूतम् । दायं ददता नृपेण अपरिमितः सुवर्णरत्नराशिः नानाविचित्रदेशान्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विचित्त-देसंतरोवलद्ध-वत्थूहिं सद्धिं ससिणेहं समप्पिआ। णवोढाए सद्धिं समागओ भाणुमई-सुओ ससुर-समप्पिअम्मि पासायम्मि। पयट्टे वि पाणिग्गहण-महूसवे णाणुहवइ अब्भंतरिं संतिं रयणस्संतक्करणं। किं मे इमाए रायधूआए सममुव्वाहेण जाव ण दुहिआणं मायर-पिअराणं हिअयम्मि संतिं पामावेमि[1]। अलाहि तारिसीए सुहेल्लीए[2] जत्थ ण अवस्सं करणिज्जं कज्जं णिव्वाहिअं होइ। तो जाव णाहं पुज्जाणं पिअराणं दंसणं काहं ताव ण पिअयमाए सह गिहत्थासम-सुहं माणिस्सं[3] 'ति निच्चला पइण्णा पडिवण्णा मणम्मि विवेगिणा सुपुत्तेण।

"पिअयमे! अत्थि अम्ह कुलस्स एआरिसी मज्जादा जं णव-परिणीओ णव-बहुआए समं जाव ण कुल-देवयाणं अच्चणं कुणइ ताव ण पंचिंदिअ-सुहेल्लिमणुहविउं पहुप्पइ 'त्ति जाणाविआ रयणेण णवपिअयम-संगम-समुक्कंठिआ णव-भज्जा। लज्जालुइणीए ताए 'अज्जउत्ता पमाणं'ति' साहमाणीए पइ-वयणं साणंदं सीकयं। ण कत्थइ मंतभेओ कायव्वो'त्ति पडिस्सुअं दोहिं। एवं णाणाविहालाव-संलाव-संसत्ताणं जंपईणं अइक्कंता थेवा दिअहा। बहु अवसिट्ठं कज्जं' ति संभरंतेण रयणेण सिग्घमेव णिअ-देस-गमणं णिच्छिअं। सुअवसरं पप्प सविणयं ससुरपाया णिवेइआ। कय-पच्चा-वलणसमीहं मुणेऊण जामायरं, वुण्णं जायं णिवस्स चित्तं। अत्ता[4] तु अईव अत्ता, दुहिआ-विरह-तत्ता, उच्चेअत्तणं[5]

---

१ प्रापयामि २ (दे०) सुखकेली ३ अणुहविस्सं। गुजराती भाषा में 'माणवु' ४ सासू ५ उच्चेतस्त्वम्-चिंतातुरत्वं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रोपलब्धवस्तुभिः सार्धं सस्नेहं समर्पितः। नवोढया सार्धं समागतः भानुमतीसुतः श्वसुरसमर्पिते प्रासादे। प्रवृत्तेऽपि पाणिग्रहणमहोत्सवे नानुभवति आभ्यन्तरीं शान्तिं रत्नस्य अन्तःकरणम्। किं मे अनया राजदुहित्रा समं उद्वाहेन यावत् न दुःखितयोः मातापित्रोः हृदये शान्तिं प्रापयामि। अलं तादृश्या सुखकेल्या यत्र न अवश्यं करणीयं कार्यं निर्वाहितं भवति। ततो यावन्नाहं पूज्यानां पितृणां दर्शनं करिष्यामि तावन्न प्रियतमया सह गृहस्थाश्रमसुखं अनुभविष्यामि, इति निश्चला प्रतिज्ञा प्रतिपन्ना मनसि विवेकिना सुपुत्रेण।

"प्रियतमे! अस्ति अस्मत्कुलस्य एतादृशी मर्यादा यत् नवपरिणीतः नववध्वा समं यावत् न कुलदेवतानां अर्चनां करोति तावत् न पञ्चेन्द्रिय-सुखकेलीं अनुभवितुं प्रभवति" इति ज्ञापिता रत्नेन नवप्रियतम-सङ्ग-समुत्कण्ठिता नव-भार्या। लज्जावत्या तया 'आर्यपुत्राः प्रमाणम्' इति कथयन्त्या पति-वचनं सानन्दं स्वीकृतम्। 'न कुत्रापि मन्त्रभेदः कर्त्तव्यः' इति प्रतिश्रुतं द्वाभ्याम्। एवं नानाविधालापसंलापसंसक्तयोः जम्पत्योः अतिक्रान्ताः स्तोकाः दिवसाः। बहु अवशिष्टं कार्यमिति स्मरता रत्नेन शीघ्रमेव निज-देश-गमनं निश्चितम्। सुअवसरं प्राप्य सविनयं श्वसुरपादाः निवेदिताः। कृतप्रत्यावलनसमीहं ज्ञात्वा जामातरं वुन्नं (उद्विग्नं) जातं नृपस्य चित्तम्। अत्ता (श्वश्रूः) तु अतीव आर्ता दुहितृविरहतप्ता उच्चेतस्त्वं प्राप्ता।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च पत्ता। हरे! एआरिसी का तुरा? किमेत्थ पईवं[1]? कहमुव्विग्गो जामायर-मणो? आहूओ णिअ-पासायम्मि ससिणेहं अत्ताए पुत्तसमाणो जामाया। साणुरोहं कहेउ-माढत्ता—"दे जामायरं! ण कहं जीहिआ[2] होइ दे जीहा गच्छेमि'त्ति कहेंती? एआरिसी हलिद्दा-राय-सरिच्छा तुह पीई! संपइ च्चिअ विवाह-कज्जं समत्तं, ण तस्स खेओ अहुणावहि उत्तरिओ, कहं गमण-पउत्ती पयालिआ तुमए। धी! धी! किं पवासूण सोहदं? को तेसिं वीसासो? को तेसिं संबंधो? एमेव उत्तम्मइ तेहिं सद्धिं मेत्तिं जोएंतो[3]। णो, ण संपइ गमण-संबंधिअं एगक्खरमवि जंपिअव्वं, पच्छा जहा-समयं सयं वयं तम्मि विसयम्मि चिंतिस्सामु'त्ति साहेमाणी सासू अंसुजलाउल-लोअणा जाया।

"णाहं एत्थ संपइ चिराएउं खमोम्हि। पुव्वमेव मे कालाइवट्टणं जायं कय-णिच्छयाऽणुसारेणं। अत्थि मे तत्थ अच्चंतमावस्सयं किच्चं। अपत्ते मईं[4] विणट्ठं होइ तं सयलं, तम्हा किवाए मे एगागिणो पच्चावलणमणुमोइअव्वं संपइ। पच्छा जहाकालं पुणरवि अहमेत्थ सयराहमेव आगमिस्सं" पयडिअं सदक्खिण्णं रयणेण।

एगागिणो गमणं 'ति सुणिऊण राया अईव जूरिओ[5] जाओ। को वीसंभो पवासिणो, कया पच्छा आगच्छेज्ज? पउत्थस्स[6] का भाव-परिणई होइ 'त्ति केण णज्जइ?

---

१ प्रतीपम् २ लज्जिता। लस्जेर्जीहिः (हे० ४-१०३) ३ उत्ताम्यति-खिन्नो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हरे ! एतादृशी का त्वरा ? किमत्र प्रतीपम् ? कथं उद्विग्नं जामातृमनः ? आहूतः निजप्रासादे सस्नेहं स्वश्रूवा पुत्रसमानः जामाता सानुरोधं कथयितुं आरब्धा—"हे जामातः ! न कथं लज्जिता भवति तव जिह्वा गच्छामि इति कथयन्ती ? एतादृशी हरिद्रारागसदृक्षा तव प्रीतिः ? सम्प्रति एव विवाह-कार्यं समाप्तं, न तस्य खेदः अधुनावधि उत्तीर्णः, कथं गमनप्रवृत्तिः प्रचालिता त्वया ? धिग् ! धिग् ! किं प्रवासिनां सौहृदम् ? कस्तेषां विश्वासः ? कस्तेषां सम्बन्धः ? एवमेव उत्ताम्यति तैः सार्धं मैत्रीं योजयन्[4] । नो, न सम्प्रति गमनसम्बन्धिकं एकाक्षरमपि जल्पितव्यं, पश्चात् यथासमयं स्वयं वयं तस्मिन् विषये चिन्तयिष्यामः[5]" इति कथयन्ती स्वश्रूः अश्रुजलाकुललोचना जाता ।

"नाहं अत्र सम्प्रति चिरायितुं क्षमोऽस्मि । पूर्वमेव मे कालातिवर्तनं जातं कृतनिश्चयानुसारेण । अस्ति मे तत्र अत्यन्तं आवश्यकं कृत्यम् । अप्राप्ते मयि विनष्टं भवति तत् सकलम् । तस्मात् कृपया मे एकाकिनः प्रत्यावलनं अनुमोदितव्यं सम्प्रति । पश्चाद् यथाकालं पुनरपि अहं अत्र शीघ्रमेव आगमिष्यामि" प्रकटितं सदाक्षिण्यं रत्नेन ।

'एकाकिनः गमनम्' इति श्रुत्वा राजा अतीव खिन्नो जातः[6] । कः विश्रम्भः प्रवासिनः, कदा पश्चात् आगच्छेत् ? प्रोषितस्य का भावपरिणतिः भवति इति केन ज्ञायते ? प्रोषितपतिकायाः रत्नवत्याः का

भवतीत्यर्थः ४ योजयत् ५ मयि ६ खिन्नः ७ (दे०) प्रोषितस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पउत्थ-पइआए[1] रयणवईए का चिंतणिज्जा ठिई जायए पच्छा ? एवं भविस्स-दक्खेण भूवइणा पज्जरिअं[2]—"जामायर! साहुं णिच्छिअं गंतव्वं। तत्थ वि एगागिणा गंतव्वं 'ति बहुसाहुं णिच्छिअं। सच्चं खु आभाणगमिणं[3] जं "परे किर पराअंति णिआ जेव्व[4] णिआयंति" ण एत्थ संदेहो। जइ गंतव्वं ता गच्छउ सुहेण, को पडिसेहइ, परमीसिकालं जाव चिट्ठिअव्वं, इअ अम्हाणं समीहा। एगागिगमण-समीहा तु णिअंतं हस्सपयं[5]। पउत्थ-पइआए जुवईए का अवत्था हवइ 'त्ति ण विहाविअं तुमए। छज्जए किर घणाघणेण समं सोआमणी[6]। तहा पइणा सद्धिं रेहए णिच्चमेगपत्ती[7]। खेत्तिअं विणा खेत्त-भूमी इव, मालागारं विणा पुप्फवाडी व ण रायइ दइअ-विरहिआ अण्णासया विलया। अक्खिकंट-गायंति छोक्करीओ[8] सच्छंदं पिउहरं चिरं चिट्ठमाणीओ। ता भज्जा-बिइएण च्चेव तुमए वच्चणिज्जं 'ति णे[9] मयं[10]। जहा अम्हाणं कत्तव्व-भारो लहुओ सिआ। इअरहा तुम्हे तत्थ, अम्हे एत्थ णिरंतरं चिंता-दूमिअ-हिअया चिट्ठिहामो। इत्थं सुट्ठु बोहिओ वि रयणवालो ण कहमवि णिअं भज्जं सह णेउं तप्परो जाओ।

राय-राणीपभिइणो एत्थ अलद्धपडिआरा किमणुचिट्ठि-अव्वं 'ति उत्तत्था जाया; ताव एगो कोइ विविह-जंत-मंत-तंत-विसारओ परिणयवयो झडिलो[11] अलक्खिओ कुओवि आवडिओ। सपत्तीएण रण्णा सविणयं वंदिओ,जहोइअं पूइओ

---

१ प्रोषितपतिकायाः २ कथितम् ३ आभाणकम्— कहावत (इतिभाषा) ४ एव ५ हास्यपदम् ६ सौदामिनी-विद्युत् ७ एकपत्नी-सुचरित्रा ८ (दे०) कन्याः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिन्तनीया स्थितिः जायते पश्चात् ? एवं भविष्य-दक्षेण भूपतिना कथितम्—"जामातः ! साधु निश्चितं गन्तव्यम् । तत्रापि एकाकिना गन्तव्यमिति बहुसाधु निश्चितम् । सत्यं खलु आभाणकं इदं यत् 'परे किल परायन्ते निजाः एव निजायन्ते' न अत्र सन्देहः । यदि गन्तव्यं तदा गच्छतु सुखेन, कः प्रतिषेधति, परं ईषत्कालं यावत् स्थातव्यं इति अस्माकं समीहा । एकाकि-गमन-समीहा तु नितान्तं हास्यपदम् । प्रोषितपतिकायाः युवत्याः का अवस्था भवति इति न विभावितं त्वया ? शोभते किल घनाघनेन समं सौदामिनी । तथा पत्या सार्धं शोभते नित्यं एकपत्नी । क्षेत्रिकं विना क्षेत्रभूमिः इव, मालाकारं विना पुष्पवाटी इव न राजते दयित-विरहिता अन्याश्रया वनिता । अक्षिकण्टकायन्ते छोक्करीओ (कन्याः) स्वच्छन्दं पितृगृहं चिरं तिष्ठन्त्यः । ततः भार्या-द्वितीयेन एव त्वया व्रजनीयं इति अस्माकं मतम् । यथा अस्माकं कर्त्तव्यभारः लघुकः स्यात् । इतरथा यूयं तत्र, वयं अत्र निरन्तरं चिन्तादूनहृदयाः स्थास्यामः । इत्थं सुष्ठु बोधितोऽपि रत्नपालो न कथमपि निजां भार्यां सह नेतुं तत्परो जातः ।

राज-राज्ञीप्रभृतयः अत्र अलब्ध-प्रतीकाराः किं अनुष्ठातव्यमिति उत्त्रस्ता जाताः तावत् एकः कोऽपि विविध-यन्त्र-मन्त्र-तन्त्र-विशारदः परिणतवयाः जटिलः[९] अलक्षितः कुतोऽपि आपतितः । सपरिकेन राज्ञा सविनयं वन्दितः, यथोचितं पूजितः स निर्भरं प्रसन्नमनाः जातः ।

---

९ णे-नः अस्माकम् १० मतम् ११ जटिलः । 'जटिले जोज्झो वा (हे० १-१२४) ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सो णिब्भरं पसण्णमणो जाओ। आइग्गं मिलाणमुहपंकजं णिवं णिहालिअ तेण तक्कालमणुजोइअं—"णरेस ! कहमज्ज हिमाणीहयं पिव लक्खिज्जइ ते वयण-कमलं ? किमेआरिसं अंतस्सल्लं विज्जए तुह मणोगयं ? जइ अत्थि पाउक्करणिज्जं ता कहसु, जहा कोइ तज्जुग्गो पडिआरो गवेसिउं सक्किज्जइ अम्हारिसेहिं"।

"किं वागरणेण भंते ! नत्थि णूणमेत्थ कोइ उवाओ दिट्ठिपहमोअरइ। हा ! अविहाविअं जायए"! उइण्णं सल्लेअं णरिंदेण।

"तहवि सुस्सूसा मे जइ ण विज्जए गुज्झं" पुणरवि जिण्णासिअं झडिलेण।

महप्पाणमभिमुहं किं गुज्झं गोवणिज्जं 'ति णिवेरा एगागिगमणुच्छुअस्स दुहिआपइणो सव्वो वइअरो फुडीकओ। ण एत्थ बलप्पओगो उइओ। कहं पुत्ती णेण सद्धिं पेसविज्जइ 'त्ति महई चिंता।

"किमत्थि णिरुवायं जइ करिज्जइ कज्जं सदक्खिण्णं" पुणारुच्चारिअं जोगिणा।

"होहिमो अम्हे साणुग्गहा जइ कोइ मग्गो एत्थ णिदंसिज्जइ किवालुणा भदंतेण" साहिअं उक्कंठिरेण खिइ-सक्केण इक्कवए।

"इत्थिआ-रूवत्तो जइ पुरिसरूवम्मि परावट्टिज्जइ रयणवई तहाविहा पट्ठविज्जइ णिअ-भत्तारेण सद्धिं णिअं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उद्विग्नं म्लानमुख-पङ्कजं नृपं निभाल्य तेन तत्कालं अनुयोजितम्—"नरेश ! कथं अद्य हिमानी-हतं इव लक्ष्यते ते वदनकमलम् ? किं एतादृशं अन्तःशल्यं विद्यते तव मनोगतम् ? यदि अस्ति प्रादुष्करणीयं तदा कथय, यथा कोऽपि तद्योग्यः प्रतीकारः गवेषयितुं शक्यते अस्मादृशैः।"

"किं व्याकरणेन भदन्त ! नास्ति नूनं अत्र कोऽपि उपायः दृष्टिपथं अवतरति। हा ! अविभावितं जायते।" उदीर्ण सखेदं नरेन्द्रेण।

"तथापि सुश्रूषा मे यदि न विद्यते गुह्यम्" पुनरपि जिज्ञासितं जटिलेन।

महात्मनां अभिमुखं किं गुह्यं गोपनीयं इति नृपेण एकाकिगमनोत्सुकस्य दुहितृपतेः सर्वो व्यतिकरः स्फुटीकृतः। न अत्र बलप्रयोगः उचितः। 'कथं पुत्री अनेन सार्धं प्रेष्यते' इति महती चिन्ता।

"किमस्ति निरुपायं यदि क्रियते कार्यं सदाक्षिण्यम्" पुनरुच्चारितं योगिना।

"भविष्यामः वयं सानुग्रहाः यदि कोऽपि मार्गः अत्र निर्दिश्यते कृपालुना भदन्तेन" कथितं उत्कण्ठितेन क्षिति-शक्रेण एकपदे।

"स्त्री-रूपात् यदि पुरुषरूपे परावर्त्यते रत्नवती तथाविधा प्रस्थाप्यते निजभर्त्रा सार्धं निजं देशं, तदा न किं अस्म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देसं तया ण किं अम्हेकरं कज्जं साहिअं भवेज्ज ?" पवेइअं णिअ-सत्ति-णिग्गसण-तप्परेण जोइणा।

किमण्णं जुप्पइ[1] जइ एवं भविउं सक्केज्ज ? दंसणिज्जो एआरिसो जोगिअ-विज्जा-चमक्कारो परोवगिइ-पंडिएण मुणिणा। णूणमम्हे कयत्था होस्सामु[2]त्ति विण्णत्तं साकंखं जडिल-मुहागिइं जोअमाणेण पयावइणा।

"किं मोरउल्ला गमिआणि एट्टहाणि वासाणि मए वणमडमाणेण, मोणमायरमाणेण य जइ हं ईइसं खुल्लं कज्जंपि ण साहिउं[3] सक्केमि" सूइअं साहिमाणं तवोधणेण।

तक्खणं आहूआ णेण दुहिआ ससमोवं। णिक्कासिग्गं झोलिआओ जडिआजुअलं। ताए एगाए सविहिप्पओगेण विलया णरत्तणमावज्जइ, बीआए पओगेण पुणरवि सब्भाव-माराहेइ सा। कओ पढमिल्लाए पओगो तक्कालं। राउल-जोइरूवम्मि रयणवई तक्खणं परिवट्टणं पत्ता। 'खलु मणिमंतोसहीणं अचिंतणिज्जो पहावो' त्ति जहत्था उत्ती सक्खं सच्चाविआ सव्वेहिं। धारिग्गं कासाइग्गं कोसेज्जं[3] धिप्पिरं उत्तरिज्जं राउलेण। आजाणुलंबायमाणी सिढिला खंधदेसमारोविआ मणोहरा कासाइया कंथा। उत्तमंगम्मि वि ठविआ राउलमयाणुरूवा फडाडोव-वज्जिआ टोपिआ[4]। हत्थेसु गहिआ णाणामहुर-सरालाव-महुरा णवीणा वीणा। अण्णाहिं वि सव्वाहिं तज्जुग्गसामग्गीहिं

---

१ युज्यते 'युजो जुज्ज-जुज्ज-जुप्पाः (हे० ४-१०९) पश्यता। २ साधयितुम् ३ कौशेयम् 'रेशमीवस्त्र' (इतिभाषा)। ४ देशीयः शब्दः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीयं कार्यं साधितं भवेत् ?" प्रवेदितं निजशक्ति-निदर्शन-तत्परेण योगिना ।

"किं अन्यद् युज्यते यदि एवं भवितुं शक्येत ? दर्शनीयः एतादृशः यौगिक-विद्या-चमत्कारः परोपकृति-पण्डितेन मुनिना । नूनं वयं कृतार्थाः भविष्यामः ।" इति विज्ञप्तं साकाङ्क्षं जटिलमुखाकृतिं पश्यता प्रजापतिना ।

"किं मुधा गमितानि इयन्ति वर्षाणि मया वनं अटता, मौनमाचरता च यदि अहं ईदृशं क्षुद्रं कार्यमपि न साधयितुं शक्नोमि" सूचितं साभिमानं तपोधनेन ।

तत्क्षणं आहूता अनेन दुहिता स्वसमीपम् । निष्कासितं झोलिकातः जटिकायुगलम् । तस्याः एकस्याः सविधिप्रयोगेण वनिता नरत्वं आपद्यते । द्वितीयायाः प्रयोगेण पुनरपि सद्भावं आराधयति सा । कृतः प्राथमिक्याः प्रयोगः तत्कालम् । राउलयोगिरूपे रत्नवती तत्क्षणं परिवर्तनं प्राप्ता । खलु मणिमन्त्रौषधीनां अचिन्तनीयः प्रभावः' इति यथार्था उक्तिः साक्षात् सत्यापिता सर्वैः । धारितं काषायं कौशेयं दीप्रं उत्तरीयं राउलेन । आजानुलम्बायमाना शिथिला स्कन्धदेशमारोपिता मनोहरा काषायी कन्था । उत्तमाङ्गेऽपि स्थापिता राउलमतानुरूपा फटाटोप-वर्जिता टोपिका । हस्तयोः गृहीता नानामधुर-स्वरालाप-मधुरा नवीना वीणा । अन्याभिः अपि सर्वाभिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विहूसिओ सो अईव सूहवो सव्वेहिं सच्छरिज्जं पुलइअव्वो-जाओ ।

पुणरवि समयण्णूणा णिवेण पासायम्मि णिमंतिओ जामाया, सूइयं पुण इत्थं–"जामाय ! कयेवि अग्गहे ण एत्थ तुह ठाउं समीहा, ण उण णिअं भज्जं सह णेउं । किं बलं चलइ अम्ह जामायरस्सुवरिं । सिढिलिअ-सिणेहाणं पउत्थाणं दीवंतरगयाणं को वीसंभो पच्चावलणस्स । तस्स संभारणट्ठं एगो अम्हकेरो महादक्खो बालजोई रयणवईए बाल-सहअरो तुमए सद्धिं पट्ठविज्जइ अम्हेहिं । सो जहा समयं ससुरालयस्स सइं[1] कारावेंतो पुणरागमणपेरणं च देंतो चिट्ठिस्सइ । अम्हेच्चयं माणसमवि निब्भरं भरिअं आसा-विअंभिअं वट्टिस्सइ ।

"आम, अइ सोहणमिणं । साहुवी जोअणा घडिआ । ण एत्थ कस्सइ काइ बाहा ।" साहिअं पडिवण्ण-भावणा-पूरिएण सरेण रयणेण ।

इओ अ अब्भुअ-मुहच्छवी-मोहणो पच्चक्खं इंगिआगार[2]-लक्खिज्जमाणचाउज्जो बालो वि पसंत[3]-णित्तणीलुप्पलो किमवि जवंतो व ईसिप्फुरिअ-अहरुट्ठो गीवा-ठविअ-रुद्दक्खमालो तत्थेव आगओ राउलो । सव्वेसिं ससम्माणं लद्धप्पणामो उइयासणम्मि अच्छिओ । तं णिरक्खिऊण रयणवालो रोमंच-कंचुइओ विम्हय-सेराणणो भूओ । अव्वो ! ललिए बालकालेवि कहमेसो लद्धवेरग्गो ? धण्णा अस्स

---

१ प्रेशितव्यः । यथा—सच्चविअ-दिट्ठ-पुलइअ-निअच्छियाइं–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्योग्य-सामग्रीभिः विभूषितः स अतीव सुभगः सर्वैः साश्चर्यं प्रेक्षितव्यः जातः ।

पुनरपि समयज्ञेन नृपेण प्रासादे निमन्त्रितः जामाता, सूचितं पुनरित्थं—"जामातः ! कृतेऽपि आग्रहे न अत्र तव स्थातुं समीहा, न पुनः निजां भार्यां सह नेतुम् । किं बलं चलति अस्माकं जामातुः उपरि ! शिथिलित-स्नेहानां प्रोषितानां द्वीपान्तर-गतानां कः विश्रम्भः प्रत्यावलनस्य । तस्य स्मारणार्थं एकः अस्मदीयो महादक्षो बालयोगी रत्नवत्याः बालसहचरः त्वया सार्धं प्रस्थाप्यते अस्माभिः । स यथासमयं श्वसुरालयस्य स्मृतिं कारयन् पुनरागमन-प्रेरणां च ददत् स्थास्यति । अस्माकं मानसमपि निर्भरं भरितं आशा-विजृम्भितं वर्त्स्यति ।"

"आम् अतिशोभनमिदम् । साध्वी योजना घटिता । न अत्र कस्यापि कापि बाधा ।" कथितं प्रतिपन्न-भावना-पूरितेन स्वरेण रत्नेन ।

इतश्च अद्भुत-मुखच्छवि-मोहनः प्रत्यक्षं इङ्गिताकार-लक्ष्यमान-चातुर्यः बालोऽपि प्रशान्त-नेत्रनीलोत्पलः किमपि जपन् इव ईषत्-स्फुरिताधरौष्ठः ग्रीवा-स्थापित-रुद्राक्षमालः तत्रैव आगतः राउलः । सर्वेषां ससम्मानं लब्धप्रणामः उचितासने आसितः । तं निरीक्ष्य रत्नपालो रोमाञ्चकञ्चुकितो विस्मय-स्मेराननो भूतः । अव्वो ! ललिते बालकालेऽपि कथं एष लब्ध-वैराग्यः ? धन्याः अस्य मातर-

---

निहालिअऽत्थम्मि (पाइय० १३५) २ स्मृतिम् ३ इङ्गिताकाररलक्ष्यमानचातुर्यः । ४ प्रशान्तनेत्रनीलोत्पलः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मायरपिअरा जेसिं कुलम्मि एआरिसो होंतजोइओ वंसुद्धार-कारगो पुत्तो समुप्पण्णो ।

"किं भे विरत्तिकारणं कीला-विलसिअम्मि अणाणुहूअ-जगववहारम्मि बल्लम्मि[1] ? अच्छरिज्जमिणं कहं विच्छ-ड्डिओ बंधूणं सिणेहो ? हरे ! लोगुत्तरं कज्जमिणं ?" जिण्णासिअं रयणवालेण ।

"पइपयं वेरग्गं समुज्जिभइ जइ जोअेइ जणो जागरूआए दिट्ठीए । एत्थ-गयं किं थिरं 'ति ण कहं विहाविज्जइ जगजीवेहिं ? गोसे[2] पवोसे[3] वा धम्मं करिस्सं 'ति कहणं मूढया-विलसिअं । किं णागमुग्घोसणा कण्णगया ? जहा—

"जस्सत्थि मच्चुणा सक्खं, जस्स वत्थि पलायणं ।
जो जाणे ण मरिस्सामि, से हु कंखे सुवे सिआ ।।"

एवं भणमाणो राउलो णिमीलिअ-णयणो झाणं गओ । संदमाण–संतरसं अस्स सोम्मं मुहमुद्दं णिहालेंतो रयणवालो पभाविओ जाओ ।

एत्थंतरम्मि सज्जीकयं णेण बोहित्थं । सदेस-दुल्लहं एत्थ सुलहं भंडं किणिऊण तम्मि णिवेसिअं । पट्टाण-दिणं णिच्छिअं । ववहार-महुरिमाए अस्स अणेगे जणा संगया जाया । सव्वेसिं णायराणं पीइभायणं जाओ एसो । मुणिऊण पच्चावलण-तप्परमेयं सव्वेवि ते सोहदं दक्खवेंता अस्सुवकण्ठं समागच्छंति । विविह-पउत्तीहिं एयं पसंसेंता, पच्छा कया सम्मेलणं होहि 'त्ति भणेंता, मुहागिईहिं खेअं सूअयंति ।

---

१ बाल्ये । २ गोसं—प्रभातम् (दे०) ३ प्रदोषः-सायम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पितरः येषां कुले एतादृशः भविष्यद्-योगिकः वंशोद्धारकारकः पुत्रः समुत्पन्नः।"

"किं भवतः विरक्तिकारणं क्रीडाविलसिते अननुभूत-जगद्-व्यवहारे बाल्ये ? आश्चर्यमिदम् ! कथं त्यक्तः बन्धूनां स्नेहः ? हरे ! लोकोत्तरं कार्यमिदम् ?" जिज्ञासितं रत्नपालेन।

प्रतिपदं वैराग्यं समुज्जृम्भते यदि पश्यति जनः जागरूकया दृष्ट्या। अत्रगतं किं स्थिरं इति न कथं विभाव्यते जगज्जीवैः। 'गोसे (प्रभाते) प्रदोषे वा धर्मं करिष्यामि' इति कथनं मूढ़ता-विलसितम्। किं न आगमोद्घोषणा कर्णगता ? यथा—

जस्सत्थि मच्चुणा सक्खं जस्स वत्थि पलायणं।
जो जाणे ण मरिस्सामि से हु कंखे सुवे सिआ॥

एवं भणन् राउलो निमीलितनयनो ध्यानं गतः। स्यन्दमान-शान्तरसां अस्य सोम्यां मुखमुद्रां निभालयन् रत्नपालः प्रभावितो जातः।

अत्रान्तरे सज्जीकृतं अनेन बोहित्थम्। स्वदेशदुर्लभं अत्र सुलभं भण्डं क्रीत्वा तस्मिन् निवेशितम्। प्रस्थानदिनं निश्चितम्। व्यवहार-मधुरिम्णा अस्य अनेके जनाः सङ्गताः जाताः। सर्वेषां नागराणां प्रीतिभाजनं जातः एषः। ज्ञात्वा प्रत्यावलन-तत्परं एतं सर्वेऽपि ते सौहृदं दर्शयन्तः अस्योपकण्ठं समागच्छन्ति। विविध-प्रवृत्तिभिः एतं प्रशसन्तः 'पश्चात् कदा सम्मेलनं भविष्यति' इति भणन्तः मुखाकृतिभिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्थ गएणावि भवया कयाइ अम्ह संभरणं कायव्वं 'ति पुणो पुणो उईरयंति च । रयणवालो वि सव्वेसिं तेसिमाभारमंगीकरेंतो कयंजली उवचिट्ठइ । सव्वेसिं जायगाणं तत्थगय-भिच्चाणं पुण जहोचिअ-विअरणेण एसो तुट्ठि मुप्पावेइ ।

आगयं रयणवालस्स पच्चावलण-दिणं । इओ य सज्जाहवइ पट्ठाउं राउलरूवा रयणवई । आइग्गं जायं अम्मापिअराण हिअयं । बाहुल्लणयणा जायए वारं वारं परम-पेम्मपोसिआ दारिआ । परिचिअं संसारं जहाय गंतव्वमपरिचिअ-पुव्वं ससुरालयं[1] । केरिसो कडुमहुरो ववहारो तत्थ होहि 'त्ति णाणा-संकप्पपरो मणो । जम्मसंगयाणं सव्वाणं विरहो उव्वेलेइ हिअय-समुद्दं ताए । उच्छंगीकाऊण पुत्तिअं माया अंसूहिं इमं सिणावेमाणी सिक्खेउं पउत्ता—"पिअदुहिआ ! दुहिआ[2] अम्हे सव्वेवि अज्ज ते विरहेण । किमवि महामुल्लं वत्थुजायं अम्हत्तो दूरिअं हवइ 'त्ति खिण्णं मणे चित्तं । किं बलं ! परगेह-गामणीओ दुहिआओ 'त्ति फुडा किवदंती । सुहं वच्चसु तणुआ ! धुवं सोहग्गं तुह हवउ । णिच्चं णिरामया चिट्ठउ जुअलस्स तणू । खारसमुद्दं वच्चंतु तुम्ह सव्वपीलाओ । दारिआ ! णव्वो पएसो । सव्वेवि अलक्खिअ-सहावा जणा तत्थ । अणणुहूआ सज्जुक्का कज्जप्पणाली । तत्थ बहु-दक्खयाए तुमए होअव्वं । राय पुत्तिया हं कहं कज्जं करेमि 'त्ति ण चिंतणिज्जं । कज्ज-

---

१ पुं० न० २ दुःखिताः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खेदं सूचयन्ति, 'तत्रगतेनाऽपि भवता कदापि अस्माकं स्मरणं कर्त्तव्यं' इति पुनः पुनः उदीरयन्ति च। रत्नपालोऽपि सर्वेषां तेषां आभारं अङ्गीकुर्वन् कृताञ्जलिः उपतिष्ठते। सर्वेषां याचकानां तत्रगत-भृत्यानां पुनः यथोचित-वितरणेन एष तुष्टिं उत्पादयति।

आगतं रत्नपालस्य प्रत्यावलन-दिनम्। इतश्च सज्जा भवति प्रस्थातुं राउलरूपा रत्नवतो। उद्विग्नं जातं मातरपित्रोः हृदयम्। वाष्पार्द्रनयना जायते वारं-वारं परम-प्रेम-पोषिता दारिका। परिचितं संसारं हित्वा गन्तव्यं अपरिचितपूर्वं श्वसुरालयम्। कीदृशः कटु-मधुरो व्यवहारः तत्र भविष्यति इति नाना सङ्कल्पपरं मनः। जन्मसङ्गतानां सर्वेषां विरहः उद्वेलयति हृदय-समुद्रं तस्याः। उत्सङ्गीकृत्य पुत्रिकां माता अश्रुभिः इमां स्नपयन्ती शिक्षयितुं प्रवृत्ता—"प्रियदुहितः! दुःखिताः वयं सर्वेऽपि अद्य तव विरहेण। किमपि महामूल्यं वस्तुजातं अस्मत्तः दूरितं भवतीति खिन्नं मन्ये चित्तम्। किं बलम्? 'परगेह-गामिन्यो दुहितरः' इति स्फुटा किंवदन्ती। सुखं व्रज तनुजे! ध्रुवं सौभाग्यं तव भवतु। नित्यं निरामया तिष्ठतु युगलस्य तनूः। क्षार-समुद्रं व्रजन्तु तव सर्वपीडाः! दारिके! नव्यः प्रदेशः। सर्वेऽपि अलक्षित-स्वभावाः जनाः तत्र। अननुभूता सद्यस्का कार्यप्रणाली। तत्र बहुदक्षतया त्वया भवितव्यम्। 'राजपुत्रिकाऽहं कथं कार्यं करोमि'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्पहाणा पिअया सव्वत्थ ण केवलं कुल-रूव-प्पहाणा। परेहिं अणट्ठमक्कोसिआ वि तुमं सहिरी[1] भवेज्जा। रेहंति खु सहिरिआओ कुलबहुआओ कामं। कायव्वा सविणयं सासू-ससूराण सुस्सूसा। जारिसा अम्हे तारिसा तप्पक्खिआ तुहकए तेवि। अणुऊलिअव्वं पिअयमस्स दक्खयाए चित्तं। फरुसो सरुसो वि सद्दो पणइणो समये सहिअव्वो सधिज्जं। अण्णहा ण चलइ जेट्ठासमो तितिणिअ[2]-सहावाणं। अंगआ ! पर-मण-विजयिरी ताहे तुमं होहिसि जाहे सयं मणंसिणी भाविणी। वत्थालंकार-रूव-लाअण्णाईणं आगरिसणं तु एगया दिट्ठि-पह-पडिअं खणिअं होइ, परंतु णिच्छल-महुर-ववहारस्स णिच्चं परिवड्ढिअ-प्पहावमागरिसणं सव्वाण-मुवरिं सरिच्छं होइ। सुआ ! अत्थि अयं जीवण-संगामो। निवडंति अणेगे अणुऊल-पडिऊला पक्कमा। तत्थ भिसं भाविआ, पत्तिआ, रोइआ, धम्मिआ भावणा च्चिअ सामइअं संति पयाउं खमा। ता दुहिएण विव सुहिएणावि धुवं धम्मो आराहिअव्वो, तेण सित्ता पंफुल्लिआ जायइ समया-लया। फलेइ सा णिच्चं सुहंकराणि फलाणि। ता सासय-सुहिओ धम्मिट्ठो।" एवं सुवयणेहिं भिसं सिक्खिआ, णाणा-णिआणु-हवेहिं बोहिआ, उरसा गाढमालिंगिआ, सयं रुवेंती अण्णे रुवावेंती, रयणवई पवसिउं तप्परा जाया।

इओ सज्जीहूअ आगओ जामाया ससुरपक्खिआणं-आसीसं णेउं। अत्ताए दत्ता जामायरस्स सुहाऽऽसीसा।

---

१ सहिष्णुः २ तितिणिअ-स्वाभावानाम् (दे०) बड़बड़ाने वाले स्वभाव वाला (इतिभाषा)।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति न चिन्तनीयम् । कार्यप्रधाना प्रियता सर्वत्र न केवलं कुल-रूप-प्रधाना । परैः अनर्थं आकृष्टाऽपि त्वं सहिष्णुः भवेः । शोभन्ते किल सहिष्णुतया कुलवध्वः कामम् । कर्त्तव्या सविनयं स्वश्रू-श्वसुराणां सुश्रूषा । यादृशा वयं तादृशाः तत्पक्षिकाः तव कृते तेऽपि । अनुकूलयितव्यं प्रियतमस्य दक्षतया चित्तम् । परुषः सरोषोऽपि शब्दः प्रणयिनः समये सोढव्यः सधैर्यम् । अन्यथा न चलति ज्येष्ठाश्रमः तिन्तिनिक-स्वभावानाम् । अङ्गजे ! परमनोविजेत्री तदा त्वं भविष्यसि यदा स्वयं मनस्विनी भाविनी । वस्त्रालङ्कार-रूप-लावण्यादीनां आकर्षणं तु एकदा दृष्टिपथ-पतितं क्षणिकं भवति, परन्तु निश्चलमधुर-व्यवहारस्य नित्यं परिवर्धितप्रभावं आकर्षणं सर्वेषां उपरि सदृक्षं भवति । सुते ! अस्ति अयं जीवनसंग्रामः । निपतन्ति अनेके अनुकूल-प्रतिकूलाः प्रक्रमाः । तत्र भृशं भाविता प्रत्ययिता रोचिता धार्मिकी भावना एव सामयिकीं शान्तिं प्रदातुं क्षमा । तस्माद् दुःखितेन इव सुखितेनापि ध्रुवं धर्मः आराधयितव्यः । तेन सिक्ता प्रफुल्ला जायते समतालता । फलति सा नित्यं शुभङ्कराणि फलानि । तस्मात् शाश्वत सुखितो धर्मिष्ठः ।" एवं सुवचनैः भृशं शिक्षिता नानानिजानुभवैः बोधिता उरसा गाढं आलिङ्गिता स्वयं रुदती अन्यान् रोदयन्ती रत्नवती प्रवस्तुं तत्परा जाता ।

इतः सज्जीभूय आगतः जामाता श्वसुर-पाक्षिकाणां आशिषं नेतुम् । अत्तया (श्वश्रूवा) दत्ता जामात्रे शुभाऽऽशीः । सिद्धं कुर्वन्तु, शिवाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिद्धं कुणंतु, सिवा भे पहा संतु 'त्ति सहरिसं सरोमुग्गमं सव्वेहिं साहिअं। राउलोवि तत्थेव आगओ। विगय-संकोचं अंतरंगम्मि होंतविरहेण विसण्णोवि उवरिम-भावेण साणंदं णिसण्णो रयणवालस्स समकक्खं। सासूए साणुसयं साहिअं –'जामायरं! अत्थि राउलो अम्ह पुत्तिआए अबिइज्जओ सहयरो। रयणवई विव एसो तुम्हेहिं सुरक्खिअव्वो किं बहुकहणेण। अम्हेच्चयो अइप्पओऽयं 'ति कहमाणी राणी रोत्तुमाढत्ता।

ण एत्थ मणयमवि चिंता। इमं सव्वओ अणुऊलयिस्सं 'ति मे सच्चा पइण्णा। किं तुम्हकेरो एसो संपइ अम्हकेरो वि, इअ बुवाणेण रयणवालेण सहयरो इव आसिलिट्ठो राउलो अणाउलं। उप्पेहडा[1] निक्खंता तेसिं हत्थि-खंध-गयाणं पुरस्स मज्झं मज्झेणं पवासजत्ता। समुद्दतडपेरंतं रायप्पभिइणो सव्वेवि आगया जामायरं पडिवालित्तए। रण्णा दिण्णा अउल-संपया पोअम्मि णिवेसिआ। राउलेणा वि रूवपरावत्तण-जडिआ-जुअलेण सहिअं आवस्सय-वत्थु-जाय-पूरिअं णवरमेगं पेडगं सह णीअं। रायाईणं कयप्पणामो मणम्मि परमेट्ठिपंचगं सरेंतो राउलसहिओ जिणदत्तपुत्तो बोहित्थम्मि[2] णिविट्ठो। सव्वेसिं सुहमंगल-सद्देहिं सद्धिं सुमुहुत्तम्मि पडिचालिअं पवहणं। अणुलोम-पहंजण-पणुल्लिअं तुरिअ-तुरिअं वच्चमाणं तं णयणाऽगोअरं जायं। रायप्पमुहा

---

१ साडम्बरा। यथा—उप्पेहउं, उड्डामरं, उब्भडं, आडम्बरिल्लं च (पाइ० ६०), २ पोते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युष्माकं पन्थानः सन्तु, इति सहर्षं सरोमोद्गमं सर्वैः कथितम्। राउलोऽपि तत्र आगतः। विगत-सङ्कोचं अन्तरङ्गे भवद्विरहेण विषण्णोऽपि उपरितनभावेन सानन्दं निषण्णः रत्नपालस्य समकक्षम्। श्वश्र्वा सानुशयं कथितम्—"जामातः! अस्ति राउलः अस्माकं पुत्रिकायाः अद्वितीयः सहचरः। रत्नवती इव एष युष्माभिः सुरक्षितव्यः किं बहुकथनेन ? आस्माकः अतिप्रियः अयं इति कथयन्ती राज्ञी रोदितुं आरब्धा।

"न अत्र मनागपि चिन्ता। इमं सर्वतः अनुकूलयिष्यामि इति मे सत्या प्रतिज्ञा। किं युष्मदीयः एषः सम्प्रति अस्मदीयोऽपि", इति ब्रुवता रत्नपालेन सहचरः इव आश्लिष्टः राउलः अनाकुलम्। साडम्बरा निष्क्रान्ता तयोः हस्तिस्कन्धगतयोः पुरस्य मध्यं मध्येन प्रवास-यात्रा। समुद्रतटपर्यन्तं राजप्रभृतयः सर्वेऽपि आगताः जामातरं प्रतिपालयितुम्। राज्ञा दत्ता अतुला सम्पत् पोते निवेशिता। राउलेनाऽपि रूपपरावर्तन-जटिकायुगलेन सहितं आवश्यकवस्तुजात-पूरितं केवलं एकं पेटकं सह नीतम्। राजादिभ्यः कृतप्रणामः मनसि परमेष्ठि-पञ्चकं स्मरन् राउलसहितः जिनदत्तपुत्रो बोहित्थे निविष्टः। सर्वेषां शुभ-मङ्गल-शब्दैः सार्धं सुमुहूर्ते प्रतिचालितं प्रवहणम्। अनुलोम-प्रभञ्जन-प्रेरितं त्वरितं त्वरितं व्रजत् तत् नयनागोचरं जातम्। राजप्रमुखाः सर्वेऽपि परिजनाः सुता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सव्वेवि परिअणा सुआ-विरहवुण्णा वि जहच्छिय-कज्ज-संपाडणेण पसत्तिमणुहवंता णिअं णिअं ठाणं पत्ता ।

इओ पेइअ-पक्ख-विरह-विहुरो हिअयम्मि अउल-वाउल त्तणं वहंतो वि भत्तिगाण-मिसेण बाह-बिंदूइं मुंचंतो कहं कहमवि भावसंगोवणं कुणमाणो, अणेगसूत्ति-पज्ज-गाहाहिं विरह-रस-गहिरिमं च णिदंसेंतो, सव्वेसिं मणाइं गग्गराइं विरअयइ वाहणत्थो राउलो ।

इअ सिरिचंदणमुणि-विरइआए राउल-रूवेण
सहागमण-सखेमं रयणवईवरण-पच्चा-
वलणाइभावेहिं सोहिआए
रयणवालकहाए पंचमो
ऊसासो समत्तो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विरहोद्विग्नाः अपि यथेप्सित-कार्य-सम्पादनेन प्रसत्तिं अनुभवन्तः निजं निजं स्थानं प्राप्ताः।

इतः पैतृकपक्ष-विरह-विधुरः हृदये अतुलं आकुल-व्याकुलत्वं वहन् अपि भक्तिगान-मिषेण वाष्पबिन्दून् मुञ्चन्, कथं कथमपि भावसङ्गोपनं कुर्वन्, अनेक-सूक्ति-पद्य-गाथाभिः विरह-रस-गाम्भीर्यं च निदर्शयन् सर्वेषां मनांसि गद्गदानि विरचयति वाहनस्थो राउलः।

इति श्री चन्दनमुनिविरचितायां राउलरूपेण सहागमन-
सक्षेमं रत्नवतीवरण-प्रत्यावलनादिभावैः
शोभितायां रत्नपालकथायां
पञ्चमः उच्छ्वासः
समाप्तः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

६

छट्ठो ऊसासो

वण्णणाईआ विस्स-वेचित्ती। अविहावणिज्जा भवस्स भावणा। एत्थ किं सुहं, किं दुहं ? किं पिअं, किमप्पिअं ? के णिअया, के पारक्का ? अवाहित्तोवि एगत्तीहवइ मच्छिआ-णिउरंबो जत्थेव दिट्ठि-पहं णिवडिआ गुड-पिंडलइया, तोअ-पडिपुण्णम्मि तडागम्मि सव्व-दिसामुंतो सयमोअरंति सउंता[1]। अव्वो ! सत्थप्पहाणं जगं, ण उण परमत्थप्पहाणं। हरे ! धवलमवि मुणिज्जमाणं किच्चं किंचि अंतरहिलास-कज्जलिअं। धण्णा ते तिचउरा पत्तट्ठा माणवा जगईए जेहिं कीरइ णिक्कामं सेव्वा।

विढविऊण अउलं सामिद्धिं पलोट्टिओ[2] जिणदत्त-सुओ तरंगमालि-तीरम्मि 'त्ति आयण्णिऊण पउरा, णयर-महंतया,

१ सकुन्ताः-पक्षिणः २ प्रत्यागतः 'प्रत्याङा पलोट्टः (हे० ४-१६६)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

६

षष्ठः उच्छ्वासः

वर्णनातीता विश्व-वैचित्री । अविभावनीया भवस्य भावना । अत्र किं सुखं, किं दुःखम् ? किं प्रियं, किमप्रियम् ? के निजकाः, के परकीयाः ? अव्याहूतोऽपि एकत्रीभवति मक्षिका-निकुरम्बो यत्रैव दृष्टिपथं निपतिता गुडपिण्डलिका । तोयप्रतिपूर्णे तडागे सर्वदिग्भ्यः स्वयमवतरन्ति शकुन्ताः । अब्बो ! (आश्चर्ये) स्वार्थ-प्रधानं जगत् न पुनः परमार्थ-प्रधानम् । हरे ! धवलमपि ज्ञायमानं कृत्यं किञ्चित् अन्तरभिलाष-कज्जलितम् । धन्यास्ते त्रिचतुराः प्राप्तार्था मानवाः जगत्यां यैः क्रियते निष्कामं सेवा ।

अर्जयित्वा अतुलां समृद्धिं प्रत्यागतो जिनदत्तसुतस्तरङ्गमालितीरे इति आकर्ण्य प्रचुराः नगरमहत्काः, बन्धवश्च रणरणकं प्राप्ताः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बंधुणो य ऋणरणयं[1] पत्ता। सव्वेवि ते संमिलित्ता वोसट्ट-वयण-कमला वद्धावेउं रयणवालं उवपवहणं अहिपच्चुइआ[2]। जय-विजय-सद्देहिं वद्धावेमाणा गुललिउं[3] पउत्ता—'पुत्त! वारिवाहं पिव चिरं विरमालेमाणा तुमं पइदिणं अम्हेत्थ ट्ठिआ। अइजाओ[4] सुओसि तुमं जिणदत्तस्स। उज्जलं कयं तुमए णामहेअं पिउपायस्स।" अंतरदूमिओवि ववहारट्ठं मम्मणोवि सपरिअरं समागओ। रयणवालेणावि सव्वेवि सम्मुहमागया सुअणा साणंदं पणमिआ। तुम्हाणं आसीसाहिं सव्वं भव्वं जायं। णिविग्घा मयरहर[5]-जत्ता संपण्णा। उत्तारिअं वाहणाओ कसिणमवि भंडं, वत्थुजायं च। आडंबरिल्ला णयरम्मि णिग्गया[6] अस्स पडिणिग्गमण-जत्ता। समेहिं णायरेहिं पेम-पलोअणेहिं संभाविओ सम्माणिओ य राउल-बीओ रयणवालो पुव्वं मम्मण-गिहम्मि आगओ। जायं भोअणाइ-किच्चं। पच्छा णयर-महंतयाणमहिमुहं तल्लिहिआणुसारेण सवुड्ढिअं पेइअं रिणं, तहेव भंड-मुल्लं च जहट्ठिअं समप्पिअं। संपयं ण सेट्ठिस्स ईसिं पि मज्झम्मि गहिअव्वं, दायव्वं वा। एवं भणमाणेण णेण सव्व-समक्खं फाडिअं लिहिअ-पत्तं। गहिअं मम्मण-हत्थाओ अणरिणस्स[7] लिहिअं। मम्मणप्पिअ-पारिओसिअ-पइप्फलं जं विउलं मए लद्धं तं सव्वं मईअमेव, ण सेट्ठिणो किंचि। इण्हि सेट्ठि-गिहम्मि जइ चिट्ठेमि तहावि ण हाणी, मामगं घरमेयं। परंतु झंखइ[8] मह माणसं णिअमालयं विणा। तम्हा

---

१ औत्सुक्यम् २ आगताः 'आडा अहिपच्चुअः (हे० ४-१६२) ३ चाटु-कारितां कर्तुं लग्नाः 'चाटौ गुलः (हे० ४-७३) ४ अतिजातः-पितुरधिक इत्यर्थः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वेऽपि ते सम्मील्य विकसितवदनकमलाः वर्धापयितुं रत्नपालं उपप्रवहणमागताः। जयविजयशब्दैः वर्धापयन्तश्चाटुकारितां कर्तुं प्रवृत्ताः—"पुत्र ! वारिवाहमिव चिरं प्रतीक्षमाणास्त्वां प्रतिदिनं वयमत्र स्थिताः। अतिजातः सुतोऽसि त्वं जिनदत्तस्य। उज्ज्वलं कृतं त्वया नामधेयं पितृपादस्य।" अन्तर्दूनोऽपि व्यवहारार्थं मन्मनोऽपि सपरिक समागतः। रत्नपालेनाऽपि सर्वेऽपि सम्मुखमागताः सुजनाः सानन्दं प्रणमिताः। युष्माकमाशीर्भिः सर्वं भव्यं जातम्। निर्विघ्ना मकरगृह-यात्रा सम्पन्ना। उत्तारितं वाहनात् कृत्स्नमपि भाण्डं वस्तु-जातं च। आडम्बरवती नगरे निर्गता अस्य प्रतिनिर्गमन-यात्रा। समैर्नागरैः प्रेमलोचनैः संभावितः सम्मानितश्च राउल-द्वितीयो रत्नपालः पूर्वं मन्मन-गृहे आगतः। जातं भोजनादिकृत्यम्। पश्चाद् नगरमहत्कानामभिमुखं तल्लिखितानुसारेण सवृद्धिकं पैतृकमृणं तथैव भाण्डमूल्यं च यथास्थितं समर्पितम्। साम्प्रतं न श्रेष्ठिनः ईषदपि मयि ग्रहीतव्यं दातव्यं वा। एवं भणता अनेन सर्व-समक्षं पाटितं लिखित-पत्रम्। गृहीतं मन्मन-हस्ताद् आनृण्यस्य लिखितम्। मन्मना-र्पित-पारितोषिक-प्रतिफलं यद् विपुलं मया लब्धं तत् सर्वं मदोयमेव, न श्रेष्ठिनः किञ्चित्। इदानीं श्रेष्ठि-गृहे यदि तिष्ठामि तथापि न हानिः, मामकं गृहमेतत्। परं संतपति मम मानसं निजमालयं विना। तस्माद्

---

५ मकरगृहयात्रा-समुद्रयात्रा ६ निर्गताः ७ अणरिणस्स-ऋणातीतस्य ८ संतपति, संतपे झंड्खः (हे० ४-१४०)।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिगमिसेमि णिअं घरं एत्ताहे चिअ । एवं साहेऊण उट्ठिओ रयणवालो मम्मणं सविणयं पणमिऊण कयंजली वोत्तुमाढत्तो- "सेट्ठिप्पवर ! इच्छेमि तुब्भेहिं अब्भणुणाओ णिअं भवणं वच्चेउं । सोलस-वास-पेरंतं अहमेत्थ वुड्ढिं पत्तो, पुत्तव्व लालिओ, सिक्खिओ य पएसे पट्ठविओ । संभरिस्समहं अणुत्तरमुव्वयारं भवयाणं । आवडिए कम्मिवि कज्जम्मि उवट्ठिओ होस्सं अणालसमेत्थ । संपइ जणय-भवणं गंतुं समुच्छुकं मं अणुजाणंतु किवाए सेट्ठिवरा ।"

निरट्ठया परवत्थुणो लालस 'त्ति विउरेण अंतर-दूमिएणावि ववहार-कुसलेण "साणंदं वच्चसु वच्छ ! णिअं भयणं, वड्ढमाण[1]-विच्छड्डेण वड्ढिओ होहि पुण" इअ बुवंतेण मम्मणेण रयणवालो गंतुमणुजाणिओ ।

सोलस-वासाणंतरं बंधुजणेहिं परिवारिओ मंगल-सद्देहिं माघहेहिं च वद्धाविओ हम्मियाहिंतो पत्तो पुत्तो । लद्ध-वद्धावणिआ[2] कोआसमुही[3] सयज्झा तक्कालं तत्थ समागया । समप्पिआ बद्ध-मंदिर-तालगस्स तालिआ । उग्घाडिअं कवाड-जुअलं । कत्थ कत्थ पिइपायस्स आसिआ सायिआ आसि 'त्ति परिजणेहिं पवेइआ । तरुणा जाया तेसिं तक्खणं सई । रोत्तुं पउत्तो बालव्व रयणवालो । हद्धी ! कहिं कट्ठमणुहवंति ते मज्झकारणा । किं मे विउलाए इमीए सिरिआए जाव ण जायइ अम्मापिऊणं दंसणं ?

"सत्थो होहि सुपुत्त ! लहुं संभविज्जइ तेसिं सम्मेलणं । कारावेइस्सामो ताणं अणुसंधाणं । विहिणोऽणुऊलयाए लद्धा

---

१ वर्धमानवैभवेन २ लब्धवर्धापनिका 'वधावणी' इतिभाषा ३ विकस्वरमुखी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिगमिषामि निजं गृहमिदानीमेव। एवं कथयित्वा उत्थितो रत्नपालो मन्मनं सविनयं प्रणम्य कृताञ्जलिर्वक्तुमारब्धः—"श्रेष्ठिप्रवर ! इच्छामि युष्माभिरभ्यनुज्ञातो निजं भवनं व्रजितुम्। षोडशवर्षपर्यन्त-महमत्र वृद्धि प्राप्तः, पुत्रवत् लालितः, शिक्षितश्च प्रवासे प्रस्थापितः। स्मरिष्याम्यहं अनुत्तरमुपकारं भवताम्। आपतिते कस्मिन्नपि कार्ये उपस्थितो भविष्यामि अनालसमत्र। सम्प्रति जनक-भवनं गन्तुं समुत्सुकं मां अनुजानन्तु कृपया श्रेष्ठिवराः।"

'निरर्थका परवस्तुनो लालसा' इति विदुरेण अन्तर्दूनेनाऽपि व्यवहार-कुशलेन—"सानन्दं व्रज वत्स ! निजं भवनम्, वर्धमान-विच्छड्डेन (वर्धमान-वैभवेन) वर्धितो भव पुनः" इति ब्रुवता मन्मनेन रत्नपालो गन्तुमनुज्ञातः।

षोडश-वर्षानन्तरं बन्धुजनैः परिवारितो मङ्गलशब्दैः मागधैश्च वर्धापितो हर्म्याभिमुखं प्राप्तः पुत्रः। लब्ध-वर्धापनिका विकसित-मुखी सयज्भा (प्रातिवेश्मिकी) तत्कालं तत्र समागता। समर्पिता बद्धमन्दिरतालकस्य तालिका। उद्घाटितं कपाटयुगलम्। कुत्र-कुत्र पितृपादस्य आसिका शायिका आसीदिति परिजनैः प्रवेदिता। तरुणा जाता तेषां तत्क्षणं स्मृतिः। रोदितुं प्रवृत्तो बालवद् रत्नपालः। हद्धी ! (निर्वेदे) कुत्र कष्टमनुभवन्ति ते मत्कारणात् ? किं मे विपुलया अनया श्रिया यावत् न जायते मातृपित्रोः दर्शनम् ?

स्वस्थो भव सुपुत्र ! लघु संभाव्यते तेषां सम्मेलनम्, कारापयि-ष्यामस्तेषामनुसन्धानम्। विधेरनुकूलतया लब्धा भविष्यति तेषां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हविस्सइ तेसिं पउत्ती। संपइ तुमं पुव्वं एत्थ-गयं विसंठुलं कज्जं सुट्ठियं कुणसु, जहा तुह पिअयरस्स णामं समुज्जलं होइ 'त्ति सूइअं बंधुवग्गेण। पडिस्सुअं तं कहणं रयणेण। जायं सव्व-बंधुजणेहिं सहयरेहिं य सद्धिं पीइ-भोअणं। अणेगे जिणदत्त-संतिआ भिच्चा, कम्मगरा, आवणप्पमुहा, सहिणो[1] संभूअ समागया। णिअं-णिअं पच्चहिजाणं करावेउं पउत्ता—"सेट्ठिकुमर ! णट्ठे महापायवे कुलाय-संठिआणं सउण-पोआणं जारिसी गई तारिसी जिणदत्त-सेट्ठि-सरण-विहूणाणं अम्हकेरा ठिई वट्टए। संपइ आसासिमो[2] तुमं पियव्व अम्ह सरणदाया होहिसि 'त्ति। रयणवालेणावि सव्वेसिं पत्थणा सुणिआ, मुणिआ, जहारिह-कज्ज-समप्पणेण ते संतोसिआ, पोसिआ य। केइ परिणयवया मए किं पुव्वं करणिज्जं 'ति पुच्छिआ। तक्कहणमणुवट्टमाणेण सम्माणिआ य।

एत्थंतरम्मि णयर-प्पमुहेहिं सद्धिं रयणवालेण पाहुडीकओ णरवई, विण्णत्तो पुण—"णरदेव ! जेसिं केसिं वि मणुआणं अत्थि जिणदत्त-सेट्ठिम्मि अवसिट्ठं अणं (ऋणं) ते सव्वेवि ममाहिंतो सवुड्ढिअं णिअं-णिअं धणं सत्तरं गिण्हेंतु, तहेव जे अहमण्णा सेट्ठिणो ते सव्वेवि सत्तरं पच्चप्पिणंतु मे जहारिहं धणं।"

रण्णा तयाणिमेव "दायगा गिण्हेंतु गाहगा य पच्चप्पिणंतु, जिणदत्तसेट्ठि-संबंधिअं दविणं 'ति" उग्घोसणा कारिआ णयरम्मि।

---

१ सखायः २ आशास्महे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रवृत्तिः। सम्प्रति त्वं पूर्वं अत्रगतं विसंस्थुलं कार्यं सुस्थितं कुरु, यथा तव पितुर्नाम समुज्ज्वलं भवतीति सूचितं बन्धुवर्गेण। प्रतिश्रुतं तत्कथनं रत्नेन। जातं सर्वबन्धुजनैः सहचरैश्च सार्धं प्रीतिभोजनम्। अनेके जिनदत्तसत्का भृत्याः कर्मकराः आपण-प्रमुखाः सखायः संभूय समागताः। निजं निजं प्रत्यभिज्ञानं कारयितुं प्रवृत्ताः—"श्रेष्ठिकुमार! नष्टे महापादपे कुलाय-संस्थितानां शकुन-पोतानां यादृशी गतिस्तादृशी जिनदत्त-श्रेष्ठिशरण-विहीनानां अस्मदीया स्थितिर्वर्तते। सम्प्रति आशास्महे त्वं पितृवद् अस्माकं शरणदाता भविष्यसीति रत्नपालेनाऽपि सर्वेषां प्रार्थना श्रुता, ज्ञाता, यथार्हकार्य-समर्पणेन ते सन्तोषिता, पोषिताश्च। केऽपि परिणत-वयसो 'मया किं पूर्वं करणीयम्' इति पृष्टाः तत्कथनमनुवर्तमानेन सम्मानिताश्च।

अत्रान्तरे नगरप्रमुखैः सार्धं रत्नपालेन प्राभृतीकृतो नरपतिः विज्ञप्तः पुनः—"नरदेव! येषां केषामपि मनुजानां अस्ति जिनदत्त-श्रेष्ठिनि अवशिष्टमृणं ते सर्वेऽपि मत्तः सवृद्धिकं निजं निजं धनं सत्वरं गृह्णन्तु, तथैव ये अधमर्णाः श्रेष्ठिनस्ते सर्वेऽपि सत्वरं प्रत्यर्पयन्तु मह्यं यथार्हं धनम्।"

राज्ञा तदानीमेव—"दायका गृह्णन्तु, ग्राहकाश्च प्रत्यर्पयन्तु जिनदत्तश्रेष्ठिसम्बन्धिकं द्रविणमिति" उद्घोषणा कारिता नगरे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तक्खणं जाया जहोइआ ववत्था। दायगेहिं जहारिहं गहिअं, गाहगेहिं च दिण्णं। सव्वाणि पर-हत्थ-गयाणि खेत्त-वत्थु-विवणि-पासायाईणि अप्प-वसाणि संजायाणि। णयरीए अस्स कित्ति-कोमुई पत्थरिआ। अहो! बालोवि रयणवालो केरिसो बुद्धिमंतो अत्थि? जेण सव्वमवि अववट्ठिअं कज्जं सुट्ठिअं कयं। राउलेणावि सव्वा तत्थगया ठिई सम्मं मुणिआ। अग्गे किं करणिज्जं 'ति अणुवेलं चिंतेइ सो। परंतु रयणेण राउल-रूवंतरिआ रयणवइ 'त्ति ण संकिअं कयावि, केवलं बालजोई णूणमेस 'त्ति णिस्संकं णायमिमेण। सव्व-सुह-समप्पिओ वि रयणवालो ण खणमवि रइं लब्भइ पिअर-विरह-दुव्वलो। कहं तेसिं अणुसंधाणं कायव्वं! कहिं ते पउसिआ पुत्त-विरह-विणडिआ उयासीणा संता जीवणं जवेंति? कहमेगागी अहं गच्छेमि पवासं? मं विणा कहमेगगो राउलो अणुवलक्खिअ-प्पएसम्मि चिट्ठिहिइ!

अतक्किओ आगओ तत्थ एगो अट्ठंग-णिमित्त-विण्णू जोइसिओ। पुच्छिओ एसो सविणयं रयणेण। विउसवर[२]! कहमहं पच्चलो होमि[३] पिअर-पायस्स पउत्तिं णाउं। काए दिसीए तेसिं णिवासो 'त्ति कहं पच्चेयं मए? किवाए णाण-बलेण ककुहा-सूअरं कायव्वं, जहाहं तेसिमणुसंधाणे सफलो हवेज्जा। गणएण झत्ति गणिअं फलिअं च पेक्खमाणेण उप्पिजल[४]-चेअणो रयणवालो उप्पालिओ–"दाहिण-दिसि-भाए कुसलिणो ते जणणी-जणया णिस्संदेहं। छमास-ब्भंतरम्मि सुलहं तेसिं दरिसणं। कुमार! वईआ आवइ-दिअहा संपइ सव्वं सुहं सुहं 'ति निच्छिअं मे वयणं। एवं साहेमाणो दाणेण तोसिओ गओ सो णिअं ठाणं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्क्षणं जाता यथोचिता व्यवस्था। दायकैर्यथार्हं गृहीतं ग्राह्-कैश्च दत्तं। सर्वाणि परहस्तगतानि क्षेत्र-वस्तु-विपणि-प्रासादादीनि आत्मवशानि संजातानि। नगर्यामस्य कीर्ति-कौमुदी प्रस्तृता। अहो! बालोऽपि रत्नपालःकीदृशो बुद्धिमानस्ति येन सर्वमपि अव्यवस्थितं कार्यं सुस्थितं कृतम्। राउलेनाऽपि सर्वा तत्रगता स्थितिः सम्यग् ज्ञाता। अग्रे किं करणीयमिति अनुवेलं चिन्तयति सः। परन्तु रत्नेन राउल-रूपान्तरिता रत्नवतीति न शङ्कितं कदापि, केवलं बालयोगी नूनमेष[1] इति निःशङ्कं ज्ञातमनेन। सर्वसुखसमर्पितोऽपि रत्नपालो न क्षणमपि रतिं लभते पितृविरह-दुर्बलः। कथं तेषामनुसंधानं कर्त्तव्यम्? कुत्र ते प्रोषिताः पुत्रविरह-विनटिताः उदासीनाः सन्तो जीवनं यापयन्ति। कथमेकाकी अहं गच्छामि प्रवासम्? मां विना कथमेकाकी राउलोऽ-नुपलक्षित-प्रदेशे स्थास्यति।

अतर्कितः आगतस्तत्र एकोऽष्टाङ्गनिमित्तविज्ञो ज्यौतिषिकः। पृष्टः एष सविनयं रत्नेन—"विद्वद्वर! कथमहं प्रत्यलो[2] भवामि पितृपादस्य प्रवृत्तिं ज्ञातुम्? कस्यां दिशि तेषां निवासः इति कथं प्रत्येयं मया? कृपया ज्ञानबलेन ककुप्-सूचनं कर्त्तव्यम्, यथाऽहं तेषामनुसंधाने सफलो भवेयम्।" गणकेन झटिति गणितं, फलितं च प्रेक्षमाणेन उत्पिञ्जलचेतनो[3] रत्नपालः कथितः—"दक्षिणदिग्भागे कुशलिनस्ते जननीजनका निस्संदेहम्। षण्मासाभ्यन्तरे सुलभं तेषां दर्शनम्। कुमार! व्यतीता आपद्-दिवसाः सम्प्रति सर्वं सुखं सुख-मिति निश्चितं मे वचनम्। एवं कथयन् दानेन तोषितो गतः स निजं स्थानम्।

---

१ निरन्तरम् २ विद्वद्वर! ३ समर्थः ४ उत्पिञ्जलचेतनः व्याकुलचेताः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवसरं पप्प रयणवालेण सूइओ राउलो सखेअं– "जोइप्पवर ! णाहमिच्छेमि तुमं विरहिऊण कत्थइ गंतुमेगागी, परंतु अत्थि एआरिसी समय-मग्गणा जहा मए अवस्सगंतव्वं पिअराणमणुसंधाण-णिमित्तं। तुमए एत्थ ठिच्चा गिह-पच्चुवेक्खणा कायव्वा। सयराहमेव पिअराणं मग्गणं काऊण, ते[1] एत्थ णेऊण पच्छा तुमए सद्धिं गमिस्समहं रयणवइं णेउं ससुर-गेहं। इयाणिं तु समय-पडिवालणा करणिज्जा चिअ।"

ईसि-हसिअ-दंसिअ-धवलदंतपंतिणा राउलेण वाहरिअं– "ण एत्थ कोइ खेअस्स बिसओ। अत्थि किमुक्किट्ठं जणणी-जणयाइरित्तं। तेसिं सेवा खु देव-सेवा। तेसिं दंसणं खु देव-दंसणं। तेसिं आणा किर देव-आणा। किं तेण किमि-कोडिं गएण कुलिंगालेण जाएण, जो ण हवइ पिअराण सुहहेऊ। परंतु ण एयं कज्जं तएजारिसाणं[2] गिहत्थाणं। अत्थि मएजारिसाणं तु वाम-हत्थ-लीला अणुसंधाण-कज्जं। सोमाल-सेहर ! ण अणुऊलो गिहत्थाण हेमंत-उऊ। जाला पवहइ अइ सीअलो जगं कंपावेमाणो जडो उईणो[3] पवणो, ताला को सुहिओ गिहत्थो गिहाओ णीहरइ ? पहिरिअ-णाणुण्णिअ-वासो[4] आरोग्गिअ–विसिट्ठसत्ति-दायगोसह-मीसिअ-मिट्ठण्णो दारा-पुत्त-परिवारिओ उवानलं ट्ठिओ वासराइं गमेइ, तत्थ णिप्पिहो झडिलो समणो तावसो गलिअ-चीवरो दिअंबरो वा साणंदं रुक्ख-

---

१ ताइ २ त्वादृशानाम् ३ उदीचीनः ४ परिहितनानौणिकवासाः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवसरं प्राप्य रत्नपालेन सूचितो राउलः सखेदं—"योगिप्रवर ! नाहमिच्छामि त्वां विरहय्य कुत्रापि गन्तुमेकाकी, परन्तु अस्ति एतादृशी समय-मार्गणा यथा मया अवश्यं गन्तव्यं पित्रोरनुसन्धान-निमित्तम्। त्वया अत्र स्थित्वा गृहप्रत्युपेक्षणा कर्त्तव्या। शीघ्रमेव पित्रोः मार्गणां कृत्वा तौ अत्र नीत्वा पश्चात् त्वया सार्धं गमयिष्याम्यहं रत्नवतीं नेतुं श्वसुर-गृहम्। इदानीं तु समय-प्रतिपालना करणीयैव।"

ईषद्-हसित-दर्शित-धवल-दन्त-पङ्क्तिना राउलेन व्याहृतं नात्र कोऽपि खेदस्य विषयः। अस्ति किमुत्कृष्टं जननी-जनकाति-रिक्तम् ? तेषां सेवा खलु देव-सेवा, तेषां दर्शनं खलु देव दर्शनम्; तेषां आज्ञा किल देवाज्ञा। किं तेन कृमिकोटिगतेन कुलाङ्गारेण जातेन यो न भवति पितृणां सुखहेतुः, परन्तु नैतत् कार्यं त्वादृशानां गृहस्थानाम्। अस्ति मादृशानां तु वामहस्त-लीला अनुसन्धानकार्यम्। सुकुमार-शेखर ! नानुकूलो गृहस्थानां हेमन्तर्तुः। यस्मिन् प्रवहति अतिशीतलो जगत् कम्पायमानो जडः उदीचीनः पवनस्तस्मिन् कः सुखितो गृहस्थो गृहान्निस्सरति ? परिहित-नानौणिक-वासाः भुक्त-विशिष्ट-शक्तिदायकौषध-मिश्रित-मिष्टान्नः दारा-पुत्र-परिवारितः उपानलं स्थितो वासराणि गमयति, तत्र निःस्पृहो जटिलः श्रमणस्ता-पसो गलितचीवरो दिगम्बरो वा सानन्दं वृक्षमूले स्थितो ध्यानं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलम्मि ठिओ झाणं झायइ, परमिट्ठिं सुमिरइ, छुहं अहिआसेइ, सुहं सुहेण सीअकालं च जवेइ। तहेव उण्हालो वि ण भोईण-मणुलोमो। जाहे पतवइ अइ तिग्ग-रस्सीहिं अंसूमाली। वण्हि-सरिच्छा हवइ धरणो। सव्वंपि वायावरणं तातप्पावेमाणो पवहइ असहणिज्जो मारुओ। वारं वारं परिफुसिअं[1] पि ण सुक्कत्तणमुवेइ सेअ-जलं। सुपीअंपि उदयं ण कयाइ पीअं पिव अणुहवंति तण्हालुआइं ओट्ठ-तालुकंठ-विवराइं। ताहे पत्त-समग्ग-भोग-सामग्गीओ णाणाविहं सीअ-पेज्जं पिबेंतो वायाणुकूलिअ-गिहम्मि अल्लीणो सुकई को हम्मिअं चएउं चयइ ? तत्थवि मुणी जत्थ कत्थइ ठिओ, जं किमवि सीउण्हं भुंजेंतो, उसिणं जलं पिबेंतो, तत्तभूमीअले वि अणत्थुअं सुवेंतो, परममुइओ लक्खिज्जइ। केण अणुहविज्जइ गिम्ह-काल-तत्ती जो अणुवेलं सरेइ परमं पयं। जस्स सव्वंपि बाहिरं वत्थुजायं बाहिरं तस्स का सुहस्स दुहस्स वा कप्पणा ? अहो विचित्तो मुणीणमद्धाणो। तहेव पाउस-समयो वि ण जेट्ठासमीहिं सुसहो, जया वासेंति पयोवाहा जया-तया। हवंति पच्छण-रविबिंबाणि दुद्दिणाणि। हिअयं कंपिअं कुणेमाणी विज्जोअइ विज्जू। गडगडायमाणो कण्ण-मूलं भिंदेइ पुण थणिअ-सद्दो। पिच्छिला हवंति वत्तणीओ। सवेआओ वहंति णिण्णआओ। अब्भंतरिओ वि अक्को अईव अंतरंग-गिम्हिमं अणुहवावेइ जाउ, तम्मि को सुही जुवइजण-विरहिओ चिट्ठिउं खमो ? विहि-परतंतो पउत्थो वि कोइ गिहं संभरेइ रत्तिंदिअहं। उक्किट्ठमंतब्वेअणं माणेइ काइ

---

१ परिप्रोञ्छितम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ध्यायति, परमेष्ठिनं स्मरति, क्षुधमध्यास्ते, सुखं सुखेन शीतकालं च यापयति। तथैव उष्णकालोऽपि न भोगिनामनुलोमः। यस्मिन् प्रतपति अति तिग्मरश्मिभिः अंशुमाली। वह्नि-सदृशो भवति धरणी। सर्वमपि वातावरणं तातपयमानः प्रवहति असहनीयो मारुतः। वारं वारं परिप्रोच्छितमपि न शुष्कत्वमुपैति स्वेदजलम्। सुपीतमपि उदकं न कदापि पीतमिवानुभवति तृष्णालुकानि ओष्ठ-तालु-कण्ठ-विवराणि। तस्मिन् प्राप्त-समग्र-भोग-सामग्रीको नानाविधं शीत-पेयं पिबन् वातानुकूलित-गृहे आलीनः सुकृती को हर्म्यं त्यक्तुं शक्नोति ? तत्रापि मुनिर्यत्रकुत्रापि स्थितः, यत् किमपि शीतोष्णं भुञ्जानः, उष्णं जलं पिबन्, तप्त-भूमितलेऽपि अनास्तृतं स्वपन्, परम-मुदितो लक्ष्यते। केनानुभूयते ग्रीष्मकाल-तप्तिर्योऽनुवेलं स्मरति परमं पदम्। यस्य सर्वमपि बाह्यं वस्तुजातं बाह्यम्, तस्य का सुखस्य दुःखस्य वा कल्पना ? अहो ! विचित्रो मुनीनामध्वा। तथैव प्रावृट्-समयोऽपि न ज्येष्ठाश्रमीभिः सुसहः। यदा वर्षन्ति पयोवाहा, यदा-तदा भवन्ति प्रच्छन्न-रवि-बिम्बाणि दुर्दिनानि। हृदयं कम्पितं कुर्वती विद्योतते विद्युत्। गडगडायमानः कर्णमूलं भिनत्ति पुनः स्तनित-शब्दः। पिच्छिलाः भवन्ति वर्तन्यः। सवेगा वहन्ति निम्नगाः। अभ्रान्त-रितोऽप्यर्कोऽतीवान्तरङ्ग-ग्रीष्मतामनुभावयति जातु, तस्मिन् कः सुखी युवतिजन-विरहितः स्थातुं क्षमः ? विधि-परतन्त्रः पउत्थोऽपि (प्रोषितोऽपि) कोऽपि गृहं स्मरति रात्रिदिवम्। उत्कृष्टामन्तर्वेदनां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पवसिअ-भत्तिआ 'पिउ पिउ 'त्ति' बप्पीह-सद्देण पिम्रं संसरेमाणी माणिणी। तहि पाउसम्मि वि पच्चक्खाय-पाणभोअणा गिरिकंदरासु समल्लीणा ववगय-सव्व-सरीर-माणस-चिंता अक्खय-बंभचेर-परिवड्ढिअ-लेस्सा झाण-कोट्ठोवगया अलक्खिअं तक्कणा-रहिअं सुहं बेलमइवाहयंति, अओ संति सव्वेवि उउणो[1] मुणीणं दाहिणावट्टा। तो मए किर गंतव्वं पिअराण ढुंढुल्लणट्ठं। ण तुम्हारिसाणं तत्थावयासो। 'संपइ चिअ वच्चेमि किं गहिअव्वं मए' एवं भणेंतो राउलो केवलं हत्थ-गहिअ-वोणो तओ समुट्ठिओ। 'अजुत्तमिणं अजुत्तमिणं 'ति बोल्लमाणेण रयणेण सहसत्ति णिअंतिओ राउलस्स करपल्लवो, साहिअं च–"जोइंद! किमसामइयं गमणमाढत्तं? चिंतणिज्जं किंचि। पढमं–जणणी-जणगाणं कएणं पुत्तस्स चिअ पएसगमणं णीइ-संगअं। बीइज्जअं–अतिहिरूवेण समागओसि एत्थ दूर-देसंतराओ तुमं, सेवारिहस्स तस्स णिअ-कज्जट्ठं संपेसणं अणुइयं। तइयं–विरत्तेहिं गिहि-कम्मस्स कारावणं ण सोहापयं। एत्तो सविणयं पत्थणं मईयं, जं इह च्चिअ ठिच्चा तुमए जोग-साहणा कायव्वा। ण अस्सि विसयम्मि भागिल्लेण भव्वं।"

णिअं गमणं समुइअं 'ति पायडंतेण राउलेण सगज्जं वज्जरिअं–"सेट्ठि-पुत्त! णत्थि अमुणिआ णीई राउल-जोइणा। वसुहेव कुडुंबं 'ति भावमाणाणं मुणीणं कत्थ णिअ-परतक्कणा? तुम्हकेरा जणणीजणया किं ण

---

१ ऋतवः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मानयति (अनुभवति) कापि प्रोषितभर्तृका 'पिउपिउ' इति बप्पीहशब्देन प्रियं संस्मरन्ती मानिनी। तस्मिन् प्रावृषि अपि प्रत्याख्यातपानभोजनाः गिरिकन्दरासु समालीनाः व्यपगत-सर्वशरीर-मानस-चिन्ता अक्षत-ब्रह्मचर्य-परिवर्धित-लेश्याः ध्यान-कोष्ठोपगताः अलक्षितां तर्कणारहितां मुखं वेलामतिवाहयन्ति, अतः सन्ति सर्वेऽपि ऋतवो मुनीनां दक्षिणावर्ताः। तस्माद् मया किल गन्तव्यं पित्रोः गवेषणार्थम् ! न युष्मादृशां तत्रावकाशः। 'सम्प्रत्येव व्रजामि किं ग्रहीतव्यं मया' एवं भणन् राउलः केवलं हस्तगृहीत-वीणस्ततः समुत्थितः। अयुक्तमिदं अयुक्तमिदमिति कथयता रत्नेन झटिति नियन्त्रितो राउलस्य करपल्लवः, कथितं च—"योगीन्द्र ! किमसामयिकगमनमारब्धम् ? चिन्तनीयं किञ्चित् ! प्रथमम् – जननीजनकानां कृते पुत्रस्यैव प्रदेशगमनं नीति-संगतम्। द्वितीयम्—अतिथिरूपेण समागतोऽसि अत्र दूरदेशान्तरात् त्वम्, सेवार्हस्य तस्य निजकार्यार्थं सम्प्रेषणमनुचितम्। तृतीयम्– विरक्तैः गृहि-कर्मणः कारापणं न शोभास्पदम्। एतस्मात् सविनयं प्रार्थनं मदीयं यदिहैव स्थित्वा त्वया योगसाधना कर्त्तव्या। नाऽस्मिन् विषये भागवता भाव्यम्"।

निजं गमनं समुचितमिति प्रकटयता राउलेन सगर्जं कथितम्—"श्रेष्ठिपुत्र ! नास्ति अज्ञाता नीतिः राउल-योगिना। वसुधैव कुटुम्बमिति भावयतां मुनीनां कुत्र निज-पर-तर्कणा ? युष्मदीया जननी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अम्हेच्चया ? 'ण तिही काइ जस्स विज्जइ 'त्ति अतिही' णिरुत्तीए पायडमिणमो, ता सो ण अब्भागओ। सेवा किर जेसिं जीवण-वयं स किं पर-सेवणमहिलसेइ ? परोवयार-करणम्मि ण गिहत्थ-संथव-दोस-दुट्ठत्तमुवेंति सुसोला तवोहणा। किणो तुमं निरट्ठअं आग्गहं कुणेसि ? सहयर ! सुण, ण जइ हं आणेउं सक्केज्जा भाणुमई-जुत्तं जिणदत्तं छम्मासमज्झयारम्मि इह, तो पविसस्समहमगणिकुंडम्मि 'त्ति पडिण्णाय वीअभयो एगल्लो चलिउं पयट्टो राउलो तक्खणं। अलद्ध-तग्गमण-णिरोह-मग्गो अच्चतं वुण्णो वि रयणवालो कहंकहमवि पडिवेसणट्ठं[1] संमओ जाओ। चलिओ सो तेण सद्धिं पुर-परिसर-पेरंतं सिक्खा-रूवेण किमवि साहेंतो। जहा—"सावहाणेण वट्टिअव्वं देसंतरम्मि राउल ! पर-पयारण-तप्परा अणेगे धुत्त-सेहरा पइपयं वंचयंति अणवहिअ-माणवे। जाव ण तुमं पच्चावलिहिसि ताव ण मे मणो कत्थइ समल्लिस्सइ। पइदिणं तुह पहं पेच्छं, तम्हा तुरिअ-तुरिअं पच्चावलणस्स चिट्ठा कायव्वा" 'आम' 'तहत्ति' भणेंतो पिअ-विरहेण अंतायल्लयं[2] अणु-हवंतो वि उवरिं जोगिजुग्गं णीममत्तणं दक्खवेंतो अग्गओ सरिओ। एवं बहुदूरपहं आगया ते दोण्णि वि। विरह-वेअण-रुद्धकंठेण अंतम्मि रुयंतेण रयणेण धणिअमुवगूहिओ राउलो। विरह-संतत्थ-णयणेहिं पीइज्जमाणो चित्त-लिहिएण इव तत्थ-ट्ठिएण पहम्मि तुरिअ-पायपायं वड्ढमाणो दिट्ठो सो खणंतरम्मि रुक्खांतरिओ अदिट्ठो संवुत्तो।

---

१ प्रति प्रेषणार्थम् २ आयल्लया० स्त्री० (दे०) बेचैनी। अन्तायल्लयं-अन्तर्पीडा।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जनकाः किं नास्मदीयाः ? 'न तिथिः कापि यस्य विद्यते इति अतिथिः' निरुक्त्या प्रकटमिदम्। तस्मात् स न अभ्यागतः। सेवा किल येषां जीवन-व्रतं स किं परसेवनमभिलषते ? परोपकारकरणे न गृहस्थ-संस्तव-दोषदुष्टत्वमुपयन्ति सुशीलास्तपोधनाः। किणो (प्रश्ने) त्वं निरर्थकमाग्रहं करोषि ? सहचर ! शृणु, 'न यदि अहं आनेतुं शक्नुयां भानुमतीयुक्तं जिनदत्तं षण्मासमध्ये इह, तदा प्रविशाम्यहमग्नि-कुण्डे' इति प्रतिज्ञाय वीतभयः एकाकी चलितुं प्रवृत्तो राउल-स्तत्क्षणम्। अलब्ध-तद्गमन-निरोध-मार्गः अत्यन्तं खिन्नोऽपि रत्नपालः कथं कथमपि प्रतिप्रेषणार्थं सम्मतो जातः। चलितः स तेन सार्धं पुर-परिसर-पर्यन्तं शिक्षारूपेण किमपि कथयन्। यथा— "सावधानेन वर्तितव्यं देशान्तरे राउल ! पर-प्रतारण-तत्परा अनेके धूर्त-शेखराः प्रतिपदं वञ्चयन्ति अनवहित-मानवान्। यावन्न त्वं प्रत्यावलिष्यसे तावन्न मे मनः कुत्रापि समालेष्यते। प्रतिदिनं तव पथं प्रेक्षिष्ये, तस्मात् त्वरित-त्वरितं प्रत्यावलनस्य चेष्टा कर्त्तव्या। 'आम्' 'तथेति' इति भणन् प्रिय-विरहेण अन्तायल्लयं (अन्तःपीडां) अनुभवन्नपि उपरि योगि-योग्यं निर्ममत्वं दर्शयन् अग्रतः सृतः। एवं बहुदूर-पथं आगतौ तौ द्वावपि। विरहवेदन-रुद्धकण्ठेन अन्ते रुदता रत्नेन धणियं (गाढं) उपगूढः राउलः। विरह-संत्रस्त-नयनाभ्यां पीयमानः चित्रलिखितेनेव तत्रस्थितेन पथि त्वरित-पाद-पातं वर्धमानो दृष्टः सः। क्षणान्तरे वृक्षान्तरितः अदृष्टः संवृत्तः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुमिणेवि अकप्पिअं किमेअं जायं ? हंत ! बालस्सवि अस्स केरिसं लोगुत्तमं सोअण्णं ? केरिसो अब्भुआ णिब्भयया ? केरिसं बुद्धिचावल्लं ? केरिसी परोवयार-णिट्ठा ? अहो अणण्णो उच्छाहो ! अणेलिसो माहप्पो। महुरो सहावो। णिच्चं हसिअं वयणारविंदं। अव्वो ! कस्स इमिआ पसूई। मणे महाकुलीणोऽमू बालमुणी। धी ! धी ! मं, एआरिसो सुहोइओ सोमाल-सरीरो मज्झ कारणं पइगामं भमिस्सइ, जहापत्तं भुंजिस्सइ, जहिं कहिं वीसंतो ट्ठाणं गहिस्सइ, अत्तण्णेसणवयो[1] तम्मणो, तल्लेसो, तप्परो य अणेगाइं कट्ठाइं खमिस्सइ। अण्णाणीहिं अवहीरिओ वि समभाव-भाविओ होहिस्सइ पुण। एवं बहु विगप्पेमाणो सोएमाणो गुम्मइअ[2]-हिअयो य रयणवालो गिहमागओ। पडिकज्जं, पडिभोअणं, पडिपलं च राउलं सरंतो एक्कमेक्कं दिणं अंगुलिपव्वेसु गणेंतो जहाकहं कालक्खेवं करेइ।

इओ पहम्मि सत्तरगईए उवसप्पंतो जे केइ मज्झेमग्गं गामा णयराइं खेड-कव्वडाइं आगच्छेज्जा, तत्थ सुहमेक्ख-णिआए[3] अण्णेसणं कुणमाणो पुच्छेइ, तक्केइ, णाम-कित्तणं करेइ, संकेअं च जणावेइ। अणमिलिअम्मि संकेए अग्गओ वच्चइ। अणलसो सो ण कहिंवि समयं मुहा गमेइ, वीसमेइ, णिच्चिंतं च सुवइ। एगंतमणुवलक्खिएसु गामणयराईसु वि वीणा-णाएण कण्णामय-महुर-वेरग्गमय-गीअ-गाणेण जण-समूहं आकड्ढइ। बालावत्थं अब्भुअ-रूवसंपयं तं विलोएऊण

---

१ अत्तान्वेषणव्रतः-गृहीतान्वेषणव्रत इत्यर्थः २ गुम्मइय-हृदयः-संमूढहृदयः। यथा—गुम्मइअं संमूढं (पाइय० ५८०) ३ सूक्ष्मेक्षणिकया।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वप्नेऽपि अकल्पितं किमेतत् जातम् । हन्त ! बालस्याप्यस्य कीदृशं लोकोत्तमं सौजन्यम् ? कीदृशी अद्भुता निर्भयता ? कीदृशं बुद्धिचापल्यम् ? कीदृशी परोपकार-निष्ठा ? अहो ! अनन्यः उत्साहः ! अनीदृशं महात्म्यम् ! मधुरः स्वभावः ! नित्यं हसितं च वदनारविन्दम् । अहो ! कस्य इमा प्रसूतिः ? मन्ये महाकुलीनोऽसौ बालमुनिः । धिग् ! धिग् ! माम्, एतादृशः सुखोचितः सुकुमार-शरीरो मम कारणं प्रतिग्रामं भ्रमिष्यति, यथा प्राप्तं भोक्ष्यते, यत्र कुत्र विश्राम्यन् स्थानं ग्रहीष्यति, आत्तान्वेषणव्रतः तन्मनाः तल्लेश्यः तत्परश्च अनेकानि कष्टानि क्षमिष्यते । अज्ञानिभिरवधीरितोऽपि समभावभावितो भविष्यति पुनः । एवं बहुविकल्पयन् शोचयन् गुम्मइयहृदयः (संमूढहृदयः) च रत्नपालो गृहमागतः । प्रतिकार्यं, प्रतिभोजनं, प्रतिपलं च राउलं स्मरन् एकैकं दिनं अंगुलि-पर्वसु गणयन् यथा कथंचित् कालक्षेपं करोति ।

इतः पथि सत्वरगत्या उपसर्पन् ये केऽपि मध्येमार्गं ग्रामाः नगराणि खेट-कर्वटानि आगच्छेयुः, तत्र सूक्ष्मेक्षणिकया अन्वेषणां कुर्वन् पृच्छति, तर्कयति, नामकीर्तनं करोति, संकेतं च ज्ञापयति ! अमीलिते संकेते अग्रतो व्रजति । अनलसः स न कुत्रापि समयं मुधा गमयति, विश्राम्यति, निश्चिन्तं च स्वपिति । एकान्तमनुपलक्षितेषु ग्राम-नगरादिष्वपि वीणा-नादेन कर्णामृत-मधुर-वैराग्यमय-गीतगानेन जनसमूहमाकर्षति । बाल्यावस्थमद्भुतरूपसम्पदं तं विलोक्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जोईसरं जणया संमोहिआ होइ, सक्कारेइ, सम्माणेइ, अणेग-वत्थूहिं पुण उवणीमंतेइ परं णिप्पिवासो राउलो ण किमवि गिण्हेइ, णवरं भिक्खायरिआए समिआइयं[1] दव्वं गहिअ णिअ-हत्थेहिं पागं करिअ एगहुत्तं भुंजेइ। पच्छा लद्ध-परिचयेहिं तत्थगय-जणेहिं जिणदत्तस्स ट्ठिइं आगमण-गमणाइयं गवेसइ। अपत्त-वुत्तंतो इक्कवए तओ णिप्फिडइ। तत्थ ठाउं बहुमणुरुद्धो वि णायरेहिं 'अलाहि अलाहि णिवासेणं' ति कहेंतो अद्धणीणो हवइ। एवं पलंबा वत्तणी उल्लंघिआ णेण। अणेगाणि णयराणि मग्गिआणि। वणाणि तद्दिट्ठीए दिट्ठाणि। णाणा मढा आसमा पंतग्गामा ढुंढुल्लिआ। परं ण जिणदत्तस्स णामंपि आयण्णिअं। ण काइ पउत्ती वि पत्ता। सुहमो संकेओवि ण लद्धो। तहावि अखेइरो राउलो दक्खिणाए दिसाए परिवड्ढइ। लक्खेग-दिट्ठी केत्तिल्लमिणं 'ति मण्णंतो सवेगमग्गओ सरइ। उज्ज-मिल्लाणं किमलब्भं, किमसक्कं, किं दूरं वा ? जे असाह-हल्लं मुणेंति साहल्लस्स उवायाणं। चलणाणमुवरि चलंति जत्थ चलणा तत्थ किं दूरं गम्मपयं ? कमसो अणेग-दिअहेहिं पत्तं राउलेण जिणदत्त-सणाहं वसंतपुरं णाम णयरं। मग्ग-संगएहिं तत्थगय-जणेहिं पुव्वमेव जिणदत्तणामो कोइ वुड्ढो कट्ठहारगो सभज्जो पुरस्स बाहिरं एगम्मि उडजम्मि णिवसइ 'त्ति मुणिअं। सुणिऊण स-ससुरस्स चिरंचितिअं कण्णप्पिअं णामहेअं हरिस-वसुब्भिण्ण-रोमंचो संजाओ

---

१ समितादिकम्-'आटा आदि' इतिभाषा २ निस्फिटति 'बाहर निकलना' इतिभाषा।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योगीश्वरं जनता सम्मोहिता भवति, सत्कारयति, सम्मानयति, अनेक-वस्तुभिः पुनरुपनिमन्त्रयति परं निष्पिपासो राउलो न किमपि गृह्णाति, केवलं भिक्षाचर्यया समितादिकं द्रव्यं गृहीत्वा निजहस्ताभ्यां पाकं कृत्वा एकवारं भङ्क्ते । पश्चाद् लब्ध-परिचयैस्तत्रगत-जनैर्जिनदत्तस्य स्थितिम् आगमन-गमनादिकं गवेषयति। अप्राप्तवृत्तान्तः एकपदे ततो निष्फटति । तत्र स्थातुं बह्वनुरुद्धोऽपि नागरैः 'अलमलं निवासेनेति कथयन् अध्वनीनो भवति । एवं प्रलम्बा वर्तनी उल्लंघिता तेन । अनेकानि नगराणि मार्गितानि । वनानि तद्दृष्ट्या दृष्टानि । नाना मठाः आश्रमाः प्रान्तग्रामाः गवेषिताः । परं न जिनदत्तस्य नामाप्याकर्णितम् । न कापि प्रवृत्तिरपि प्राप्ता । सूक्ष्मः संकेतोऽपि न लब्धः । तथापि अखेदवान् राउलो दक्षिणस्यां दिशि परिवर्धते । लक्ष्यैकदृष्टिः कियदिदमिति मन्यमानः सवेगं अग्रतः सरति । उद्यमवतां किमलभ्यं, किमशक्यं, किं दूरं वा—ये असाफल्यं जानन्ति साफल्यस्य उपादानम् । चलनानामुपरि चलन्ति यत्र चलनाः तत्र किं दूरं गम्यपदम् ? क्रमशोऽनेकदिवसैः प्राप्तं राउलेन जिनदत्त-सनाथं वसन्तपुरं नाम नगरम् । मार्ग-संगतैस्तत्रगतजनैः पूर्वमेव जिनदत्तनामा कोऽपि वृद्धः काष्ठ-हारकः सभार्यः पुरस्य बहिरेकस्मिन् उटजे निवसतीति ज्ञातम् । श्रुत्वा स्वश्वसुरस्य चिरचिन्तितं कर्ण-प्रियं नामधेयं हर्षवशोद्भिन्नरोमाञ्चः संजातो राउलः । मनोरथ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राउलो ! मणोरह-घणसंचिआ परिवड्ढिआ पंफुल्लिआ आसावल्ली । सो च्चिअ सोमो जिणदत्तो ससुरो, सा च अत्ता मे भद्द-सहावा भाणुमई । धण्णा अज्जाऽहं तेसिं चिरदुल्लहं दंसणं करिस्सं । पिअ-पुत्तस्स अलद्धपुव्व-सुह-समायारेण तेसिं माणसं तोसइस्सं[1] । अहा ! केरिसो होहिइ सो आणंद-मइयो समयो ? एवं विकप्पंतो आगओ पुर-परिसरम्मि राउलो । दिट्ठि-पहमावडिअं तमुडजं । कट्ठ-भारं णेउं गओ वणम्मि जिणदत्तो । कज्ज-लग्गहत्था उडजमज्झम्मि ठिआ भाणुमई । तक्खणं तत्थ समोइण्णो पसण्णमणो वीणाहत्थो सो । उडजस्साहिमुहं दिट्ठा णेण समअला गोमय-लिपिआ पवित्ता वेइआ । परिओ पाइयं पसण्णं वायावरणं । तत्थ वेइआए वीणा-वायण-तप्परो णिमीलिअच्छी अयाणंतो विव अच्छिओ राउलो । सुणिऊण सवणामयं महुरसरं वीणं को एत्थ गायइ 'त्ति तक्कणपरा भूआ भाणुमई । ईसिं गीवं लंबायमाणीए बाहिं पेक्खिअं ताए । भत्ति-रस-णिब्भरं गायंतो वीणाए समं दिट्ठो ताए एगो बालजोई । अहो ! धण्णं अम्हकेरं दिव्वं दिअहं अज्जतणं, जं अणाहूओ अचिंतिओ एसो बालमुणी अमुणिअं दंसणं दाउं कय-पयप्पणो । णूणं अज्ज किमवि महाभव्वं संभाविज्जइ । पुण्णाणं तुच्छाणं च उवरिं जेसिं समा मई तेसिं मणम्मि कत्थ गंतव्वं, कत्थ ण गंतव्वं, कत्थ चिट्ठिअव्वं, कत्थ ण चिट्ठिअव्वं, ण एआरिसा विगप्पा संभवंति, ता उवणिमंतेमि माहुअरिअट्ठं बालमुणि-मिमं । इअ विचिंतिअ किमवि भोअणारिहं दव्वं सप्पेमं

---

१ तोषयिष्यामि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घन-सिक्ता परिवर्धिता प्रफुल्ला आशावल्ली। स चैव सौम्यो जिनदत्तः श्वसुरः, सा च अत्ता (श्वश्रूः) मे भद्र स्वभावा भानुमती। धन्या अद्याऽहं तेषां चिरदुर्लभं दर्शनं करिष्यामि। प्रियपुत्रस्य अलब्धपूर्व-सुखसमाचारेण तेषां मानसं तोषयिष्यामि। अहा! कीदृशो भविष्यति स आनन्दमयः समयः? एवं विकल्पयन् आगतः पुरपरिसरे राउलः। दृष्टिपथमापतितं तदुटजम्। काष्ठ-भारं नेतुं गतो वने जिनदत्तः। कार्यलग्न-हस्ता उटजमध्ये स्थिता भानुमती। तत्क्षणं तत्र समवतीर्णः प्रसन्नमनाः वीणाहस्तः सः। उटजस्याभिमुखं दृष्टा तेन समतला गोमय-लिप्ता पवित्रा वेदिका। परितः प्राकृतं प्रसन्नं वातावरणम्। तत्र वेदिकायां वीणावादन-तत्परो निमीलिताक्षिः अजानन्निव आसितो राउलः। श्रुत्वा श्रवणामृतां मधुरस्वरां वीणां कोऽत्र गायतीति तर्कणपरा भूता भानुमती। ईषद ग्रीवां लम्बायमानया बहिः प्रेक्षितं तया। भक्तिरस-निर्भरं गायन् वीणया समं दृष्टस्तया एको बाल-योगी। अहो! धन्यमस्मदीयं दिव्यं दिवसमद्यतनम्, यत् अनाहूतः अचिन्तितः एष बालमुनिः अज्ञातं दर्शनं दातुं कृत-पदार्पणः। नूनमद्य किमपि महाभव्यं संभाव्यते। पूर्णानां तुच्छानां चोपरि येषां समा मतिः तेषां मनसि कुत्र गन्तव्यं, कुत्र न गन्तव्यं, कुत्र स्थातव्यं, कुत्र न स्थातव्यं, नैतादृशाः विकल्पाः संभवन्ति, तस्माद् उपनिमन्त्र-यामि माधुकरिकार्थं बालमुनिमिमम्। इति विचिन्त्य किमपि भोजनार्हं द्रव्यं सप्रेम दातुमुपराउलं उपनता सा। कृतो विनयप्रणामः। महती

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दाउं उवराउलं उवणया सा। कओ विणयप्पणामो। महई किवा कया बालजोईसर! समुद्धारिआ अम्हारिसा मंदभग्गा पावण-दंसणेण। जइवि ण अत्थि तुह सागय-जुग्गं किमवि विसिट्ठं, तहवि भत्ति-विसिट्ठं विसिट्ठं मुणीणं 'ति आणिअं किमवि लुक्खं सुक्खं साणुग्गहं गहिअव्वं। मुणी! जइ हुंतो अम्ह णिवासो पुरिमतालम्मि, तया कावि अण्णा सेव्वा, भत्ती, सुस्सूसा य कया हुंता। परं किं संपइ वट्टइ 'त्ति साहेमाणी ईसिमुल्लाइं नेत्ताइं चीवरेण पुंछंती तुण्हिक्का जाया।

पेम्मस्स पिंडलइआ, वच्छल्लस्स रिंछोली[1], सारल्लस्स मुत्ती, किवाए य पत्तं, पयडीए सोम्मा, राउलेण अत्ता विलोइआ। पुत्त-विरह-दुब्बलावि जा कत्तव्व-पालण-पीवरा, दरिद्द-दाव-दड्ढा वि मणसा दाणुच्छुआ, सहाव-महुरा धम्मिट्ठा य तेण सा अणुहूआ। अहो! धरणं गयं, ण गया दाणसीलया। विलीणा सामिद्धी, परंतु ण बोलीणा माणवया। अहवा धूलिधूसरंपि रयणं जहाइ किं महग्घिमं? भूमिअल-णिवडिअंपि घणजलं हवइ किं कडुअं? पत्त-पुप्फ-फल-विहूणो वि अंबो किं जायइ णिंबो? खलु गुण-रयण-खाणी इमिआ तो उववण्णं एत्थ रयणं। नूणं होइ अग्गिणा उद्दीविअं दीविअं सुवण्णं। जायए महमहिअं णिघट्ठं चारुचंदणं। एवं वीमंसेमाणो राउलो पुव्वमिव वीणं वाएमाणो मुअल्लिओ ठिओ।

---

१ रिंछोली-स्त्री० (दे०) पङ्क्तिः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृपा कृता बालयोगीश्वर ! समुद्धारिता अस्माद्दशा मन्दभाग्याः पावन-दर्शनेन । यद्यपि नास्ति तव स्वागत-योग्यं किमपि विशिष्टं, तथापि 'भक्ति-विशिष्टं विशिष्टं मुनीनाम्' इति आनीतं किमपि रुक्षं शुष्कं सानुग्रहं गृहीतव्यम् । मुने ! यदि अभविष्यत् अस्माकं निवासः पुरिमतालपुरे तदा काप्यनन्या सेवा, भक्तिः, सुश्रूषा च कृता अभविष्यत् । परं किं सम्प्रति यद् वर्तते इति कथयन्ती ईषद् आर्द्रं नेत्रं चीवरेण प्रोच्छन्ती तूष्णीका जाता ।

प्रेम्णः पिण्डलिका (पिण्डीकृता) वात्सल्यस्य रिञ्छाला, (पङ्क्तिः) सारल्यस्य मूर्तिः, कृपायाश्च पात्रं, प्रकृत्या सौम्या राउलेन अत्ता (श्वश्रूः) विलोकिता। पुत्र-विरह-दुर्बलाऽपि या कर्त्तव्य-पालन-पीवरा, दारिद्र्य-दाव-दग्धाऽपि मनसा दानोत्सुका, स्वभाव-मधुरा धर्मिष्ठा च तेन साऽनुभूता । अहो ! धनं गतं न गता दान-शीलता । विलीना समृद्धिः परन्तु न व्यतिक्रान्ता मानवता । अथवा धूलि-धूसरमपि रत्नं जहाति किं महार्घ्यताम् ? भूमितल-निपतितमपि घनजलं भवति किं कटुकम् ? पत्र-पुष्प-फल-विहीनोऽप्याम्रो किं जायते निम्बः ? खलु गुणरत्नखानिः इमा तस्मादुत्पन्नमत्र रत्नम् । नूनं भवति अग्निनोद्दीपितं दीपितं सुवर्णम् । जायते महमहिअं (प्रसृत-सौरभं) निघृष्टं चारु चन्दनम् । एवं विमर्शयन् राउलः पूर्वमिव वीणां वादयन् मूकः स्थितः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"ण कहं उत्तरिज्जइ भयंतेण। कहं ण घेप्पइ भत्ति-भरिआ भिक्खा। लुक्खावि पेम्म-सिणिद्धा इट्ठा। णिगिट्ठावि भत्ति-विसिट्ठा मिट्ठा" पच्चुत्तरं विरमालेमाणीए भाणुमईए तक्किअं।

"ण जुज्जइ, दे मायरं! इयाणिं माहुअरी। असाहारणं तुह भत्तिं पेक्खमाणेण मए अवस्सं घेतव्वा सा। परंतु पहु[1]-भत्ति-रस-पाण-थिंपिअ-मणस्स मे णत्थि सण्हावि बुभुक्खा, पिवासा पुण। का चिंता मुणीणं भोअणस्स, जत्थ वच्चइ तत्थ अणेगे दायरा हत्थ-गय-भिक्खा पडिक्खंति[2]। अम्मया! णीहरिओऽहं पुरिमतालाओ किंचि काल-पुव्वं अणेग-गाम-णायर-पुर-पट्टणाणि हिंडंतो एत्थ समागओ। सुरम्मं थलं णिहालिऊण वीसमणट्ठं तुह उडज-वेइआए ठिओ। पहुस्स गुणगाणेण लद्धा अज्झत्थ-वीसंती। भत्तिजुत्तेण तुह आमंतणेण पुण अईव संतुट्ठोम्हि" पयडिअं राउलेण णिरवेक्खभावेणं।

सुणिआण पुरिमतालस्स णामहेअं अचिंतणिज्जाए काए आसा-रेहाए छिविआ[3] भाणुमई तक्खणं पुच्छिउमाढत्ता—"किं पुरिमतालत्तो आगमणं भे?"

राउलो—"आम, तत्तो च्चिअ"

उच्छुईभूआ भाणुमई—"उवलक्खिज्जंति किं भदंतेण तत्थगया विसिट्ठा णयरमहंतया"?

राउलो—"कहं ण? चिरठिईए अईव परिचिआ मे तत्थगया पमुहा।"

---

१ प्रभुभक्ति-रसपान-तृप्तमनसः २ प्रतीक्षन्ते ३ स्पृष्टा।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'न कथमुत्तीर्यते भदन्तेन ? कथं न गृह्यते भक्तिभरिता भिक्षा ? रुक्षाऽपि प्रेम-स्निग्धा इध्दा । निकृष्टाऽपि भक्ति-विशिष्टा मिष्टा" प्रत्युत्तरं प्रतीक्षमाणया भानुमत्या तर्कितम् ।

"न युज्यते हे मातः ! इदानीं माधुकरी । असाधारणां तव भक्तिं प्रेक्षमाणेन मया अवश्यं गृहीतव्या सा । परन्तु प्रभुभक्ति-रसपान-तृप्तमनसः मे नास्ति सूक्ष्माऽपि बुभुक्षा, पिपासा पुनः । का चिन्ता मुनीनां भोजनस्य ? यत्र व्रजति तत्रानेके दातारो हस्तगत-भिक्षाः प्रतीक्षन्ते । अम्ब ! निसृतोऽहं पुरिमतालात् किञ्चित्कालपूर्वम् । अनेक-ग्राम-नगर-पुर-पत्तनानि हिण्डन्नत्र समागतः । सुरम्यं स्थलं निभाल्य विश्रमणार्थं तवोटजवेदिकायां स्थितः । प्रभोर्गुणगानेन लब्धाऽध्यात्म-विश्रान्तिः । भक्ति-युक्तेन तवामन्त्रणेन पुनः अतीव सन्तुष्टोऽस्मि" प्रकटितं राउलेन निरपेक्ष-भावेन ।

श्रुत्वा पुरिमतालस्य नामधेयं अचिन्तनीयया कया आशा-रेखया स्पृष्टा भानुमती तत्क्षणं प्रष्टुमारब्धा—"किं पुरिमतालादागमनं भवतः ?"

राउल—"आम् ! ततः एव" ।

उत्सुकीभूता भानुमती—"उपलक्ष्यन्ते किं भदन्तेन तत्रगताः विशिष्टाः नगरमहत्काः ?"

राउलः—"कथं न, चिरस्थित्याऽतीव परिचिताः मे तत्रगताः प्रमुखाः ।"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ससंभमं भाणुमई—"तया तु अवस्सं णज्जइ तुमए मम्मणसेट्ठिणो गुत्तं[1]।"

राउलो—"णूणं अत्थि सो दढमुट्ठी णयर-लक्खिओ महेब्भो"।

हरिस-वसुब्भिण्ण-हिअय-कमला भाणुमई—"किं मुणिज्जइ मुणिणा तस्स पुत्ताइओ रयणवालो ?"

नव्वं भावभंगिमं नाडेमाणो राउलो—"अम्मो ! कहं मुणेइ अम्मा तं रयणं ? सो च्चिअ अत्थि मे परमपीइपत्तं अबीओ मित्तो। छमास-पेरंतं ठिओऽहं तेण सद्धिं अम्मो !"

रणरणयं भयंती भाणुमई—"किं सच्चं ! तं जाणइ राउलो ?" एवं भणमाणी समीवमागम्म ठिआ।

"अम्हारिसेहिं किममुणिअं रहस्सं, जाणेमि तस्स सव्वं पि जहाजायं घडणा-चक्कं। माय ! णत्थि सो मम्मणपुत्तो, किंतु अत्थि सो जिणदत्तसेट्ठिणो कुलदीवो, भाणुमईए य अंगओ। दुव्विहिणा पीलिआ अम्मापिउणो तं सत्तवीसवासरिअं थावण-रूवेण मम्मण-गिहम्मि ठविअ अलक्खिअमग्गा पवासं गया" पाउक्कयं सलक्खं राउलेण।

धारेउमसक्कं चिरालद्ध-पुत्त-पउत्ति-उच्छुक्कं[2] वहमाणी भाणुमई—"तओ किं ? तओ किं ? राउल !"

पुत्त-विरहग्गि-ताव-उम्हाइयं[3] मायर-हिअयं सुअस्स कुसल-कहा-सलिल-धाराहिं सलीलमोल्हवेमाणो[4] राउलो—

---

१ गोत्रम्-नामधेयम् २ औत्सुक्यम् ३ पुत्रविरहाग्नितापोष्मायितम्, ४ विध्यापयद्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ससंभ्रमं भानुमती—'तदा तु अवश्यं ज्ञायते त्वया मन्मन-श्रेष्ठिनो गोत्रम् ?'

राउलः—'नूनमस्ति स दृढमुष्टिर्नगर-लक्षितो महेभ्यः।'

हर्षवशोद्भिन्न-हृदय-कमला भानुमती—'किं ज्ञायते मुनिना तस्य पुत्रायितो रत्नपालः ?'

नव्यं भावभङ्गिमानं नाटयन् राउलः—"अम्मो ! (आश्चर्ये) कथं जानाति माता तं रत्नम् ? स एवास्ति मम परमप्रीतिपात्रमद्वितीयं मित्रम्। षण्मास-पर्यन्तं स्थितोऽहं तेन सार्धं अम्ब !"

रणरणकं भजन्ती भानुमती—"किं सत्यम् ? तं जानाति राउलः?" एवं भणन्ती समीपमागम्य स्थिता।

"अस्माद्दृशैः किमज्ञातं रहस्यम् ? जानामि तस्य सर्वमपि यथा-जातं घटनाचक्रम्। मातः ! नास्ति स मन्मन-पुत्रः, किन्तु अस्ति स जिनदत्त-श्रेष्ठिनः कुलदीपो भानुमत्याश्च अङ्गजः ! दुर्विधिना पीडितौ मातापितरौ तं सप्तविंशति-वासरिकं स्थापनरूपेण मन्मनगृहे स्थाप-यित्वा अलक्षित-मार्गौ प्रवासं गतौ" प्रादुष्कृतं सलक्ष्यं राउलेन।

धर्तुमशक्यं चिरालब्ध-पुत्र-प्रवृत्त्यौत्सुक्यं वहन्ती भानुमती—"ततः किम्, ततः किं राउल !"

पुत्र-विरहाग्नि-तापोष्मायितं मातृहृदयं सुतस्य कुशल-कथा-सलिल-धाराभिः सलीलं विध्यापयन् राउलः—"मन्मनेन पुत्रवत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"मम्मणेण पुत्तव्व पालिओ, पाढिओ य जया दुवालस-वासिओ होहीअ[1] सो, तया अहमण्णस्स मम्मिग-सद्देहिं ताडिओ णिअ-वुत्तंतवेइरो जाओ।"

अणिमिसणयणा माया–"पच्छा, पच्छा किं ?"

राउलो–"हरिपोअव्व णिसग्गं पत्तो तक्खणं पवास-गमणतप्परो संभूओ। मम्मणेण भिसमणुरुद्धोऽवि ण रुद्धो सो। अंतम्मि भरिअ भंडं बोहित्थम्मि[2] णिब्भयं संजत्तिओ जाओ।"

(सगयं) एआरिसं साहसं कयं तेण दुद्धमुहेण ! आरेइय-[3] रोमराइआ भाणुमई–"एवं दुक्करमायरिअं तेण ! अत्थि अग्गेवि विण्णाणं तस्स ?"

राउलो–"कहं ण ? सुणसु, अज्जपज्जंतं वुत्तंतं। गओ सो कालकूडणामगं दीवं। पुप्फाण संजोएण णीरोओ जाओ णिवई। विक्कएणावि भंडस्स लद्धो अउलो लाहो। तत्थ परणीआ तेण राय-पुत्तिआ रयणवई।"

सच्छरिज्जं अंबा–"किं भणसि राउल ! किं सो जाओ जणेसरस्स जामायरो ? एआरिसो भग्गमंतो !"

राउलो–"सच्चं सच्चं खु मायरं ! पयडिओ सो महा-भागिल्लो। किं ण सुव्वइ[4] जणकहणं जं पुरिसभग्गं केण णज्जइ ?

हरिसंसुजलुल्ल-लोयणा भाणुमई–"किं तत्थेव चिट्ठइ सो, वा आगओ पुणरवि णिअं पुरं ?"

---

१ अभूत् २ यानपात्रे ३ आरेइयं (दे०) पुलकितमित्यर्थः ४ श्रूयते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पालितः पाठितश्च यदा द्वादश-वार्षिकोऽभूत् सः, तदा अधमर्णस्य मार्मिकशब्दैस्ताडितो निज-वृत्तान्त-वेदिरो जातः।"

अनिमिषनयना माता—"पश्चात्, पश्चात् किम् ?"

राउलः—"हरिपोतवत् निसर्गं प्राप्तस्तत्क्षणं प्रवासगमन-तत्परः संभूतः। मन्मनेन भृशमनुरुद्धोऽपि न रुद्धः सः। अन्ते भूत्वा भाण्डं बोहित्थे निर्भयं सांयान्त्रिको जातः।"

(स्वगतम्) एतादृशं साहसं कृतं तेन दुग्धमुखेन ? पुलकितरोमराजिका भानुमती—"एवं ! दुष्करमाचरितं तेन, अस्ति अग्रेऽपि विज्ञानं तस्य ?"

राउलः—"कथं न ? शृणु, अद्यपर्यन्तं वृत्तान्तम्, गतः स कालकूटनामकं द्वीपम्। पुण्याणां संयोगेन नीरोगो जातो नृपतिः। विक्रयेणाऽपि भाण्डस्य लब्धोऽतुलो लाभः। तत्र परिणीता तेन राजपुत्रिका रत्नवती।"

साश्चर्यमम्बा—"किं भणति राउल ! किं स जातो जनेश्वरस्य जामाता ? एतादृशो भाग्यवान् !"

राउलः—"सत्यं-सत्यं खलु मातः ! प्रकटितः स महाभाग्यवान्। किं न श्रूयते जन-कथनं यत् 'पुरुषभाग्यं केन ज्ञायते ?"

हर्षाश्रुजलार्द्रलोचना भानुमती—"किं तत्रैव तिष्ठति सः, वा आगतः पुनरपि निजं पुरम् ?"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राउलो–किं पुच्छेसि माय ! कहं सो अम्मा-पिउ-विहूणो तत्थ ठाएउं खमो ! सिग्घं पच्चावलिओ तओ आगओ सखेमं णिअं पुरं । पच्चप्पिअं सव्वं अणं[1] । मम्मण-गिहत्तो तक्खणं समागओ णिअं हम्मिअं महया चडयरेण[2] । संपइ अणुवेलं विरमालेइ स अम्मा पिऊणं दरिसणं ।"

वहंतबाहणीरा भाणुमई–"अहमेवाम्हि पुत्त-विरहिआ मंदभग्गा भाणुमई रयणवाल-जणणो । धण्णं अज्जतणं दिणं जम्मि कण्ण-सुहाइआ जहातहं पिअ-पुत्त-पउत्ती पत्ता । जोइंद ! को जाणेइ काइं काइं कट्ठाइं सहिआइं पुत्त-विरहम्मि । अम्हेवि पच्छा णिअं पुरं गंतुमुच्छुआ आसी, किंतु अलद्ध-वुत्तंत्ता किंचि संकिआ । संपइ अणायासं तुह आगमणं जायं एत्थ । मिलिआ सव्वावि सुअस्स वत्ता । अहुणा तुरेस्सामो तत्थ गमित्तए, पुत्तं च पेक्खित्तए सुल्लासं ।"

तत्थ णिवडिअं एगं कट्ठखंडं विलोइअ करेण गहिअं, चाउज्जेण जिग्घिअं, पुट्ठं च–"किमिणं! किमिणं ! अम्मो !" सारल्लमुत्तीए भाणुमईए चविअं–"णत्थि किमवि एयं । एमेव कट्ठभाराओ णिवडिअं किमवि, जओ रयणवाल-पिआ आणेइ पइदिणं सुक्कं इंधण-भारं, मणे तस्स चिअ इणमो सयलं ।"

रहस्समुणंतेण इव राउलेण तं झोलिआए संगोविअं, जंपिअं पुणा–"को गिण्हेइ अणुदिअहं तमिंधणभारं णयरम्मि ?"

भाणुमई–"अत्थि एगो णयरम्मि णेहालओ[3] महेब्भो

---

१ ऋणम् २ आडम्बरेण ३ स्नेहवान् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राउलः—"किं पृच्छसि मातः ! कथं स मातृपितृविहीनस्तत्र स्थातुंक्षमः ? शीघ्रं प्रत्यावर्तितस्ततः आगतः सक्षेमं निजं पुरम्। प्रत्यर्पितं सर्वमृणम्। मन्मन-गृहात् तत्क्षणं समागतो निजं हर्म्यं महता चडयरेण (आडम्बरेण) सम्प्रत्यनुवेलं प्रतीक्षते स मातापित्रोः दर्शनम्।"

वहद्वाष्पनीरा भानुमती—"अहमेवास्मि पुत्र-विरहिता मन्दभाग्या भानुमती रत्नपाल-जननी। धन्यमद्यतनं दिनं यस्मिन् कर्ण-सुखायिता यथातथं प्रियपुत्र-प्रवृत्तिः प्राप्ता। योगीन्द्र ! को जानाति कानि कानि कष्टानि सोढानि पुत्रविरहे। वयमपि निजं पुरं गन्तुमुत्सुका आस्मः, किन्तु अलब्धवृत्तान्ताः किञ्चित् शङ्किताः। सम्प्रत्यनायासं तवागमनं जातमत्र। मिलिता सर्वाऽपि सुतस्य वार्ता। अधुना त्वरिष्यामस्तत्र गन्तुं, पुत्रं च प्रेक्षितुं सोल्लासम्।

तत्र निपतितमेकं काष्ट-खण्डं विलोक्य करेण गृहीतं, चातुर्येण भ्रातं, पृष्टं च—'किमिदम्-किमिदम् ? अम्ब !' सारल्यमूर्त्या भानुमत्या कथितम्—"नास्ति किमपि एतत्। एवमेव काष्टभारान्निपतितं किमपि। यतो रत्नपाल-पिता आनयति प्रतिदिनं शुष्कमिन्धनभारं मन्ये तस्यैव इदं शकलम्।"

रहस्यमजानतेव राउलेन तत् झोलिकायां संगोपितं, जल्पितं पुनः—"को गृह्णाति अनुदिवसं तमिन्धन-भारं नगरे ?"

भानुमती—"अस्त्येको नगरे स्नेहवान् महेभ्यो धनदत्तः। स

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धणदत्तो। सो अणुदिहं गहइ एगेणेव मुल्लेण तं। अणेगे वासा बोलीणा णण्णत्थ गमणपयोअणं।"

(सगयं राउलो) धी धी धी! धुत्तसेहरं, जो विप्पयारेइ कट्ठमुल्लेण चंदणं गिण्हंतो भद्दं जिणदत्तं।

एत्तो विक्किऊण भारिअं आगओ जिणदत्तोवि। उप्फुल्लणयणारविंदा धावेमाणी भाणुमई सम्मुहं गया पइदेवस्स। साहिओ राउल-भणिओ पिय-पुत्त-वुत्तंतो। हरिसवसविसप्पमाणहिअयो सविंत्थारं पुत्त-वुत्तंतं सोउं उवराउलं ठिओ सेट्ठी। पुच्छिआ सव्वावि पउत्ती। सद्धिं पण्हुत्तरेहिं सणिअं-सणिअं सव्वापि पयडिआ तेण पिअपुत्तकहा। उच्छुअं जायं हिअयं तं दट्ठुं। अबीओ आणंदो समुप्पण्णो।

"थेव-दिणाणंतरं अहमवि पच्छा पुरिमतालं गंतुकामोम्हि। भविस्सइ णूणं संगयं गमणं अम्हाणं।" पडिवेइअं उवेक्खिरेण इव राउलेण।

"साहुं साहुं, सद्धिं चिअ गमिस्सामो। तुह संगमेण अम्हे अईव आणंदिआ होस्सामो" सेट्ठिणा भणिअं।

भिक्खायरिआए सेट्ठिणा वि बहुणिमंतिओ अणंगीकाऊण तेसिं वयणं तओ उट्ठिओ सो। 'सायं पायं इहागमिस्समहं पुणरवि' एवं जंपिऊण गोसीस[1]-वंचअं धणदत्तं गवेसिउं अंतोउरं[2] पविट्ठो। चउप्पहम्मि ठिएण तेण एआरिसी महुरसरं वीणा वाइआ जेण पुरजणया सयमाकड्ढिआ। मय-णिउरंबव्व णाय-मोहिओ जणाण संघाओ राउलं परिआलिअ[3] ठिओ। अणेगवत्थूहिं उवणिमंतिओवि

१ गोशीर्षवञ्चकम्-चन्दनवञ्चकम् २ पुरमध्ये ३ परिवृत्य।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनुदिवसं गृह्णाति एकेनैव मूल्येन तम्। अनेकानि वर्षाणि व्यतिक्रान्तानि नान्यत्र गमन-प्रयोजनम्।"

स्वगतं राउलः—"धिग्! धिग्! धिग्! धूर्तशेखरं; यो विप्रतारयति काष्ठमूल्येन चन्दनं गृह्णन् भद्रं जिनदत्तम्।"

इतो विक्रीय भारिकामागतो जिनदत्तोऽपि। उत्फुल्ल-वदनारविन्दा धांवन्ती भानुमती सम्मुखं गता पतिदेवस्य। कथितो राउलभणितः प्रियपुत्रवृत्तान्तः। हर्षवश-विसर्पद्हृदयः सविस्तारं पुत्रवृत्तान्तं श्रोतुं उपराउलं स्थितः श्रेष्ठी। पृष्टा सर्वाऽपि प्रवृत्तिः। सार्धं प्रश्नोत्तरैः शनैः शनैः सर्वाऽपि प्रकटिता तेन प्रिय-पुत्र-कथा। उत्सुकं जातं हृदयं तं द्रष्टुम्। अद्वितीयः आनन्दः समुत्पन्नः।

"स्तोकदिनानन्तरं अहमपि पश्चात् पुरिमतालं गन्तुकामोऽस्मि। भविष्यति नूनं संगतं गमनमस्माकम्" प्रतिवेदितमुपेक्षिणेव राउलेन।

"साधु! साधु! सार्धमेव गमिष्यामः। तव संगमेन वयमतीवानन्दिता भविष्यामः" श्रेष्ठिना भणितम्।

भिक्षाचर्यायै श्रेष्ठिनाऽपि बहुनिमन्त्रितोऽनङ्गीकृत्य तेषां वचनं तत उत्थितः सः। 'सायं प्रातरिहागमिष्याम्यहं पुनरपि' एवं जल्पित्वा गोशीर्ष-वञ्चकं धनदत्तं गवेषितुं अन्तःपुरं प्रविष्टः। चतुष्पथे स्थितेन तेनैतादृशी मधुरस्वरं वीणा वादिता, येन पुर-जनता स्वयमाकृष्टा। मृग-निकुरम्बवत् नाद-मोहितो जनानां संघातो राउलं परिवृत्य स्थितः। अनेकवस्तुभिरुपनिमन्त्रितोऽपि एष न गृह्णाति विशेषतः किञ्चित्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एसो ण गिण्हेइ विसेसओ किंचि। ताए णिप्पीहयाए[1] बहुगारवं पत्तो सो जणाण मणेसुं। णवरं णिअ-हत्थ-णिम्मिअ-सत्तिअ-भोअणेण तित्तो जहिं तहिं एगंतम्मि रत्तीए सुवेमाणो सो दक्खयाए धुत्त-धणदत्तस्स गिहेण परिचिओ जाओ।

इओ विहि-वसओ णिवस्स अंगम्मि दाहज्जरो समुप्पण्णो। कया सव्वेवि उवाया णीफला गया। विअणाए पीलिओ णिवो अईव असायमणुहवइ। ताला केणावि सड्ढणा पुरिसेण णिवस्स भणिअं—"कीस तुम्हे एआरिसं वेयणमणुहवेज्जा? एत्थ एगो जंत-मंत-तंतोसह-विसारओ राउलो जोई समागओ अत्थि। तस्सासीसाए देवस्स गओ[2] गओ[3] होहिइ, ण संका। तो आमंतिअव्वो सो इहइं। अवस्सं किवालुहिअयो सो किवं काहिइ"।

दुहिएण णरवइणा तक्खणं सइव[4]-सगासाओ ससम्माणं दंसणं दाउं पत्थिओ सो रायमंदिरम्मि। "का णाम हाणी! दाहमहं दंसणं णिवस्स। पहुकिवाए सव्वं भव्वं हवेज्जा" एवं साहेंतो तक्खणं तओ उप्पडिओ[5]। जणेहिं परिवारिओ, णिअ-लयम्मि रमेंतो, अहरपुडेहिं उवंसुजावं[6] च कुणमाणो राय-पासायं पत्तो। णिवेण विणयप्पणामो कओ, दत्तं च आसणं। "कयत्थोम्हि अज्ज तुह दंसणेण जोईसर! अणुहवामि तिव्वं दाहज्जरं। सव्वेवि अगयंकारा हारिआ ओसहं कुणंता। संपइ तुह सरणं गहिअं। कुणउ अणुग्गहं।"

---

१ निःस्पृहतया २ गदः ३ गतः ४ सचिव-सकाशात् ५ उत्थितः, गुजराती में 'उपड्यु' ६ 'उपांशुजापम्'।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तया निस्पृहतया बहु गौरवं प्राप्तः स जनानां मनस्सु । केवलं निज-हस्त-निर्मित-सात्विक-भोजनेन तृप्तो यत्र तत्र एकान्ते रात्रौ स्वपन् स दक्षतया धूर्त धनदत्तस्य गृहेण परिचितो जातः ।

इतो विधिवशतो नृपस्याङ्गे दाघज्वरः समुत्पन्नः । कृताः सर्वेऽपि उपायाः निष्फलाः गताः । वेदनया पीडितो नृपोऽतीवासातमनुभवति । तदा केनाऽपि श्रद्धिना पुरुषेण नृपाय भणितम्—"कस्माद् यूयं एतादृशीं वेदनामनुभवथ । अत्रैको यन्त्र-मन्त्र-तन्त्रौषध-विशारदो राउलो योगी समागतोऽस्ति । तस्याशिषा देवस्य गदो गतो भविष्यति, न शङ्का । तस्मादामन्त्रितव्यः स इह । अवश्यं कृपालुहृदयः स कृपां करिष्यति ।"

दुःखितेन नरपतिना तत्क्षणं सचिव-सकाशात् ससम्मानं दर्शनं दातुं प्रार्थितः स राजमन्दिरे । 'का नाम हानिः? दास्याम्यहं दर्शनं नृपाय । प्रभु-कृपया सर्वं भव्यं भवेत् ।' एवं कथयन् तत्क्षणं ततः उत्थितः । जनैः परिवारितो निजलये रममाणः, अधर-पुटाभ्यां उपांशुजापं च कुर्वन् राज-प्रासादं प्राप्तः । नृपेण विनय-प्रणामः कृतः, दत्तं चासनम् । "कृतार्थोऽस्मि अद्य तव दर्शनेन योगीश्वर ! अनुभवामि तीव्रं दाघ-ज्वरम् । सर्वेऽपि अगदंकाराः हारिताः औषधं कुर्वन्तः, सम्प्रति तव शरणं गृहीतम् । करोतु अनुग्रहम् ।"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"पहू पहुप्पइ[1] सव्वं भव्वं काउं। जस्स सरणेण अब्भंतरिआ गया वि विगया हवेज्जा, तत्थ बाहिरामयाणं का कलणा ? णूणं होइ मणुओ रोई अण्णाणेण णिअेण। पाइअणियमाणं खंडणं चिअ आमाणमामंतणं। परमत्थओ इंदिआणमासत्ती किर णाणा-रोआण जणणी। जइ सा णिव्वुइं पत्ता, सयं जम्मइ आरुग्ग-संपया" एवं सूअमाणेण राउलेण णरदेवस्स धमणी विलोइआ। कयं णिआणं। विचिंतिअं किंचि। "इसिकरमेयं सुकय-णिआणस्स वेज्जवरस्स। णवरं गोसीसचंदणं जुप्पइ जइ पावीअइ[3]। तेण तक्खणं रोगोवससणं हवे, इअ मे कप्पणा" सुल्लासमुप्पालिअं जोइणा।

सयराहमेव किंकरा तं गवेसिउं गया णयरम्मि। चंदणववहारिणो सव्वेवि आपुच्छिआ परं ण कत्थइ पत्तं एगमवि सयलममरचंदणस्स। उआसीण-मुहा सव्वेवि गवेसया पुणरागआ। "ण गोसीसं एत्थ कोइ जाणइ, उवलक्खइ, रक्खइ य। अण्णं साहारणं चंदणं जइ जुज्जइ तो सुलहं विज्जइ" साहियं तेहिं। हयासो जाओ णिओ। "अरे ! ण मिलिअममरचंदणमेत्थ ? हा ! हा ! अणुलंघणिज्जा भविअव्वया ! जोइवर ! संपइ तुममेव सरणं मे।"

"किमत्थि एआरिसं वत्थुं जं ण मिलइ पहुस्स महारज्जे। मणुअस्स अजुग्गया चिअ मणुअं असाहल्लं णिदंसेज्जा। किं णयरम्मि ण मिलिअं हरिअंदणं[4] ? अज्जेव मिलइ, अहुणेव मिलइ, इह एव मिलइ" एवं भणमाणेण

---

१ प्रभवति २ ईषत्करम् ३ प्राप्यते ४ हरिचन्दम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"प्रभुः प्रभवति सर्वं भव्यं कर्तुम्। यस्य स्मरणेनाभ्यन्तरिका गदा अपि विगता भवेयुः, तत्र बहिरामयानां का कलना ? नूनं भवति मनुजो रोगी अज्ञानेन निजेन। प्राकृतनियमानां खण्डनमेव आमानामन्त्रणम्। परमार्थतः इन्द्रियाणामासक्तिः किल नानारोगाणां जननी। यदि सा निर्वृतिं प्राप्ता स्वयं जायते आरोग्य-सम्पद्।" एवं सूचयता राउलेन नरदेवस्य धमनी विलोकिता। कृतं निदानम्। विचिन्तितं किञ्चित्। "ईषत्करमेतत् सुकृतनिदानस्य वैद्यवरस्य। केवलं गोशीर्ष-चन्दनं युज्यते यदि प्राप्यते, तेन तत्क्षणं रोगोपशमनं भवेत् इति मे कल्पना।" सोल्लासं कथितं योगिना।

शीघ्रमेव किङ्करास्तद् गवेषितुं गता नगरे। चन्दन-व्यवहारिणः सर्वेऽपि आपृष्टाः परं न कुत्रापि प्राप्तं एकमपि शकलं अमरचन्दनस्य। उदासीन-मुखाः सर्वेऽपि गवेषकाः पुनरागताः। "न गोशीर्षं अत्र कोऽपि जानाति, उपलक्ष्यते, रक्षति च। अन्यत् साधारणं चन्दनं यदि युज्यते तदा सुलभं विद्यते" कथितं तैः। हताशो जातो नृपः। "अरे ! न मिलितममरचन्दनमत्र। हा ! हा ! अनुल्लंघनीया भवितव्यता। योगिवर ! सम्प्रति त्वमेव शरणं मे।"

"किमस्ति एतादृशं वस्तु यन्न मिलति प्रभोः महाराज्ये ? मनुजस्यायोग्यतैव मनुजं असाफल्यं निदर्शयेत्। किं नगरे न मिलितं हरिचन्दनम्। अद्यैव मिलति, अधुनैव मिलति, इहैव मिलति" एवं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राउलेण तक्खणं पवेसिअं णिअं हत्थं झोलियाए मज्झयारम्मि। णिमीलिअ-णयण-जुअलं उच्चयं कहिअं, जहा–"आगच्छउ ! हरिअंदणं, सयराहमागच्छउ हरिअंदणं ! अत्थि पहुस्स आणा, अत्थि गुरुस्स आणा, अत्थि राउलजोइणो पुण आणा।" तक्कालमायाउ अमरचंदणं 'ति भणमाणस्स राउलस्स झोलिआओ गोसीस-सयलं हत्थ-गहिअं बाहिरमागअं। णिवपभिइणो विम्हयं गया। "अव्वो! अचिंतणिज्जा जोइणो सत्ती ! कुओ आगयं अकम्हा हरिचंदणं झोलिआए ? णूणं मे दाहज्जरो सत्तरं गत्तरो होहिइ।" घिट्ठं णिहत्थेहिं राउलेण चंदणं। काइं मंतक्खराइं उच्चारमाणेण लित्तं तं णिवस्स गत्तम्मि। जायमेत्ते लेवम्मि तक्खणमणुवमा सीअलया पसरिआ। विगय-दाहो संजाओ णरणाहो। मणे, णवजीवणं पत्तं तेण। णिवो राउलस्स चरणेसुं णिवडिओ, कयण्णुआए विण्णत्तं च–"हंत ! णिक्कारणमुवयारिणो ईइसा हवंति मुणिणो ! अत्थि अज्जावि मुणिकुंजरेसु वण्णणाईआ सत्ती। तो लोया सभत्ति पूअंति, सक्कारेंति, सम्माणेंति य साहु-पुंगवे। णिप्पिह ! केण पच्चुवयारेण लाहवं णेएमि अप्पाणं ? सच्चमिणं जं ण जुप्पइ किमवि लोगुत्तर-चरिआणं लोयम्मि, तहवि मज्झम्मि पसायं काऊण किमवि अंगीकर-णिज्जं। परमत्थओ महप्पेसु दाणं खित्तेसु मिव अचुच्छ-मायाणं। मुणिपुंगवाण देंता दायारो पच्चुलं अणुग्गहीया सिआ, तम्हा किंचि गहणप्पसाओ कायव्वो कारुण्णपुण्णेण भदंतेण।"

णिवस्स विणयस्सुवरिं झाणमदंतेण इव राउलेण उव-एस-सरस्सईए वुत्तं–"भूमिंद ! किं जुज्जइ मुणिंद-चंदाणं ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भणता राउलेन तत्क्षणं प्रवेशितं निजं हस्तं झोलिकायाः मध्ये। निमीलितनयनयुगलं उच्चैः कथितम्, यथा—"आगच्छतु हरिचन्दनम्। शीघ्रमागच्छतु हरिचन्दनम्। अस्ति प्रभोराज्ञा, अस्ति गुरोराज्ञा, अस्ति राउलयोगिनः पुनराज्ञा।" तत्कालमायातु अमरचन्दनमिति भणतो राउलस्य झोलिकातो गोशीर्ष-शकलं हस्त-गृहीतं बहिरागतम्। नृप-प्रभृतयो विस्मयं गताः। "अव्वो! (आश्चर्ये) अचिन्तनीया योगिनः शक्तिः। कुतः आगतं अकस्माद्धरिचन्दनं झोलिकायाम्। नूनं मे दाघज्वरः सत्वरं गत्वरो भविष्यति।" घृष्टं निजहस्ताभ्यां राउलेन चन्दनम्। कानि मन्त्राक्षराणि उच्चारयता लिप्तं तद्नृपस्य गात्रे। जातमात्रे लेपे तत्क्षणमनपमा शीतलता प्रसृता। विगतदाहः संजातो नरनाथः। मन्ये नवजीवनं प्राप्तं तेन। नृपो राउलस्य चरण-योर्निपतितः, कृतज्ञतया विज्ञप्तं च—"हन्त! निष्कारणमुपकारिणः ईदृशा भवन्ति मुनयः। अस्ति अद्यापि मुनि-कुञ्जरेषु वर्णनातीता शक्तिः। तस्माल्लोकाः सभक्ति पूजयन्ति, सत्कारयन्ति, सम्मानयन्ति च साधु-पुङ्गवान्। निस्पृह! केन प्रत्युपकारेण लाघवं नयामि आत्मानम्? सत्यमिदं यन्नयुज्यते किमपि लोकोत्तर-चरितानां लोके, तथापि मयि प्रसादं कृत्वा किमपि अङ्गीकरणीयम्। परमार्थतो महात्मसु दानं क्षेत्रेष्विव अतुच्छमादानम्। मुनि-पुङ्गवेभ्यो ददतो दातारः प्रत्युत अनुगृहीताः स्यु। तस्माद् किञ्चित् ग्रहण-प्रसादः कर्त्तव्यः कारुण्य-पुण्येन भदन्तेन।"

नृपस्य विनयोपरि ध्यानमददतेव राउलेनोपदेश-सरस्वत्या[1] उक्तम्—"भूमीन्द्र! किं युज्यते मुनीन्द्रचन्द्रेभ्यः? येषां निराशैव

---

१ उपदेशसरस्वत्या-उपदेशमय्या वाण्या इत्यर्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जेसिं णिरासा चिअ आसा। अकिंचणत्तमेव धणं। अहो! जायणा-सीलोवि जोई किं जायए जगम्मि? भिक्खेण सुलह-मण्णं पुण पाणिअं। धरणिअलं जाणं ठाणं। रुक्खमूलं किर पडिणिम्मिअं हम्मिअं। सव्वेवि लोआ परिअणा। उववासा जास अगयंकारा। भूणाह! बहुं पत्तं हवइ अप्प-चाएण। एगं आसाजालं छिंदंतो जोई तेलुक्क-सामिद्धिं हत्थेइ, ण किं एसो अइलाहो वावारो। तहवि अत्थि भत्ति-पुण्णा पत्थणा तो रक्खेम्मि णिवस्स वयणं भंडागारम्मि। आवडिए कज्जे किमवि मग्गहिस्सं 'ति जंपमाणो राउलो तओ उट्ठिओ। अस्स णिप्पिह-वित्तिं पेक्खिऊण सव्वेवि विम्हय-सेराणणा संजाया। समग्गपुरम्मि अब्भुआ एसा कहा वित्थरिआ। विचित्त-सत्तिल्लोअं राउलो। खणेण गमिआ इमेण णिवस्स तिव्वा वेअणा। अहुणा सव्व-विइअ-माहप्पो जाओ इमो।

एगया संझाकालम्मि एगागी राउलो धणदत्तस्स गिहस्स अग्गओ आगम्म सणिअं वीणं वाएउमाढत्तो। दिणावसाण-समयम्मि आयण्णिअ वीणस्सरं, पेक्खिऊण अग्गओ ठिअं च राउलं धणदत्तस्स भज्जा भयभीआ जाया। वेविरी[1] सा तक्कालं बाहिरमागया साहेउं पउत्ता–"राउल! कहं विआल-वेलाए एत्थ समागया तुम्हे? जं जुज्जइ तं सिग्घं गहिअ इओ अण्णत्थ वइअव्वं। जओ भदंता णिवघर-सम्माणिआ पूइया य संति, अहं एगागिणी अबला इत्थिआ संपइ। ण भे ट्ठिई सोहणत्तणमंचइ किंचि वि। तम्हा जया

१ वेपनशीला।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आशा। अकिञ्चनत्वमेव धनम्। अहो! याचनाशीलोऽपि योगी किं याचते जगति? भिक्षया सुलभमन्नं पुनः पानीयम्। धरणितलं येषां स्थानम्। वृक्षमूलं किल प्रतिनिर्मितं हर्म्यम्। सर्वेऽपि लोकाः परिजनाः। उपवासाः येषां अगदङ्काराः। भूनाथ! बहु प्राप्तं भवति अल्पत्यागेन। एकमाशाजालं छिन्दन् योगी त्रैलोक्य-समृद्धिं हस्तयति, न किम् एष अतिलाभो व्यापारः? तथापि अस्ति भक्तिपूर्णा प्रार्थना, तस्माद् रक्षामि नृपस्य (भवतः) वचनं भाण्डागारे। आपतिते कार्ये किमपि मार्गयिष्ये" इति जल्पन् राउलस्ततः उत्थितः। अस्य निस्पृह-वृत्तिं प्रेक्ष्य सर्वेऽपि विस्मय-स्मेराननाः संजाताः। समग्रपुरेऽद्भुता एषा कथा विस्तृता। विचित्रशक्तिवानयं राउलः। क्षणेन गमिताऽनेन नृपस्य तीव्रा वेदना। अधुना सर्व-विदित-माहात्म्यो जातोऽयम्।

एकदा सन्ध्याकाले एकाकी राउलो धनदत्तस्य गृहस्य अग्रतः आगम्य शनैर्वीणां वादयितुमारब्धः। दिनावसान-समये आकर्ण्य वीणास्वरं, प्रेक्ष्याग्रतः स्थितं राउलं धनदत्तस्य भार्या भयभीता जाता। वेपनशीला सा तत्कालं बहिरागता कथयितुं प्रवृत्ता—"राउल! कथं विकालवेलायामत्र समागता यूयम्? यद् युज्यते तच्छीघ्रं गृहीत्वा इतोऽन्यत्र व्रजितव्यम्। यतो भदन्ताः नृपगृहसम्मानिताः पूजिताः सन्ति, अहमेकाकिनी अबला स्त्री सम्प्रति। न भवतः स्थितिः शोभनत्वमञ्चति किञ्चिदपि। तस्माद् यदा अस्य बालकस्य

